ब्रह्मांडपुराण

प्र॰
पु॰

ॐश्रीगणेशायनमः॥ वायवेनमः प्रपद्येदेवमीशानंशाश्वतंध्रुवमव्ययं॥ महादेवंमहात्मानं सर्वस्यजगतःपतिं॥ ब्रह्माणंलोककर्त्तारंसर्वज्ञमपराजितं॥ प्रभुंभूतभविष्यस्यसांप्रतस्यचसत्पतिं॥ ज्ञानमप्रतिमंयस्यवैराग्यंचजगत्पतेः॥ ऐश्वर्यंचैवधर्मश्चसहसिद्धंचतुष्टयं॥ यइमान्पश्यते भावान्नित्यंसदसदात्मकान्॥ आविशंतिपुनस्तंवैभावाभावावपीश्वरं॥ लोककृल्लोकतत्वज्ञो योगमास्थायतत्ववित्॥ असृजत्सर्वभूतानिस्थावराणिचराणिच॥ तमजंविश्वकर्माणंचित्पतिं लोकसाक्षिणं॥ पुराणाख्यानजिज्ञासुर्व्रजामिशरणंप्रभुं॥ ब्रह्मवायुमहेंद्रेभ्योनमस्कृत्वासमा हितः॥ ऋषीणांचवरिष्ठायवसिष्ठायमहात्मने॥ तन्नप्त्रेचातिशयसेजातूकर्ण्यायचर्षये॥ वासिष्ठायैवशुचयेकृष्णद्वैपायनायच॥ पुराणंसंप्रवक्ष्यामिब्रह्मोक्तंवेदसंमितं॥ धर्मार्थन्यायसंयुक्तैरागमैःसुविभूषितं॥ असीमकृष्णेविक्रांतेराजन्येनुपमत्विषि॥ प्रशासतीमांधर्मेणभूमिं भूमिपसत्तमे॥ ऋषयःसंशितात्मानःसत्यव्रतपरायणाः॥ ऋजवोनष्टरजसःशांतादांता जितेंद्रियाः॥ धर्मक्षेत्रेकुरुक्षेत्रेदीर्घसत्रंतुईजिरे॥ नद्यास्तीरेदृषद्वत्याःपुण्यायाःशुचिरो

राम॰
१

॥ धर्मः दीक्षितास्तेन यागेन नैमिषारण्यगोचराः दृष्ट्वा तान्स महाबुद्धिः सूतः पौराणिकोत्तमः लो
मानि हर्षयाञ्चक्रे यो न शौनकसभापितैः कर्मणा प्रथितस्तेन लोकेस्मिन् लोमहर्षणः तपः श्रुता
चारनिधेर्वेदव्यासस्य धीमतः शिष्यो बभूव मेधावी त्रिषु लोकेषु विश्रुतः पुराणवेदो ह्यखिलस्त
स्मिन्सम्यक्प्रतिष्ठितः भारताख्या विपुला महाभारतवर्द्धिनी धर्मार्थकाममोक्षार्थाः कथा यस्मि
न्प्रतिष्ठिताः सूक्ताः सुपरिभाषाश्च भूमावो मध्ये यथा सर्वान्न्यायेन सर्वे धियो न्यायविन्मुनिपुंगा।
वान् अभिगम्योपसंगृह्य नमस्कृत्वा कृताञ्जलिः तोषयामास मेधावी प्रणीयाते न तानृषीन् तेवा
पि सत्त्रिणः प्रीताः ते सदस्या महौजसः तस्मै समासनं पुण्यं चयथावत्प्रतिपेदिरे अथ तेषां पुराणस्य शु
श्रूषासमुपस्थिता दृष्ट्वा तत्पूर्वं विश्रम्य विद्वांसं लोमहर्षणं तस्मिन्सत्त्रे गृहपतिः सर्वशास्त्रविशा
रदः इंगितेनैव मात्मज्ञस्तेनेतमनोदयत् त्वया सूत महाबुद्धिर्भगवान्ब्रह्मवित्तमः इतिहासपु
राणार्थं व्यासः सम्यगुपासितः उदोह वै मतिं तस्मात्पुराणाख्या कथा पद्मांच ऋषिमुख्याणां।
राणां प्रतिधीमता शुश्रूषामि महाबुद्धे तद्भावयितुमर्हसि सर्वे हीमे महात्मानो नानागोत्राः समा

गताः स्वान्स्वान्वंशान्पुराणोस्तत्र शृण्वन्तु ब्रह्मवादिनः सपुत्रान्दीर्घसत्रेस्मिन्सर्वान्श्रावय
भो मुनीन् दीप्तिष्मतो ऽस्माभिस्तेन प्रागासि संवृतः इति सन्नोदितस्तोतः प्रत्युवाच शुभा
गिरं शुश्रूषुंच न्यायसंयुक्तो ब्रूयाल्लोकमहर्षयः सूतोस्मपत्तु गृहीतास्मि भवद्भिरभिनोदितः
पुराणोर्थेपुराणज्ञैसत्यव्रतपरायणैः स्वधर्मएषसूतस्य सद्भिः दृष्टः पुरातनैः देवतानां
मृषीणांच राज्ञां चामिततेजसा वंशानांधारणंकार्यंश्रुतेनुमहात्मना इतिहासपुराणेषु दृष्टा
ष्टायेब्रह्मवादिभिः नहीवेदेष्वधीकारः कश्चित्सूतस्य दृश्यते वैन्यस्यहिपृथोर्यज्ञेवर्तमानेम
हात्मनः सूत्यायामभवत्सूतप्रथमंवर्णवैकृते ऐन्द्रेणपविष्टातत्रहविः पृक्तं बृहस्पतेः जु
हावेन्द्रायदेवायततः सूतोव्यजायत प्रमादात्तत्रसंजज्ञे प्रायश्चित्तंच कर्मसु शिष्यहव्येनयत्पृक्त
मभिभूतंगुरोर्हविः अधरोत्तरचारेणजज्ञेतद्वर्णवैकृते यच्चक्षत्रात्समभवद्ब्राह्मण्यावरयोनि।
जः ततः पूर्वेणसाधर्म्यात्तुल्यधर्मा प्रकीर्त्तितः मध्यमोह्येषसूतस्य धर्मक्षत्रोपजीवनं रथना
गाश्वचरितंजघन्यंच चिकित्सितं तत्स्वधर्ममहं पृष्टो भवद्भिर्ब्रह्मवादिभिः कस्मात्सम्य

कनविज्ञ्यां पुराणमृषिपूजितं पितृणां मानसी कन्या वासवी समपद्यत यापाना साच पितृभिर्मर्त्य
योनौ बभूव सा अरणीव हुताशस्य निमित्तं यस्य जन्मनः तस्यां जातो महायोगी व्यासो वेदवि
दांवरः तस्मै भगवते कृत्वा नमो व्यासाय वेधसे पुरुषाय पुराणाय भृगुवाक्यार्थवर्त्तिने मा
नुषब्रह्मरूपाय विष्णवे प्रभविष्णवे जातमात्रं वयं वेद उपतस्थे ससंग्रहः धर्ममेव पुरस्कृत्य
जातूकर्णादवाप्यतं मतिं मंथानमाविध्य येनासौ श्रुतिसागरात् प्रकाशं जनितो लोके महाभार
तचंद्रमाः वेदद्रुमश्च यं प्राप्य सशाखः समपद्यत भूमिकालगुणान्प्राप्य वहुशाखो यथाद्रु
मः तस्मादहमुपाकर्ण्य पुराणं ब्रह्मवादिनः सर्वज्ञाः सर्ववेदेषु पूजितो दीप्ततेजसः पुराणं
संप्रवक्ष्यामि यदुक्तं मातरिश्वना पृष्टेन मुनिभिः पूर्वं नैमिषेयैर्महात्मभिः महेश्वरः परोव्यक्तश्च
तुर्व्यूहः स्मृतः स्वयं अचिंत्यश्चाप्रमेयश्च स्वयंभूर्हरीश्वरः अव्यक्तं कारणं यत्तत्तस्मिन्स
दसदात्मकं महदादिविशेषांतं सृजतीति विनिश्चयः अंडं हिरण्मयं चैव वभूवाप्रतिमं त
तः अंडस्यावरणं वाद्भिरयामपि च तेजसा वायुनानंतनभसा नभो भूतादिना वृतम् भूता

ब्र॰
पु॰
३

द्विमहतश्चैवक्षयव्यक्तेनाहतोमहान् अंतर्भाववश्च देवस्य नामर्षीणांचोपवर्ण्यते: नदीनांपर्वतानां
चप्रादुर्भावोत्रशस्यते मन्वंतराणांसर्वेषांकल्पानांचोपवर्ण्यना कीर्तनंब्रह्मदत्रस्यब्रह्मजन्मच
कीर्त्यते अतोब्रह्मणःप्रजासर्गोपवर्णनं अवस्थाश्चात्रकीर्त्यंतेब्रह्मणोव्यक्तजन्मनः कल्पां
तानांवत्सरंचजगतःस्थापनंतथा शायनंचहरेरत्रपृथिव्युद्धरणंतथा सन्निवेशःपुरादीनां
वर्णाश्रमविभागशः वृक्षाणांग्रहनक्षत्राणां सिद्धीनांचविनाशनं योजनानांयथैवेवसंचरं
वकुविष्टरं स्वर्गस्थानुविभागंचमर्त्यानांशुभचारिणां वृक्षाणामोषधीनांचवीरुधांचप्रकी
श्री र्तनं वृक्षनारकिटवमर्त्यानांपरिकीर्तनं अंतादीनांनांचसर्जनंव्यजनंतथा प्रथमंसर्व
शास्त्राणांपुराणंब्रह्मणास्मृतं अनंतरंचवक्त्रेभ्योवेदास्तस्यविनिःसृताः अंगानिधर्मशास्त्रा
णिचव्रतानिनियमास्तथा पशूनांपुरुषाणांचसंभवःपरिकीर्तितः तथानिर्वचनंप्रोक्तंक
ल्पस्यचपरिग्रहः नवसर्गाःपुनःप्रोक्ताब्रह्मणोबुद्धिपूर्वकाः त्रयोन्येबुद्धिपूर्वास्तुततोलो
कानुकल्पयत् ब्रह्मणोवयवेभ्यश्चधर्मादीनामसंभवः येद्वादशप्रसूयंतेप्रजाकल्पेपुनः

पुनः कल्पयोरंतरं प्रोक्तं प्रतिसंधिश्च यस्तयोः तमोमात्रावृतत्वाच्च ब्रह्मणो मंत्रसंभवः त
थैव स्थानरूपाया ---- स्ततः परं प्रियव्रतोत्तानपादौ प्रसूत्याकूतयस्तथा कीर्त्य
ते धूतपाप्मानो ये त्रिलोका प्रतिष्ठिताः रुचेः प्रजापतेश्चाइ माकूत्यामिथुनोद्भवः प्रसूत्या
मपि दक्षस्य कन्यानां प्रभवस्ततः दाक्षायणीभवा पूर्वं श्रद्धाया यास्य महात्मनां धर्मस्य कीर्त्यते
सर्गः सात्विकस्तु शुभोदयः तथाधर्मस्य हिंसायां तामसोऽशुभलक्षणः महेश्वरस्य सत्यांच
प्रजासर्गः प्रकीर्तितः निरामयं च ब्रह्माणं तादृशं कीर्तनं पुनः योगं योगनिधिः प्राह द्विजा।
नां मुक्तकांक्षिणां अवतारस्य रुद्रस्य महाभाग्यं तथैव च त्रैवेदिक कथा चापि विवादः प
रमो महान् ब्रह्मनारायणाभ्यां च यत्र स्तोत्रं प्रकीर्तितं स्तुतस्ताभ्यां स देवेशस्तुष्टो भगवान्
शिवः प्रादुर्भावोऽथ रुद्रस्य ब्रह्मणोंगे महात्मनः कीर्त्यते नाम हंतुश्च यथा रोदीन्महामनाः
रुद्रादीनि यथा स्पष्टा नामानि यानि स्वयंभुवः यथा चैतैर्व्याप्तमिदं त्रैलोक्यं सचराचरं भृग्वा।
दीनां महर्षीणां च प्रजासर्गोपवर्णनं वसिष्ठस्य च ब्रह्मर्षेर्यत्र गोत्रानुकीर्तनं अग्नेः प्रजा।

ब्र॰
पु॰
४

याः संभूतिस्वारोचिषस्य संकीर्तिता पितॄणां द्विप्रकाराणां स्वधायास्तदनंतरं पितृवंशप्रसंगे च की।
र्त्यते च महेश्वरात् दक्षस्य शापः सत्यर्थे भृग्वादीनां च धीमतां प्रतिज्ञायस्य रुद्रस्य दक्षाद्द्भुत
कर्मणः प्रतिषेधश्च वैरस्य कीर्त्यते दोषमर्षणात् मन्वंतरप्रसंगेन कालज्ञानं च कीर्त्यते प्रजाप
तेः कर्दमस्य कन्यायाः शुभलक्षणा प्रियव्रतस्य पुत्राणां कीर्त्यते यत्र विस्तरः तेषां नियोगी द्वीपे
षु देशेषु च पृथक् पृथक् स्वायंभुवस्य सर्गश्च ततश्चाप्यनुकीर्त्तनं उक्तो नाभेर्निसर्गश्च रज
सश्च महात्मनः द्वीपानां ससमुद्राणां पर्वतानां च कीर्तना उक्तो नाभेर्निसर्गश्च रजसश्च महा
त्मनः वर्षाणां च नदीनां च तद्भेदानां च सर्वशः द्वीपभेदसहस्राणामंतर्भेदश्च सप्तसु विस्तरा
न्मंडलाश्चैव जंबूद्वीपसमुद्रयोः प्रमाणं योजनाग्रेण कीर्त्यते सह हिमवान् हेमकूटस्तु नि
षधो मेरुरेव च नीलः श्वेतश्च शृंगी च कीर्त्यते वर्षपर्वताः तेषामंतरविष्कंभा उच्छ्रायायाम
विस्तराः कीर्त्यंते योजनाग्रेण ये च तत्र निवासिनः भारतादीनि वर्षाणि नदीभिः पर्वतैस्त
था भूतैश्चोपनिविष्टानि गतिमद्भिर्ध्रुवैस्तथा जंबूद्वीपादयो द्वीपाः समुद्रैः सप्तभिर्वृताः

धवायु॰
४

सप्ताप्यमयी भूमिर्लोकालोकश्च कीर्त्यते अंडस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी भूरा
दयश्च कीर्त्यन्ते वस्मै प्राकृतैः सह सर्वं चाव्यप्रधानस्य परिमाणैकदेशका सप्ता सपरिमाणेन।
च संक्षेपेण वृकीर्त्यते सूर्याचन्द्रमसोश्चैव पृथिव्याश्चाप्यतो ऽथ यत् प्रमाणयोजनाग्रेण सां
प्रतैरभिमानिभिः महेन्द्राया सभा शुभ्ता मानसोत्तरमूर्द्धनि अत ऊर्द्धं ततश्चोक्ताः स्वर्गस्था।
लातवक्रवत् नागवीथ्यजवीथ्योश्च लक्षणं परिकीर्त्यते काष्ठयोर्लेखयोश्चैव मंडलानां
च योजनैः लोकालोकस्य संसंध्याया अह्नो व्युष्टस्य लोकपालास्थिताश्चोर्द्धं की।
र्त्यन्ते चतुर्दश पितृणां देवतानां च पन्थानौ दक्षिणोत्तरौ गृहीणां न्यासिनां चोक्तौ रजः
सत्वसमाश्रयात् कीर्त्यते च पदं विष्णोर्धर्माद्यायत्र धिष्ठिताः सूर्याचंद्रमसोश्चारो ग्रहा।
णां ज्योतिषां तथा कीर्त्यते ध्रुवसामर्थ्यात् प्रजानां च शुभाशुभं ब्रह्मणा निर्मितः सौरस्य
दनार्थं व्यवस्थया कीर्त्यते भगवान्येन प्रसर्पति दिवक्षयः सरथोधिष्ठितो देवैरादित्यैर्ऋषि
भिस्तथा वृद्धिह्रासौ च सोमस्य कीर्त्यते सूर्यकारितौ सूर्यादीनां स्यंदनानां ध्रुवादेव प्रकी
र्त्तनं

वा.पु. ५

कीर्त्तिशिशुमारस्ययस्यपुछेध्रुवस्थितः नागाह्वयानिसर्वाणिनक्षत्राणिग्रहैःसह निवासायत्रकी
र्त्यन्तेदेवानांपुण्यकारिणां सूर्यरश्मिसहस्रंचवर्षशीतोष्णनिश्रवः प्रतिभागस्तुरश्मीनांना
मतःकर्मतोर्थतः परिमाणंगतिश्चोक्ताग्रहाणांसूर्यसंश्रयात् यथाचाप्सुविभाव्यन्तेमात्राभिःश्रीक
ण्ठस्यनीलता ब्रह्मप्रसादितस्यापिविषादःशूलपाणिनः स्तुयमानसुरैर्दिष्टःस्तौतिदेवम
हेश्वरं लिंगोद्भवकथापुण्यासर्वपापप्रणाशनी विश्वरूपात्प्रधानस्यपरिणामोयमद्भुतः पु
रूरवसःपैडस्यमाहात्म्यान्प्रकीर्त्तिते पितृणांद्विप्रकाराणांश्राद्धेनानुग्रहोमहान् युगसंख्या
प्रमाणंचकीर्त्यतेचकृतयुगे त्रेतायुगेचापकर्षाद्वित्तीयाःसंप्रवर्त्तते वर्णानामाश्रमाणांचसं
स्थितिधर्मतत्त्वया यज्ञप्रवर्त्तनेचैवसंवादोयत्रकीर्त्यते ऋषीणांवसुमांईचसोप्यधःग
पुनर्गतिः शाखानांउर्ध्वेचतुचसायनेवसतेमनु प्रसंगात्तपसश्चोनामागावस्याश्चकृ शः
द्वापरस्यकलेश्चात्रसंक्षेपेणप्रकीर्त्तनं देवतिर्यग्मनुष्याणांप्रमाणानियुगेयुगे कीर्त्यते
युगसामर्थ्यापरिणाहोवयायुषां शिष्टादीनांचनिर्देशप्रादुर्भावविश्वकीर्त्यते मंत्राणांब्रा

वायु. ५

ह्मणानां च लक्षणं परिकीर्त्तितं ईश्वराणां ऋषीणां च मनोः पितृगणस्य च नष्टाकं विराट्
ऊमित्युक्तं च समासतः मन्वंतरस्य संख्या च मानुषेण प्रकीर्त्तिता मन्वंतराणां सर्वेषामेतदे
व च लक्षणं अतीतानागतानां च वर्त्तमानेन कीर्त्यते तथा मन्वंतराणां च सति संधानलक्ष
णं अतीतानागतानां च प्रोक्तं स्वायंभुवेंतरे मन्वंतरत्रयं चैव काललक्षणे च कीर्त्यते मन्वंत
रेषु देवानां प्रजेशानां च कीर्त्तनं दक्षस्य चापि दौहित्र्याः प्रियायाः दुहितुः सुतः ब्रह्मादिभि
स्तेजनिता दक्षेणैव च धीमता सावर्ण्या यत्र कीर्त्त्यंते मनवो मेरुमाश्रिताः ध्रुवस्योत्तान
पादस्य प्रजा सर्गोपवर्णनं पृथुनावायिवैन्येन नूमे दोह प्रवर्त्तने पात्राणां पयसां चैव वं
शानां च विशेषणं ब्रह्मादिभिः पूर्वमेव दुग्धा चेयं वसुंधरा दशभ्यस्तु प्रचेताभ्यो मारि
षायां च प्रजापतेः दक्षस्य कीर्त्यते जन्म सोमस्यांशेन धीमतः भूतभव्यभवेशानां महेंद्राणां च।
कीर्त्तते मन्वादिको भविष्यंति आख्यानैर्बहुभिर्वृतः वैवस्वतस्य च मनोः कीर्त्यते सर्गवि
स्तरः देवस्य महतो जज्ञे वारुणीं विचतस्तनं ब्रह्मशुक्रात्समुत्पत्तिभृग्वादीनां च कीर्त्यते

विनिवृत्तेप्रजासर्गेचाक्षुषस्यमनोःशुभे दक्षस्यकीर्त्यतेसर्गोध्यानाद्वैवस्वतेंतरे नारदःप्रियसंवा

६ दाद्दक्षपुत्रान्महाबलान् नाशयामासशापायचात्मनोब्रह्मणःसुतः ततोदक्षोसृज- न्यावै

रिण्यामेवविश्रुताः कीर्त्यतेधर्मसर्गश्चकश्यपस्यचधीमतः अतऊर्द्ध्वंब्रह्मणश्चविस्तरोग्नेर्भवस्य

च एकत्वंचपृथक्त्वंचविशेषत्वंचकीर्त्यते दृष्टात्वाच्चयथाशापाज्जायादेवाःस्वयंभुवा म

रुत्प्रमादोमरुतःदित्यादेवाश्चसंभवः कीर्त्यतेमरुतांचापगणाःसप्तसप्तकाः देवत्वंपि

तवाकेनवापुस्कंधेनवाश्रयाः दैत्यानांदानवानांचगंधर्वोरगरक्षसां सर्वभूतपिशा

चानांपशूनांपक्षीवीरुधां उत्पत्तिश्चाप्सरसांकीर्त्यतेबहुविस्तरा मार्तांडसंयोगकृतंजन्मै

रावतहस्तिनः वैनतेयसमुत्पत्तिस्तथाचास्याभिषेचनं भृगूणांविस्तरश्चोक्तःकाव्यस्यचांगि

रसामपि कश्यपस्यपुलस्त्यस्यतथैवात्रेर्महात्मनः पराशरस्यचमुनेःप्रजानायस्यविस्तरः

देवतानामृषीणांचप्रजोत्पत्तिस्ततःपरं तिस्रःकन्याप्रकीर्त्यंतेयासुलोकाःप्रतिष्ठिताः वायु·

पितृदौहित्रनिर्देशोदेवानांजन्मवाच्यते विस्तरंतेभगवतःपंचास्यमहात्मनो हत्वाया॥ ६

विस्तरस्योक्त्वादित्यस्य ततः परं विकुक्षिचरितं चोक्तं पृथोश्चैव निबर्हणं बृहद्बलान्तसंदेया।
दिक्ष्वाख्याका याः प्रकीर्त्तिताः निम्याद्दीनां क्षितीशानां यावज्जन्मनणादिति कीर्त्यते विस्तरायस्य
यातिपरिभूपतेः यदुवंशास्समुद्देशो हैहयस्य च विस्तरः क्रोष्टानंतरं वोक्तस्तथा वंशस्य विस्त
रः यामेयस्य च महात्म्यं प्रजासर्गश्च कीर्त्यते देवावृधस्य तत्कंस्य विस्तोस्सैव महात्मनः की
र्त्यते चान्वयः श्रीमाद्राजर्षेर्देवमिठुषः पुनश्च जन्म चाप्युक्तं चरितं च महात्मनः कंयस्य चा
पि दैरात्म्यं प्रकाश्यास्तमुद्भवः वसुदेवस्य देवक्यां विस्तोर्जन्मप्रजायते विस्तोरनंतरं चापि प्रजा
सर्गोपवर्णनं देवासुरे समुत्पन्ने विस्तुनास्त्रीवपुर्हते संकेपताशाक्रवधं घ्नायः शापः पुरान्मगोः
भृगुश्चोम्याययामास दिव्यां शुक्रस्य मानवम् देवानामसुराणां च संग्रामो द्वादशाद्भुताः नार
सिंहप्रभृतयः कीर्त्यते शापेनाशनाशमाः शुक्रेणाराधनं स्यानो घोरेणातपसा कृतं वरप्रदा
न प्रलब्धश्चेनयत्रशार्वस्तुतः कृतः सुवंतरे विनिद्दिष्टे देवः सुरविचेष्टिते जयत्यासतस्तु शुक्रे
नयत्र शुक्रे महात्मनि असुरान्मोहयामास शुक्ररूपेण बुद्धिमान् भृहस्पतिस्तुतान् शुक्रः

शशापयदुमहाद्युतिः उक्तं च विस्रुमाहात्म्यं विस्नोर्जन्मादिश्रावृतं तुर्वसुः शुक्रदौहित्रः देवयान्यां
१ यदोरभूत् अनुद्रुह्युस्तथा पूरुर्ययातिस्तनयान्नृपाः अत्र वंशानुमहात्मानां लोकानां पार्थिवसत्तमाः की
र्त्यन्ते यत्र कालेन भूरिद्रविणतेजसः सिजस्य च विप्रर्षेः सम्यग्बोधर्मसंश्रयाः वार्हस्पत्यं तु यत्र भितः
यत्र शापमिहानुदत्त अनुद्रुहास्तथाह कीर्तनं जह्नुवंशस्य शंतनोर्वीर्यश्रावृतं भविष्यतां
तथा राज्ञामुपसंहारश्रावृतं अनागतानां मानां मनूनाञ्चोपवर्णनं भोमस्यांते कलौ युगे क्षीणे
संहारश्रावृतं परार्धपरयोश्च वलत्वं गणपरिकीर्तितं ब्रह्मणो योजनाग्रेण परिणमविति संयुः
नैमित्तिकः प्राकृतिक एवात्यन्तिकस्ततः त्रिविधः सर्वभूतानां कीर्त्यते प्रतिसंचरः अनावृष्टिभी
स्कराच्चघोरसंवर्तकोनलः मेघो ह्येकार्णवं वपुःसलधारात्रिमहात्मनः संख्योलक्षणमुहिष्टं त
ताश्रस्या विशेषतः भूरादीनां च लोकानां समानाममुपवर्णनं कीर्त्यते चात्रभिरयाः पापानां रौरवाद
यः ब्रह्मलोकापरिष्टात्तु शिवस्य स्थानमुत्तमं यत्र संहारमायाति सर्वभूतानि संख्यये सर्वेषां वायु
चैव सत्वानां परिमाणविनिर्मयः ब्रह्मणः प्रतिसंसर्गे सर्वसंहारवर्णनं अष्टद्रष्यमनःप्रोक्तं ७

प्राणस्याहंकमेवच गतिश्चोर्द्धमधश्चोक्ताधर्माधर्मसमाश्रयात् कल्पेकल्पेचभूतानांमहता
मपिसंक्षयः प्रसंख्यायचदुःखानिब्रह्मणश्चाप्यनित्यता दोषान्मुचैवभोगानांयद्विराणमवि।
निर्णयः दुर्लभत्वंचमोक्षस्यवैराग्याद्दोषदर्शनं व्यक्ताव्यक्तेपरित्यज्यसत्वब्रह्मणिसंस्थि
तं नानात्वदर्शनाच्छुद्धंततस्तदतिवर्त्तते ततस्तापत्रयातीतोनिरूपाख्योनिरंजनः आनंदो।
ब्रह्मणःप्रोक्ताभेतिभेतिकृतस्त्वनः कीर्त्तितेचयुतसर्गोब्रह्मणोन्यस्यपूर्ववत् कीर्त्यतेचऋषि
शाख्याःसर्वपापप्रणाशनं इतिकृतयसमुद्दिष्टःपुराणेस्मिन्यवर्णिते कीर्त्तितेजगतोस्यात्र
सर्वप्रलयविक्रियाः प्रवृत्तयश्चभूतानांनिवृत्तानापफलानिच प्रादुर्भावोवसिष्ठस्यशक्तेर्जन्म
तथैवच शौसादातिग्रहस्तस्यविश्वामित्रकृतेनच पराशरस्यचोत्पत्तिरदृश्यंतीयथाविभोः
जज्ञेपितृणांकन्यायांव्यासस्यापिमहामुनिः शुकस्यचयथाजन्मसहपुत्रस्यधीमतः पाराश
रस्यपदेसाद्विश्वामित्रकृतायथा वसिष्ठसंभ्रतस्याग्निविश्वामित्रजिघांसया संतानहेतो।
विभुनाचीर्णस्कंदेनधीमता देवेनविधिनाविप्राविप्राविश्वामित्रहितेनिपुणः एकश्चेदंच

८

तस्मात्संचक्ष्व तद्देव पुनरीश्वरः यथा विभेद भगवान्व्यासः सर्वादनुग्रहात् तस्य शिष्यप्रशिष्यैश्च
शाखाभेदाः पुनः कृताः प्रयोगे षट्सु लिपेषु यथा ह्रस्वयंभुवा दृष्टेन चानुशास्त्रेण मुनयो
धर्मकांक्षिणः देशं पुण्यमभीप्सन्तो विभुना ते हि नैमिषिणास्तेना भदिव्यं रूपाच्चैं सव्यासं शुभ
विक्रमं अनौपम्यमिदं चक्रं वर्तमानमतन्द्रिताः पृष्ठतो यात नियता लप्स्यध्वं यद्धितं ग
वतो धर्मचक्रस्य यत्र नेमिर्विशीर्यत पुण्यः स देशो मन्तव्य इत्युवाच तदा प्रभुः उक्त्वा चैवा
मर्षीन्ब्रह्मा पद्दृश्यत्वमगात्पुनः गंगागर्भं समाहारं नैमिषं यत्त्वमेव च ईजिरे चैव सत्रेण मु
नयो नैमिषे तदा मृते च शरद्वति तस्यात तस्य चोत्थापनं कृतं ऋषयो नैमिषायास्ते अद्यया पर
याः पुनः निमोमां नामिमां कृत्वा कृत्स्नं राजानमाहरन् यथाविधि यथा शास्त्रं तथा तिथ्यं
रपूजयन् प्रीतं चैव कृतातिथ्यं राजानं विधिवत्तदा अन्तर्धानगतः क्रूरः स्वर्भानुः सुहतो हरत्

वायु

अनसक्तं हिततानपि नयमेडयथापुरा गंधर्वासहितं दृष्ट्वा कलाय ग्रामवासिनां स्मिनि यातत.
नस्तस्य यथायज्ञेमहर्षिभिः दृष्ट्वा हिरण्मयं सर्वं यज्ञे वस्तु महात्मना तदावैनैमिषेयाणा

८

सत्रे द्वादशवार्षिके यथा विवदमानस्तु पैलः संस्थापितस्तैः जनयित्वाच्चरणं तेपैलश्चत्रं
यथाशुभं समाययित्वा ततस्तत्र माशुभपर्युपासते यतस्सर्वं यथावृत्तं व्याख्याति द्विजसत्त
माः ऋषीणां परमं चात्र लोकतत्त्वमनुत्तमं ब्रह्मणा यत्पुरा प्रोक्तं पुराणं ज्ञानमुत्तमं श्रव
तारश्च रुद्रस्य द्विजानुग्रहकारणात् तथायायाश्च पुनायोगा स्थानानां चैव कीर्तनं लीलोद्भ
वस्य देवस्य नीलकंठत्वमेव च कथ्यते यत्र विप्राणां वायुना ब्रह्मवादिना धर्म्यं यशस्यमायु
ष्यं सर्वपापप्रणाशनं कीर्तनं श्रवणं चास्य धारणं च विशेषतः अनेन हि क्रमेणेदं पुराणं
संप्रचक्ष्यते हयमर्थं समासेन महानप्य यत्लभ्यते तस्मात्समारम्भाद्दिश्य यथावद्वक्ष्यामि
विस्तरं पादमाद्यदिदं सम्यक्योऽधीयीत जितेन्द्रियः तेनाधीतं पुराणं स्यात्सर्वं नात्र संशयः
यो विद्याच्चतुरो वेदान् सांगोपनिषदो द्विजः न वेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः इ
तिहासपुराणाभ्यां वेदं समुपबृंहयेत् बिभेत्यल्पश्रुताद्वेदो मामयं प्रचरिष्यति अन्यासन्नि
ममध्यायं साक्षात्प्रोक्तं स्वयंभुवा आपदं प्राप्य मुच्येत यथेष्टां प्राप्नुयाद्गतिं यस्मात्पुराह्य

६

णं तीदं पुराणं तेन न स्मृतं निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते नारायणः सर्वमिदं विश्वं व्याप्य प्र
वर्त्तते तस्यापि जगतः स्रष्टा स्रष्टा देवो महेश्वरः एवं समुद्देशमिमं शृणुध्वं महेश्वरः सर्वमिदं पुरा
णं ससर्ग काले च करोति सर्गं संहारकाले पुनराददीत ॥ इति श्रीवायुप्रोक्ते महापुराणे अनुक्रमणि
काध्यायः ॥ ऋषय ऊचुः ॥ पप्रच्छुस्ते मुनिं सूतमृषयस्ते तपोधनाः कुत्र सत्रं समभवत्तेषामद्भुतक
र्मणां कियत्कालं चैव तत्कालं कथं च समवर्त्तत आगतश्च पुराणं च कथं तेभ्यः प्रभंजनः आचक्ष्व
विस्तरेणेदं परं कौतूहलं हि नः इति संचोदितः सूतः प्रत्युवाच शुभं वचः सूत उवाच शृणुध्वं
यत्र ते धीरा ईजिरे सत्रमुत्तमं यावन्तं च भवेत्कालं यथा च समवर्त्तत सिसृक्षमाणा विश्वं हि य
त्र विश्वसृजः पुरा सत्रं हि ईजिरे पुण्यं सहस्रं परिवत्सरान् तपो गृहपतिर्यत्र ब्रह्मा ब्रह्माभव
त्स्वयं इडायाय यत्र पत्नीत्वं शामित्रं यत्र बुद्धिमान् मृत्युश्चक्रे महातेजास्तस्मिन्सत्रे महात्मनां

वायु

विबुधा ईजिरे तत्र सहस्रं परिवत्सरान् भ्रमतो धर्मचक्रस्य यत्र नेमिरशीर्यत कर्मणा तेन विख्या

६

तं नैमिषं मुनिपूजितं यत्र सा गोमती पुण्या सिद्धचारणसेविता रोहिणी सरुद्रवत्तत्र ततः सा।

गोमतीभवेन प्राज्ञि ज्येष्ठासमभवन्वसिष्ठस्य महात्मनः अरुंधत्यासुतायत्र शक्तिसुत्तमतेज
पादोत्तरसः कल्माषपातियत्रशामश्च शक्तिणा यत्रैवैरसमभवद्विश्वामित्रवसिष्ठयोः अदृश्यंत्यासमभ
वन्मुनिर्यत्रपराशरः पराभवोवसिष्ठस्य यस्मिन्नजानेषवर्तते नत्रतेऽजिरेसत्रंनैमिषेब्रह्मवादिनः
नैमिषेईजिरेतत्रनैमिषेयास्ततःस्मृताः तत्सत्रेसमभवत्तेषांममाहाद्दशाधीमता कुरुरवमिवा
क्रांतेप्रशशासवसुंधरां अष्टादशसमुद्रस्यद्वीपानामष्ठपुरुरवाः ऊनोपनेवरत्नानांलोभाद्विति
नः श्रुतं उर्वसीचकमेयंचदेवहूतप्रमोदितं आजहारच तत्सत्रसर्वस्यासहसंगमः तस्मि
नरपतीनत्रनैमिषेयाप्रचक्रिरेयंगर्भस्तुवेगंगापावकाद्दीमतेजसं उल्वयवतेन्यस्तंहि
रण्यस्वन्यपयतं हिरण्मयंयतश्चक्रे यज्ञवाटंमहात्मनो विश्वकर्मास्वयंदेवोभावनंलोकभा
वनं वृहस्पतिस्ततःसत्रेतेषाममिततेजसः ऐडः पुरुरवामेजेतंदेशंमृगयाचरं नातरक्षी
महद्दाश्चर्ययत्रवाटंहिरण्मयं लोभेनहृतविज्ञानस्तदादातुंप्रचक्रमे नैमिषेयास्ततस्त
तत्स्यचुक्रुधुर्नयतेभृशं निजघ्नुश्चापिसंक्रुद्धाकुशवज्रैमनीषिणः ततोनिशांतेराजा

१०

नंमुनयो देवनोदिताः कुशावर्त्तैर्विनिक्षिप्तः स राजा व्रजहातनुं वंशेयं ततस्तस्य
पुत्रं चक्रे नृपं भुवि नघुषस्य महात्मानं पितरं ये प्रवक्षते सतेषु वर्त्तते सम्यक् धर्मशी
लो महीपतिः आयुराषुरवाप्याग्रे तस्मिन्स नरसत्तमः सान्त्वयित्वा च राजानं ततो ब्रह्म
विदां वरः सत्रसारोभिरकर्त्तुं यथावद्धर्मतत्त्वये वभूव सत्र तत्रैषां बह्वाश्चर्यं महात्म
ना विश्वसित्त्वेह मानानां पुरा विश्वसृजामिवा वेषां तैसप्रियसखे वीजि विल्लैः परीवृतैः
अन्येश्च मुनिभिर्जुष्टं सर्वं वैश्वानरप्रभैः पितृदेवाप्सरःसिद्धैर्गंधर्वैरुरगचारणैः सभारैस्तु
शुभैर्जुष्टं तैरेवेड्य सदा यथा स्तोत्रशास्त्रगृहै देवान्पितॄन् पित्र्यैश्च कर्मभिः आनर्चुश्च यथा जा
तिं गंधर्वादीनयथाविधि आरयध तमि बन्तः ततः कर्म्मान्तरेष्वथा जगुः सामानि गंधर्वान
नृत्यश्चाप्सरोगणाः व्याजहुर्मुनयो वाचं चित्रां ह्यक्षरपदां शुभां मंत्रादितन्वविद्वांसो जगादु
श्च परस्परं वेतण्डावचनाश्चैके निघ्नन्तु प्रतिवादिनः ऋषयस्तत्र विद्वांसः सांख्यार्थान्यायको
विदाः नवत्र दुरितं किंचिद्देद धुत्र ह्मरादृसाः नचयज्ञहनो दैत्या नचयज्ञमुखो ह्वराः प्राय

वायु
१०

स्थितं तु विश्वं वा न तत्र समजायत शक्तिप्रयुक्ता क्रियायोगो विधिरासीन्महानुष्ठितः पूर्वं विनिर्निरेसतं तदा।
दशाष्टमनीषिभिः भगवान्यामद्विजो धीराज्योतिष्टोमान्पृथक्पृथक् चक्रिरे प्रष्टुमना स्वव
नियुतदक्षिणान् समाप्तयज्ञास्ते सर्वे वायुमेव महाधियं पप्रच्छुरमितात्मानं भवद्भिर्यदेह हि द्विजाः
प्रनोदितस्तु वंशार्थं स च तानब्रवीत्प्रभुः शिष्यः स्वयंभुवो देवः सर्वप्रत्यक्षदृग्वशी अणिमादि
भिरष्टाभिरैश्वर्यैः समन्वितः तिर्यग्योन्यादिभिर्धर्मैः सर्वलोकान्बिभर्ति यः सप्तस्कंधादिकं
शश्वत्सर्वतेयो जनाद्वहः विभ्रये विभ्रयता यस्य संस्थिताः सप्तकारणाः ब्रह्मांस्य याणं भूता।
नां ऊर्ध्वं न्यत्र महाबलः तेजसश्चाप्युपधाने दधाति मशरीरिणा प्राणयादृत्तयः पंचकरणा
नां च वृत्तिभिः प्रेर्यमाणा शरीराणां कुर्वते या सधारणे आकाशयोनिर्द्विगुणः स्पर्शसमं
ततः तेजसः प्रकृतिश्चोक्तोप्ययं भावो मनीषिभिः तत्रातिमानी भगवान्वायुश्चातिक्रियात्म
कः वानारणि समाख्यातः शब्दः शास्त्रविशारदो भारत्या श्लक्ष्णयन्सर्वान्मुनीन्प्रहादयं नि।
व पुराणज्ञस्तमनसः पुराणं श्रेयमुक्तया ॥ इति श्रीमहापुराणे वायुप्रोक्ते ५ सूत उ महेश्वरायोत्ते

११

मवीर्यकर्मणेरुरर्घभायामितबुद्धितेजसे सहस्रसूर्यानलवर्च्चसे नमस्त्रिलोकसंहारविसृष्टये ऽनः
प्रजापतीन्लोकनमस्कृतांस्तथा स्वयंभुरुद्रःप्रभृतीन्महेश्वरं भृगुंमरीचिंपरमेष्ठिनंमनुंमनंअं
त्तमेधर्मयज्यापिकश्यपं वसिष्ठदक्षात्रिपुलस्त्यकर्दमं रुचिं विवस्वतमयापिवक्रतुं स्वनितं
पैवांगिरसंप्रजापतिंप्रणम्यमूर्ध्ना पुलहंचभावतः तथैववज्रक्रोधतमेकविंशतिप्रजाविवृद्धौ
पितकार्यशासनांपुरातनानन्यपराश्चशाश्वतांस्तथैववान्यान्सगणानवस्थितान् नमू।
श्चसर्वानखिलानवस्थितांस्तथैवचान्यानपिधर्मशोभितः मुनीन्द्रहस्पतिःशनःपुराणमा
नयःशुभाचारनीधीन्दयान्वितानां प्रणम्यवक्ष्येकिलयापनाशनीप्रजापतेश्शृष्टिमिमामनुत्त
मा सुरेशादेवर्षिगणैरलंकृतां शुभामनुल्यामममदाभिषिप्रियां प्रजापतेर्नामपिचोत्वणा
र्चिषाविष्णुइवाग्बुद्धिशरीरतेजसा तयोभूतांब्रह्मदिनादिकालिकांप्रभूतमाविकृतपौरु
षंस्त्रियां स्मतोस्मतोचप्रसूतामुदाकृतामयापुराणमतिलःप्रकीर्तितां समासवंधैर्नियतं वायु
यंप्यातपंविशाहृनेनापिमनःप्रहर्षिणी यस्याचबधाप्रथमाष्टवृत्तिप्रधानिकीचेश्वरकालिका ११

नाच यत्नस्तत्तं कारणमप्रमेयं ब्रह्मप्रधानं प्रकृतिप्रसूतिः आत्मा गुहा योनिरथापि चक्षुः क्षेत्रं तथै
वामृतमक्षरं च शुक्रं प्रयः सत्यमतिप्रकाशं तत्क्षिप्तिनित्यं पुरुषं द्वितीयं तदप्रमेयं पुरुषेण युक्तं
स्वयंभुवा लोकपितामहेन उत्पादकत्वाऽजसातिरेकान्कालस्य योगानि यमाश्रयेभ्य सूत्रस्य
क्षान्नियतान्विकारान्लोकस्य संतानविवृद्धिहेतुं प्रकृत्यवस्थासु भवेत्यथाणीमसकल्पमात्रेणम
हेश्वरस्य देवासुराश्चीडमसागराणां गंधर्वयक्षोरुगमानुषाणां मनुप्रजेशर्षिपितृद्विजानां पि
शाचयक्षोरगराक्षसानां ताराग्रहर्क्षं देनिशावरणां मासर्त्तुसंवत्सरराज्यहानां दिक्कालयो
गादिव्युगायनानां नाप्योवधीनामपि वीरुधानं जलोकसामप्सरसां पशूनां वियत्स्तान्निवविहंग
मानां वनस्पतीनां यद्भविष्यद्वियस्यं यस्थावरं यदस्थि किंचित् सर्वस्य तस्याखिलगतिर्विभक्तिरेव
स्मणो यावदियं प्रसूतिः छंदांसि वेदास्सरुचो यजूंषि सामानि सोमश्च तथैव यज्ञः आजीव्यमेषां य
दिनीप्सितं च देवस्य तस्यैव विवेप्रजानां वैवस्वतस्यास्य मनोः पुरस्तात्संभूतिरुक्ता प्रसवश्च तेषां।
येषामिदं पुण्यकृतां प्रसत्या लोकत्रयं लोकनमस्कृतान्याः हरेश्च देवर्षिमनुप्रधाना माहरिता

१२ चापिविभूषणंच रुद्रस्यशापान्मुनेरुद्भवश्च दक्षस्यचाप्यत्रमनुष्यलोके वासस्थितौवानियमाद्भव
स्यदक्षस्यचात्रप्रतिष्ठापलाभः मन्वन्तराणांपरिवर्तनानियुगेषुसंभूतिविकल्पनेच ऋषित्वमा
र्षस्यचसंप्रवृत्तिर्यथायुगादिष्वपिवेत्तिदत्रा येद्वापरेभुग्रप्रथयेतिवेदान्व्यासाश्चतत्रक्रमशोति
बह्वाः कल्पस्यसंख्याभुवनस्यसंख्याः ब्राह्मस्यचाप्यत्रदिनस्यसंख्या ग्रंडोद्भिजस्वेदजसमु
जानांधर्मात्मनांस्वर्गनिवासिनांच येयातनस्थानगतानश्चजीवास्तथैनतेषामपिचप्रमाणं श्रा
व्यंतितः प्राकृतिकश्चयोगंनैमित्तिकस्यप्रतिसर्गहेतुः वंधस्यमोक्षस्यविधिश्चयत्रप्रोक्ताचसं
सारगतिःपरंच प्रकृत्यवस्थानुचकारणेषुर्याचस्थितिर्याचपुनःप्रवृत्तिः तत्क्षाहभञ्जास्त्वमति
प्रयत्नास्समलमाविकुतधीधृतिभ्यः विप्राश्चऋषिभ्यसमंदाकृतंयथयथातथ्यंतकृणतोच्यमा
नं ॥ ॥ इतिश्रीवायुपुराणेप्रक्रियापादितृतीयः ॥ ऋषयऊचुः रूपयस्तुततःश्रुत्वानैमिषा
रण्यवासिनः प्रत्युचुस्ततस्सर्वेसूतंपर्याकुलेक्षणाः भवान्वैवंशकुशलोव्यासात्प्रत्यक्षदर्शना
त् तस्माच्चभवतंकृत्स्नंलोकस्यमस्यवर्णय यस्ययस्यान्वयायेयेतांस्तानिक्ष्वामिवेदितुं तेषां॥

वर्षितस्तहिंचविश्रांतोप्रजायते: असकृत्परिपृष्टस्तैर्महात्मालोमहर्षणः विस्तरेणानुपूर्व्याच
कथयामाससत्तमः सूतउ स्पष्टांचैतांकथांदिव्यांप्रशस्तांपापनाशनीं कथ्यमानांमयाचित्रां
बहुर्थांश्रुतिसंमतां यस्त्विमांधारयेन्नित्यंशृणुयाद्वाप्यभी — क्ष्णशः श्रावयेद्वापिविप्रेभ्योयतिभ्य
श्चविशेषतः शुचिःपर्वसुयुक्तात्मातीर्थेष्वायतनेषुच दीर्घमायुरवाप्नोतिसपुराणानु
कीर्त्तनात् स्वयंशाथारणेकृत्वास्वर्गलोकेमहीयते विस्तरावयवंतेषांयथावत्तंयथाश्रुतं
कीर्त्यमानंनिबोधध्वंसर्वेषांकीर्त्तिवर्धनं कीर्त्तनंस्थिरकीर्त्तीनांसर्वेषांपुण्यकारिणां सर्गश्च
प्रतिसर्गश्चवंशामन्वंतराणिचवंशानुचरितंचेतिपुराणंपंचलक्षणं कलोभ्योपिरियः कल्पः
शुचिभ्योनियतःशुचिः पुराणंसंप्रवक्ष्यामिब्रह्मांडंवेदसंमतं पूर्वेपकल्पयस्त्रैवस्थितिकाल
त्तिरेवच प्रक्रियाप्रथमःपादःकथावस्तुपरिग्रहः उपोद्घातोनुषंगश्चउपसंहारएवच धर्म्म
यशस्यमायुष्यंसर्वपापप्रणाशनं एवंहिपादाश्चत्वारःसमासात्कीर्तितामया वक्ष्याम्येतान्पु
नस्तांस्तुविस्तरेणयथाक्रमं नमस्कृत्यहिरण्यगर्भायपुरुषायेश्वरायच अजायप्रथमायैववशि

२

क्षाय प्रजात्मने ब्रह्मणो लोककर्त्रे नारायण नमस्कृत्वा स्वयंभुवे महदाद्यं विशेषांतं सवैरूप्यं सलक्षणं
पंचप्रमाणं षट्स्रोतं पुरुषाधिष्ठितं च तत् असंशयात्प्रवक्ष्यामि भूतसर्गमसंशय अव्यक्तं कार
णं यत्तु नित्यं सदसदात्मकं प्रधानं प्रकृतिं चैव यमाहुस्तत्वचिंतकाः गंधवर्णरसैर्हीनं शब्द
स्पर्शविवर्जितं अजरं ध्रुवमक्षय्यं नित्यं स्वात्मन्यवस्थितं जगद्योनिं महद्भूतं परं ब्रह्म सनात
नं विग्रहः सर्वभूतानामव्यक्तमभवत्किल अनाद्यंतमजं सूक्ष्मं त्रिगुणं प्रभवाव्ययं असांप्रत
मविज्ञेयं ब्रह्माग्रे समवर्तत तस्यात्मना सर्वमिदं व्याप्तं त्वासीत्तमोमयं गुणसाम्ये तदा तस्मिन्गु
णभावे तमोमये सर्गकाले प्रधानस्य क्षेत्रज्ञाधिष्ठितस्य वै गुणभावाद्व्यज्यमाने महान्प्रादु
र्बभूव ह सूक्ष्मेन महता सो च अव्यक्तेन समावृतः सत्वोद्रिक्तो महानग्रे सत्वमात्रं प्रकाश
कं मनो महांश्च विज्ञेय यय एतत्कारणं स्मृतं लिंगमात्रं समुत्पन्नं क्षेत्रज्ञाधितस्य यस्मृतः धर्मा
दीनां रूपाणां लोकतत्वार्थहेतवः महान्सृष्टिं कुरुते वा यमानः सिसृक्षया मनो महान्मति
ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः प्रज्ञा चितिः स्मृतिः संवित्विपुरं वोच्यते बुधैः मनुते सर्वभूतानां यस्मा

वायु
२२

च्चेष्टाफलेविभुः सोल्पत्वेनविगुडानांतेनतन्मनउच्यते तत्वामामप्रयोयस्मान्महांश्चपरिणाम
तः शेषेभ्योगुणतत्वेभ्योमहानितिततस्मृतः विभर्त्तिमानंमनुतेविभागंमन्यतेपिच पुरुषो
पभोगसंबधातेनचासौमतिस्मृतः बृहत्वाद्बृंहणत्वाच्चभावानांसलिलाश्रयात् तस्माद्बृंहयते
भावान्ब्रह्मातेननिरुच्यते आपूरयित्वायस्माच्चकृत्स्नान्देहाननुग्रहैः तत्वभावांश्चनियता
स्तेनपूरितिचोच्यते बुध्यतेपुरुषश्चात्रसर्वभावान्हिताहितान् यस्माद्बोधयतेचैवतेन
बुद्धिर्निरुच्यते ख्यातिप्रत्युपभोगश्चयस्मात्संवर्ततेततः भोगस्यज्ञाननिष्ठत्वात्तेनख्याति
रितिस्मृतः ख्यायतेतद्गुणैर्वापिनामादिभिरनेकशः तस्माच्चमहतःसंज्ञाख्यातिरित्य
भिधीयते साक्षात्सर्वंविजानातिमहात्मातेनचेश्वरः यस्माज्जातंगृहंचैवप्रज्ञातेनसउच्य
ते ज्ञानादीनितरूपाणिक्रतुकर्मफलानिच चिनोतियस्माद्भोगार्थंतेनसौचितिरुच्यते व
र्त्तमानान्यतीतानितथैवानागतान्यपि स्मरतेसर्वकार्याणितेनासौस्मृतिरुच्यते कृत्स्नंच
विंदतेज्ञानंतस्मान्महात्म्यउच्यते तस्माद्विदंदेविविदिश्चैवसंविदिताभिधीयते साक्षात्सर्वं

१४ विद्यतेवसर्वस्मिसर्वंतस्मिंश्चवर्त्तते तस्मात्सविदितोप्राज्ञोमहान्वैबुद्धिसात्त्वैः ज्ञानासज्ज्ञानमिया
हभगवान्ज्ञानसंनिधिः द्वंद्वानांविश्वरीभावविश्वरःप्रोच्यतेबुधैः सर्वशात्वाचलोकानामवश्यंचता
पेश्वरः बृहत्वाच्चस्मृतोब्रह्माभूतत्वाद्भावउच्यते क्षेत्रक्षेत्रज्ञविज्ञानादेकत्वाच्चसकःस्मृतः यस्मात्
पुरुशेतेवतस्मात्पुरुषउच्यते नोत्पादितत्वात्पूर्वत्वात्स्वयंभूरितिचोच्यते पर्यायवाचकैः शब्दैः
तत्त्वमाद्यमनुत्तमं व्याख्यातंतत्त्वभावज्ञैरेवंसद्भावचिंतकैः ब्रह्मासृष्टिंविकुरुतेचोद्यमानसिसृक्ष
या संकल्पाध्यवसायश्चतस्यवृद्धिद्वयंस्मृतं धर्मादीनिचरूपाणि--------वः त्रिगु
णस्तुसविज्ञेयः सत्वराजसतामसः त्रिगुणात्तजसोद्रिक्तादहंकारस्ततोभवत् महताचावृतः
सर्गोभूतादिर्वास्यतत्तुसः तस्माच्चतमसोद्रिक्तादहंकारादजायत भूततन्मात्रसर्गस्तुभूतादि
तामसस्तुमः भूतादिस्तुविकुर्वाणः शब्दमात्रंससर्जह आकाशंसुषिरंतस्मादुद्रिक्तंशब्द।
लक्षणं आकाशंशब्दमात्रंतुभूतादिश्चावृणोत्पुनः शब्दमात्रंतदाकाशंस्पर्शमात्रंससर्जह
वलवान्जायतेवायुःसवैस्पर्शगुणोमतः आकाशशब्दमात्रंतुस्पर्शमात्रंतमावृणोत् वा १४

युश्चापि विकुर्वाणो रूपमात्रं ससर्ज ह ज्योतिरुत्पद्यते वायोस्तद्रूपगुण उच्यते स्पर्शमात्रं तु वैवा
योरूपमात्रं समावृणोत् ज्योतिश्चापि विकुर्वाणः रसमात्रं ससर्ज ह संभवंति ततो ह्यापः पा
श्चात्तो वै रसात्मिका रसमात्रास्तु ता ह्यापो रूपमात्राभिरावृणोत् आपश्चापि विकुर्वंत्यो गं
धमात्रं ससर्जिरे संघातो जायते तस्मात्तस्य गंधो गुणः स्मृतः रसमात्रं तु तत्कायं गंधमात्रं समा
वृणोत् तस्मिंस्तस्मिंस्तु तन्मात्रं तेन तन्मात्रता स्मृता अविशेषवाचकत्वादविशेषास्ततः
स्मृताः अशांतघोरमूढत्वादविशेषास्ततः पुनः भूततन्मात्रसर्गोयं विज्ञेयस्तु परस्पराव्
वैकारिकाश्चहंकारात्सत्वोद्रिक्तात्तु सात्विकात् वैकारिकः स सर्गस्तु युगपत्संप्रवर्त्तते बुद्धींद्रि
याणि पंचैव पंच कर्मेंद्रियाण्यपि साधकानींद्रियाणि स्युर्देवा वैकारिका दश एकादशं मनस्त
त्र देवा वैकारिकाः स्मृताः श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पंचमी शब्दादीनामवाप्त्य
र्थं बुद्धियुक्तानि वक्ष्यते पादौ पायुरुपस्थश्च हस्तौ वाक् दशमी भवेत् गतिर्विसर्गो ह्यानंदः
शिल्पं वाक्यं च कर्म च आकाशं शब्दमात्रं च स्पर्शमात्रं समाविशत् द्विगुणस्तु ततो वायुश

१९

रूपस्पर्शात्मकोभवत् रूपंतथैवाविशतःशब्दस्पर्शौगुणावुभौ त्रिगुणस्तुततस्त्वग्निःसशब्द
स्पर्शरूपवान् सशब्दस्पर्शरूपश्चरसमात्रंसमाविशत् तस्माच्चतुर्गुणायापोविज्ञेया
स्तुरसात्मिकाः शब्दस्पर्शश्चरूपंचगंधस्तेषांसमाविशत् संयुक्तागंधमात्रेणआचिन्व
तोमहीमिमां तस्मात्पंचगुणाभूमिःस्थूलाभूतेषुदृश्यते शान्ताघोराश्चमूढाश्चविशे
षास्तेनतेस्मृताः परस्परानुप्रवेशाद्धारयंतिपरस्परं भूमेरंतस्त्विमंसर्वलोकालोकघना
वृतं विशेषाइंद्रियग्राह्यानियतत्वाच्चतेस्मृताः गुणंचपूर्वपूर्वस्यप्राप्नुवंत्युत्तरोत्तरे ते
षांयावच्चयद्यच्चततत्तावद्गुणंस्मृतं उपलभ्याप्सुचेद्गंधंकेचिद्बायोरनैपुणात् पृथिव्या
मेवतद्विद्यादपांवायोश्चसंश्रयात् एतेसप्तमहावीर्यानानाभूताःपृथक्पृथक् नाशक्नु
वन्प्रजास्रष्टुमसमागम्यकृत्स्नशः तेसमेत्यमहात्मानोह्यन्योन्यस्यचसंश्रयात् पुरुषा
धिष्ठितत्वाच्चअव्यक्तानुग्रहेणच महदाद्याविशेषान्ताअंडमुत्पादयंतिते एककाल
समुत्पन्नंजलबुद्बुदवच्चतत् विशेषेभ्योंडमभवद्बृहत्तदुदकंचयत् ततस्मिन्कार्यकरण

१९

संसिद्धिं ब्रह्मणा लदा प्राकृतेंडे विवृद्धे सद्वेत्रज्ञो ब्रह्मसंज्ञितः करणौ सहस्रज्यंते प्रत्याह
रेत्यजंति च भजंते च उनर्देहा न समाहार संधिभु हिरण्मयस्तुयो मेरुतस्येल्वतन्महात्म
नः गर्भोदकं समुद्राश्च जरायस्थीनि पर्वताः तस्मिन्नंडे त्विमे लोकाश्चंतर्भूतास्तु समवे
सप्तद्वीपा च पृथिवी समुद्रै सहस्रशभिः पर्वतै स्तु मरुद्भिश्च नदीभिश्च सहस्रशः अंत
स्तस्मिंस्त्विमे लोकाश्चंतर्विश्वमिदं जगत् चंद्रादित्यौ सनक्षत्रौ सग्रहौ सहवायुना लो
कालोकं च यत्किंचिच्चांडे तस्मिन्समर्पितं अद्भिर्दशगुणाभिस्तु वाह्यतोंड समावृतं आपो द
शगुणैरेवं तेजसा वाह्यतो वृताः तेजो दशगुणेनैव वाह्यतो वायुवृतः वायुर्दशगुणेने
वं वाह्यतो नभसा वृतः आकाशेन वृतो वायुः खं च भूतादिनावृतं भूतादिर्महता चापि अ
व्यक्तेनावृतो महान् एतैरावरणैरंडं सप्तभिरावरणैर्वृतं एताश्चावृतयश्चान्योन्यसंश्लिष्टाप्रकृ
तयः स्थिताः प्रसर्गकाले स्थित्वा च ग्रसंत्येताः परस्परं एवं परस्परोन्यन्नाधारयंति परस्प
र आधाराधेयभावेन विकारश्च विकारिषु अव्यक्तं क्षेत्रमुद्दिष्टं ब्रह्म क्षेत्रज्ञ उच्यते

इत्येषप्राकृतःसर्गोह्यव्यक्ताधिष्ठितस्तुसः अबुद्धिपूर्वःप्रागासीत्प्रादुर्भूतस्तडिद्यथा एतद्धिरण्य
गर्भस्यजन्मयोवेदतत्त्वतः आयुष्मान्कीर्तिमान्धन्यःप्रजावांश्चभवत्युत निवृत्तिकालेचनरः
शुद्धात्मालभतेगतिं पुराणश्रवणान्नित्यंसुखंचैवसमाप्नुयात् ॥ इतिश्रीमहापुराणेवा
युप्रोक्तेप्रक्रियापादे ॥ मनुउवाच ॥ यदिदंतुसमाख्यातंमयाकालांतरंद्विजाः एतत्कालांत
रंज्ञेयमहर्वैपारमेश्वरं रात्रिश्चैतावतीज्ञेयापरमेशस्यकृत्स्नशः अहस्तस्यतुयासृष्टिःप्र
लयोरात्रिरुच्यते अहर्नविद्यतेतस्यनरात्रिरितिधारणा उपचारःप्रक्रियते लोकानांहितका
म्यया प्रजाप्रजानांपतयः ऋषयोमुनिभिःसह ऋषीन्सनत्कुमारांस्तान्ब्रह्मसायुज्यगैः
सह इंद्रियाणींद्रियार्थश्चमहाभूतानिपंचवै तन्मात्राइंद्रियगणाबुद्धिश्चमनसासह
अहस्तिष्ठंतितेसर्वेपरमेशस्यधीमतः अहरंतेप्रलीयंतेरात्र्यंतेविश्वसंभवः स्वात्मन्येव
स्थितेसर्वेविकारेप्रतिसंहृते साधर्म्येणावतिष्ठेतेप्रधानपुरुषावुभौ तमःसत्वगुणावेतौ
समत्वेनव्यवस्थितौ अनुद्रिक्तावमलौतौचनोतप्रोतौपरस्परं गुणसाम्येलयोज्ञेयोवै

प्रमे सृष्टिरुच्यते तिलेषु वा यथा तैलं घृतं पयसि वा स्थितं तथा तमसि सत्वे च रजो व्याप्य स्थि
तं स्थितं उषासु रजनीक्षयेऽन्ता परां माहेश्वरी तदा ग्रहं सर्ववेशं प्रवृत्ते तु परः प्रकृति संभवः क्षोभ
यामास योगेन परेण परमेश्वरः प्रधानात्क्षोभ्यमानात्तु रजो वै समवर्त्तत प्रधानं पुरुषं चै
व प्रविश्य पांडं महेश्वरः रजः प्रवर्त्तकं तत्र बीजं स्थापि यथा जलं गुणवैषम्यमासाद्य प्रसूय
ते ह्यधिष्ठिताः गुणेभ्यः क्षोभ्यमाणेभ्यः त्रयो देवा विजज्ञिरे आश्रिताः परमा गुह्याः सर्वात्मा
नः शरीरिणः रजो ब्रह्मा तमो ह्यग्निः सत्व विष्णुरजायत रज प्रकाशको ब्रह्मा स्रष्टृत्वेन व्यव
स्थितः तमः प्रकाशको ह्यग्निः कालत्वेन व्यवस्थितः सत्व प्रकाशको विष्णु रोदसीत्वे व्यव
स्थितः एत एवः त्रयो लोका एत एव त्रयो गुणाः एत एव त्रयो वेदा एत एव त्रयोऽग्नयः प
रस्पराश्रिता ह्येते परस्परमनुव्रताः परस्परेण वर्त्तन्ते धारयन्ती च परस्परं अन्योन्यमिथु
ना ह्येते ह्यन्योन्यमुपजीविनः क्षणं वियोगो न ह्येषां न त्यजंति परस्परं ईश्वरो हि परो दे
वो विष्णुस्तु महतः परः ब्रह्मा तु रजसाश्रितः सर्गाय संप्रवर्त्तते परश्च पुरुषो ज्ञेयः प्र

१२

कृतिस्तु परा स्मृता। अधिष्ठितो सौ हि महेश्वरेण प्रवर्त्ततेवोद्यमनः समंतात्। अनुप्रवर्त्तंति महां-
तमेव चिरस्थितास्ते विषयोपियत्वात्। प्रधानगुणवैषम्यात्सर्गकाले प्रवर्त्तते। ईश्वराधिष्ठितात्पू-
र्वं तस्मात्सदसदात्मिका। ब्रह्मा बुद्धिश्च मिथुनं युगपत्संबभूवतुः। तस्मात्तमोव्यक्तमयः क्षेत्र-
ज्ञो ब्रह्मसंज्ञितः। संसिद्धः कार्यकरणो ब्रह्माग्रे समवर्त्तत। तेजसा प्रथमो धीमान् अव्यक्तः संप्र-
काशते। स वै शरीरी प्रथमः कारणत्वे व्यवस्थितः। अप्रतीघेन ज्ञानेन ऐश्वर्येण च सान्वितः।
धर्मेण चाप्रतीघेन वैराग्येण समन्वितः। तस्येश्वरस्याप्रतिघं ज्ञानवैराग्यलक्षणं। धर्मैश्व-
र्यकृता बुद्धिः ब्राह्मी जज्ञेभिमानिनः। अव्यक्ताज्जायते चास्य मनसा च यदिच्छति। वशी-
कृतत्वाद्वै गुणानां सापेक्षत्वात्स्वभावतः। चतुर्मुखस्तु ब्रह्मत्वे कालत्वे चांतको भवत्। सहस्र-
मूर्द्धा पुरुषस्तिस्रोवस्था स्वयंभुवः। सत्वरजश्च ब्रह्मत्वे कालत्वे च रजस्तमः। सात्विकं पुरु-
षत्वे च गुणवृत्तिः स्वयंभुवः। लोकान्सृजति ब्रह्मत्वे कालत्वे संक्षिपत्यपि। पुरुषत्वे उ-
दासीनः तिस्रोवस्था प्रजायते। ब्रह्मा कमलगर्भाभः कालो जात्यांजनप्रभः। पुरुषः

१२

पुंडरीकाक्षोऽक्षरूपं तत्परमात्मनः योगेश्वर शरीराणि करोति विकरोति च नानाकृतिक्रिया
रूपः नामवृत्तिस्वलीलया त्रिधा यद्वर्त्तते लोके तस्मात्रिगुण उच्यते चतुर्द्धा प्रविभक्तत्वाच्च
तुर्व्यूहः प्रकीर्त्तितः यद्वाप्नोति यदादत्ते यच्चात्ति विषयं प्रति तच्चास्य सततं भावस्तस्मादात्मा
स्वानिरुच्यते ऋषिः सर्वगतत्वाच्च शरीरा यास्तु यं प्रभुः स्वामीत्वमस्य यत्सर्वं विष्णुः सर्वप्र
वेशनात् भगवान्भगवज्ञावाराग्गारागस्य शासनात् परस्तु तत्प्रकृष्टत्वाद्देवनामो मितिः
स्तः त्रिधाविभज्यचात्मानं त्रैलोक्यं संप्रवर्त्तते सृजते ग्रसते चैव वीक्षते च त्रिभिस्तु यत् अ
ग्रे हिरण्यगर्भः संप्रादुर्भूतश्च तुर्मुखः आदित्वाच्चादिदेवोऽसौ वजातत्वादजः स्मृतः पाति य
स्मात्प्रजाः सर्वाप्रजापतितत स्मृतः देवेषु च महादेवो महादेवस्ततः स्मृतः सर्वशत्वाच्चा
लोकानामवश्यत्वात्तथेश्वरः बृहत्वाद्ब्रह्मणो ब्रह्मा भूतत्वाद्भूत उच्यते क्षेत्रज्ञः क्षेत्रविज्ञा
नाद्विभुः सर्वगतो यतः यस्मात्पुर्यनुशेते च तस्मात्पुरुष उच्यते नोत्पादितत्वात्पूर्वत्वात्स्व
यंभूरिति विस्मृतः इज्यत्वादुच्यते यज्ञः कविर्विक्रांतदर्शनात् क्रमणः क्रमणीयत्वाद्वा

१८

सिकस्याभिपालनात् आदित्समाज्ञः कपिलः त्वग्रजोग्निरितिस्मृतः हिरण्यमस्यगर्भोभूद्धि
रस्यस्यापिगर्भजः तस्माद्धिरण्यगर्भः सपुराणेस्मिन्निरुच्यते स्वयंभुवोनिवृत्तस्यकालोवर्षा
ग्रजस्तुयः नशाक्यःपरिसंख्यातुमपिवर्षशतैरपि कल्पसंख्यानिवृत्तस्तुपराख्योब्रह्मणस्मृ
तः तावच्छेषोस्यकालोन्यवस्यांतेप्रतिसृज्यते कोटीकोटिसहस्राणिअंतर्भूतानियानिवै स
मतीतानिकल्पाणितावच्छेषापरास्त्वये यस्त्वयंवर्त्ततेकल्पोवाराहंतंनिबोधत प्रथमःसांप्रत
स्तेषांकल्पोयंवर्त्ततेद्विजाः तस्मिन्स्वायंभुवाद्यास्तुमनवस्युः चतुर्दश अतीतावर्त्तमानश्च
भविष्यायेचवैपुनः तैरियंप्रथिवीसर्वासप्तद्वीपासमंततः पूर्णंवर्षसहस्रंवैपरिपाल्यानरेश्व
रैः प्रजाभिस्तपसाचैवतेषांश्रृणुतविस्तरं मन्वंतरेणचैकेनसर्वाण्येवंतराणिवै भविष्याणि
भविष्यैश्चकल्पकल्पेनचैवह अतीतानिचकल्पाणिसोदर्कानिसहान्वये अनागतेषुतद्वत्त।
र्कःकार्योविजानता॥ ॥इतिश्रीमहापुराणेवायुप्रोक्तेप्रक्रियापादेप्रकृतिद्वोभनोनाम ॥ सूत
उवाच आपोह्यग्रेसमभवन्नष्टेग्नौप्रथिवीतले सांतरालैकलीनेस्मिन्नष्टेस्थावरजंगमे प

राम•
१८

कास्मिंस्तु तदा तस्मिन प्राज्ञायत किंचन तदा समभवद्ब्रह्मा सहस्राक्षः सहस्रपात् सहस्रशीर्षा पुरुषो
रुक्मवर्णो जितेंद्रियः ब्रह्मा नारायणाख्यः सस्वाप सलिले तदा सत्वोद्रिकात्प्रबुद्धस्तु शून्यं लो
कमुदीक्ष्य सः इमं चोदाहरंत्यत्र श्लोकं नारायणं प्रति आपो नारा वै तनवः इत्येवं नाम शुश्रुम
अप्सु शेते च यं तस्मात्तेन नारायणः स्मृतः तुल्यं युगसहस्रस्य नैशं कालमुपास्य सः शार्वर्यां
ते प्रकुरुते ब्रह्मत्वं सर्गकारणात् आपस्तु सलिले तस्मिन्वायुर्भूत्वा मदाचरत् निशायामिव खद्यो
तः प्रावृट्काले ततस्ततः ततस्तु सलिले तस्मिन्विज्ञायांतर्गतां महीं अनुमानादसंमूढो
भूमेरुद्धरणं प्रति अकरोत्स तनुं ह्यन्यां कल्पादिषु यथा पुरा ततो महात्मा मनसा दिव्यं रूपम
चिंतयत् सलिलेनाप्लुतां भूमिं दृष्ट्वा स तु समंततः किं नु रूपं महत्कृत्वा उद्धरेयमहं महीं जल
क्रीडासु रुचिरं वाराहं रूपमस्मरत् अधृष्यं सर्वभूतानां वाङ्मयं धर्मसंज्ञितं दशयोजनवि
स्तीर्णं शतयोजनमुच्छ्रितं नीलमेघप्रतीकाशं मेघस्तनितनिस्वनं महापर्वतवर्ष्माणं श्वे
तस्तीक्ष्णोग्रदंष्ट्रिणं विद्युदग्निप्रकाशाक्षमादित्यसमतेजसं पीनवृत्तायतस्कंधं सिंहवि

१५ कानगामिन पीनोन्नतकटीदेशं सुस्निग्धलक्ष्मभलक्षणं रूपमास्थायविपुलंवाराहमितितंहरिः प्र
विवेशोदकंधार्यायप्रविवेशरसातलं सवेदपादयूपदंष्ट्रः क्रतुदंतश्चितीमुखः अग्निजिह्वोदर्भरो
माब्रह्मशीर्षोमहातपाः अहोरात्रेक्षणधरोवेदांगश्रुतिभूषणः आज्यनासः स्रुवतुंडः सामघो
षस्वनोमहान् सत्यधर्ममयः श्रीमान्धर्मविक्रमसंस्थितः प्रायश्चित्तनखोघोरः पशुजानुर्महा
कृतिः उद्गात्रांत्रोहोमलिंगश्चानविजीमहौषधी वाद्यंतरात्मामंत्रस्फिगायसकसोमशोणितः
वेदस्कंधोहविर्गंधोहव्यकव्यातिवेगवान् प्राग्वंशकायोद्युतिमान्नानादीक्षाभिरन्वितः दक्षि
णाहृदयोयोगीमहासत्रमयोविभुः उपाकर्मोष्ठरुचिरः प्रवर्ग्यावर्तभूषणः नानाछंदोगतिपथो
गुह्योपनिषदासनः छायापत्नीसहायोवैमणिशृंगइवोच्छ्रितः भूत्वायज्ञवराहोवैस्त्र यःसथा
विशान्प्रभुः अद्भिः संछादितामुर्वीसतामश्रप्रजापतिः उपगम्योजहाराशुआपस्थान्तुमविन्यसत्
सामुद्रीर्वैसमुद्रेषुनादेयीश्चनधरस्तया रसातलतलेमग्नां रसातलतलेगतां प्रभुर्लोकहितार्थी
यदंष्ट्रयाभ्युज्जहारगां ततः प्रस्थानशरीरेच पृथिवींपृथिवीकरः समीकृत्यपर्वतमनसाधारयित्वा १५

धराधरः ततस्तस्योपरि जलौघस्य महती नौरिव स्थिता विततत्वात्तु देहस्य न मही याति विप्लवं ततश्च
स क्षितिं देवो जगतस्थापने कया पृथिव्याः परिभागाय मनश्चक्रेऽब्जेक्षणः पृथिवीं तु समीकृत्य पृ
थिव्यां सोऽचिनोद्गिरीन् प्राक्सर्गदह्यमानानां तदा संवर्तकाग्निना तेनाग्निना विशीर्णास्ते पर्वता भु
वि सर्वशः शैत्यादेकार्णवे तस्मिन्वायुना यस्तु संहताः निषिक्ता यत्र यत्रासंस्तत्र तत्राचलोऽभवत्
स्कन्नाचलत्वादचलाः पर्वभिः पर्वताः स्मृताः गिरयो हि निगीर्णत्वाच्छयनाच्च शिलोच्चयाः ततस्ते
भुवि शीर्णेषु लोकोदधिगिरिष्वथ विश्वकर्मा विभजते कल्पादिषु पुनः पुनः ससमुद्रामिमां पृ।
थिवीं सप्तद्वीपां सपर्वतां भूराद्यांश्चतुरो लोकान्पुनः सोऽथ प्रकल्पयत् लोकान्प्रकल्पयित्वा च प्र
जासर्गं ससर्ज ह ब्रह्मा स्वयंभूर्भगवान्सिसृक्षुर्विविधाः प्रजाः ससर्ज सृष्टिं तद्रूपां कल्पादिषु यथा तस्या।
भिध्यायतः सर्गं तदा वै बुद्धिपूर्वकं प्रधानसमकालं वै प्रादुर्भूतस्तमोमयः तमो मोहो महामोहः।
तामिस्रश्चान्धसंज्ञिते अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः पंचधावस्थितः सर्गो ध्यायतः सोऽभि
मानिनः सर्वतस्तमसा चैव दीपः कुंभवदावृतः बहिरन्तः प्रकाशश्च स्तब्धो निःसंज्ञ एव च यस्मा

२० तैसंवृतोवुद्धिमुख्यानिकरणानिच तस्मात्तेसंवृतात्मानोनगामुख्याःप्रकीर्त्तिताः मुख्यसर्गंतथाभूतंब्र
ह्मादृष्ट्वास्वसाधकं अप्रसन्नमनासोथततोन्यंसोभ्यमन्यत तस्याभिध्यायतस्तत्रतिर्यक्स्रोत्योभ्यवर्त्तत
तस्मात्तिर्यक्प्रवर्त्ततेतिर्यक्स्रोतस्ततस्मृतं तमोवहुत्वात्तेसर्वेह्यज्ञानवहुलास्मृताः उत्पथग्राहिण
श्चापितेज्ञानाज्ञानमानिनः तिर्यक्स्रोतस्तुदृष्ट्वावैद्वितीयंविश्वमीश्वरः अहंकृत्वाअहंमानाअष्टा
विंशद्विधात्मिकाः एकादशेन्द्रियवधानवधाचादयस्तथा अष्टौचतारकाद्यास्तेषांशक्तिवधास्मृ
ताः अंतःप्रकाशात्तेसर्वेआवृतास्तुवहिःपुनः यस्मात्तिर्यक्प्रवर्त्ततेतिर्यक्स्रोतास्तउच्यते तिर्यक्स्रोत
स्तदृष्ट्वातेद्वितीयंविश्वमीश्वरः अभिप्रायमथोद्भूतंदृष्ट्वासर्वंतथाविधं तस्याभिध्यायतोनित्यंसात्वि
कंसमवर्त्तत ऊर्द्धस्रोतस्तृतीयस्तुसचैवार्द्ध्वव्यवस्थितः तस्माद्यवर्द्धतोद्धर्वंतद्ऊर्द्धस्रोतस्ततःस्मृतः ते
सुखप्रीतिवहुलावहिरंतश्चसंवृताः प्रकाशावहिरंतश्चसंवृताः ऊर्द्धस्रोताद्भवास्मृताः तेनवात्माद
योज्ञेयास्तुष्टात्मानोव्यवस्थिताः ऊर्द्धस्रोतास्तृतीयोवैतेनसर्गस्तुसंस्मृतः ऊर्द्धस्रोतःसुसृष्टेषुदेवेषु। मा॰
२०

सतदाप्रभुः प्रतिमानमभवद्ध्यात्तनतोन्यंसोभ्यमन्यत ससर्जसर्गमन्यंससाधकंप्रहरीश्वरः अथाभिध्या
यतस्तस्यसत्याभिध्यायिनस्तदा प्रादुर्बभूवचाव्यक्तादर्वाक्स्रोतःस्तुसाधकं यस्मादर्वाग्व्यवर्त्तन्तत
तोर्वाक्स्रोतसउच्यते तेचप्रकाशबहुलास्तमसद्रिक्तारजोधिकाः तस्मात्तेदुःखबहुलाभूयोभूयश्च
कारिणः प्रकाशाबहिरंतश्चमनुष्याःसाधकास्तुते लक्षणैस्तारकाद्यैस्तेअष्टधाचव्यवस्थिताः
सिद्धात्मानोमनुष्यास्तेगंधर्वसहधर्मिणः इत्येषतेजसःसर्गोह्यर्वाक्स्रोतःकीर्त्तितः पंचमोनुग्रहःसर्गः
चतुर्द्धासव्यवस्थितः भूतादिकानांसत्वानांषष्ठःसर्गसउच्यते तोपरिग्रहिणःसर्वेसंविभागरताः
पुनः खादनाश्चाप्यशीलाश्चज्ञेयाभूतादिकास्तुते विपर्ययेणभूतादिरशक्त्याचव्यवस्थिता प्रथ
मोमहतःसर्गोविज्ञेयोमहतस्तुसः तन्मात्राणांद्वितीयस्तुभूतःसर्गःसउच्यते वैकारिकस्तृतीय
स्तुसर्गऐंद्रियकस्मृतः इत्येषप्राकृतःसर्गसंभूतोबुद्धिपूर्वकः मुख्यसर्गश्चतुर्थस्तुमुख्यावैस्थाव
राःस्मृताः तिर्यक्स्रोतस्तुयःप्रोक्तस्तिर्यग्योनिःसपंचमः तथोर्द्ध्वस्रोतसांषष्ठोदेवसर्गस्तुसंस्मृतः त
थार्वाक्स्रोतसांसर्गःसप्तमःसतुमानुषः अष्टमोनुग्रहःसर्गःसात्विकस्तामसश्चयः पंचैतेवैकृताः

सर्गाः प्राकृतास्तु त्रयस्मृताः प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः प्राकृतास्तु त्रयः सर्गाः कृता
स्ते बुद्धिपूर्वकाः बुद्धिपूर्वं प्रवर्त्तंते षट्सर्गा ब्रह्मणस्तु ते विस्तरानुग्रहं सर्गं कीर्त्त्यमानं निबोधत च
तुर्द्धावस्थितः सोऽपि सर्वभूतेषु कृत्स्नशः विपर्ययेण शक्त्या च तुष्ट्या सिद्ध्या तथैव च स्थावरे
षु विपर्यासस्तिर्यक्योनिषु शक्तिता सिद्ध्यात्मनो मनुष्यास्तु तुष्टिर्देवेषु कृत्स्नशः इत्येते प्राकृ
ताश्चैव वैकृताश्च नव स्मृताः अग्रे ससर्ज वै ब्रह्मा मानसानात्मनः समान् सनंदनं ससनकं वि
द्वांसं सनातनं विज्ञाने विनिवृत्तास्ते वैवर्त्तेन महौजसः संबुद्धाश्चैव नानात्वादप्रवृद्धास्त्रयो
पि ते असृष्ट्वैव प्रजासर्गं प्रतिसर्गं गताः पुनः तदा तेषु व्यतीतेषु तदान्यान्साधकान्स्वतान्
मानसानसृजद्ब्रह्मा पुनः स्थानाभिमानिनः तदा तेषु व्यतीतेषु आभूतसंप्लवावस्थानाम
तस्तान्निबोधत आपोग्निः पृथिवी वायुरंतरिक्षं दिशस्तथा स्वर्गं दिवं समुद्रांश्च नदान् शै
लान्वनस्पतीन् ओषधीनां तथात्मानो ह्यात्मनो वृक्षवीरुधां लवाः काष्ठाः कलाश्चैव मु
हूर्त्ताः संधिरात्र्यहाः अर्द्धमासाश्च मासाश्च अयनाब्दयुगानि च स्थानाभिमानिनः सर्वे

स्यानाख्याख्यैव तेस्मृताः वृत्तायस्य ब्राह्मणा संप्रसूतास्तदुच्यते तस्मात्क्षत्रिया पूर्वभागो वपुषा।
ख्याउख्यान्यस्य पद्भ्यां च शूद्राः सर्ववर्णा गात्रतः संप्रसूताः नारायणः परोव्यक्तादंडमव्यक्तसंभवं अं
डाज्जज्ञे पुनः ब्रह्मा लोकालोकेन कृतास्त्वयं एष वः कथितः पादः समासान्नतु विस्तरात् अनेनाद्ये।
वपादेन पुराणं संप्रकीर्तितं ॥ ॥ इति श्रीवायुप्रोक्ते महापुराणे प्रक्रियापादः समाप्तः ॥ ॥ सूत
उवाच ॥ इत्येष प्रथमः पादः प्रक्रियार्थं प्रकीर्तितः श्रुत्वा तु संहृष्टमानाः काश्यपेयः सनातनः
मेरोध्य सूत वचसा पप्रच्छ यो जनार्दक यो अतः प्रभृति कल्पानां प्रतिसंधिं प्रचक्ष्व नः समतीतस्य
कल्पस्य वर्तमानस्य चोभयोः कल्पयोरंतरं यच्च प्रतिसंधिर्यतस्तयोः एतद्वेदितुमिच्छामः।
अत्यंतकुशलो ह्यसि ॥ सूत उ० ॥ अत्र वो वर्णयिष्यामि प्रतिसंधिश्च यश्चयोः समतीतस्य कल्प
स्य वर्तमानस्य चोभयोः मन्वंतराणि कल्पेषु येषु यानि च सुव्रता यश्चायं वर्तते कल्पो वाराहः
सांप्रतं शुभः अस्मात्कल्पाच्च यः कल्पः पूर्वोतीतः सनातनः तस्य चास्य च कल्पस्य मध्ये वा।
लोकान्निबोधत प्रत्याहृते पूर्वकल्पे प्रतिसंधिं च तत्र वै अन्यः प्रवर्तते कल्पो जनात्लोकात्पुनः

पुनः व्युछिन्नाप्रतिसंधिस्तुकल्पात्कल्पेपरस्परं व्युछिद्यतेक्रियाःसर्वाःकल्पांतेसर्वशस्तदा तस्मा
त्कल्पप्रतिसंधिर्नविद्यते मन्वंतरयुगाख्यानामव्युछिन्नास्तुसंशयः परस्पराःप्रवर्त्ततेमन्वं
तरयुगैःसह उक्तायेप्रक्रियार्थेनपूर्वकल्पाःसमासतः तेषांपरार्द्धकल्पानांपूर्वोज्ञेयस्मात्तु
यःपरः आसीत्कल्पोव्यतीतोवैपरार्द्धनपरस्तुसः अन्येभविष्यायेकल्पाःप्रपरार्याद्गुणी
कृताः प्रथमःसांप्रतस्तेषांकल्पोयंवर्त्ततेद्विजाः अस्मिन्पूर्वपरार्द्धेतुद्वितीयेपरउच्यते
एतावानस्थितिकालस्यप्रत्याहारस्ततःस्मृतः अस्मात्कल्पात्तुयःपूर्वःकल्पातीतःसनातनः
चतुर्युगसहस्रांतअहोमन्वंतरैःसह क्षीणेकल्पेततस्तस्मिन्दाहकालउपस्थिते तस्मि
न्कल्पेतदादेवाआसन्वैमानिकास्तुये अष्टाविंशतिरेवैकाकोट्यस्तस्यकृतात्मनो मन्वंतरे
तथैकस्मिन्चतुर्दशसुवैतथा त्रीणिकोटिशतान्यासन्कोट्योद्विनवतिस्तथा अष्टाधि
काःसप्तशताःसहस्राणांस्मृताःपुरा वैमानिकानांदेवानांकल्पेतीतेतुयेभवन् एकैक
स्मिन्तुकल्पेवैदिवावैमानिकास्तताः प्रथमन्वंतरेषांसप्तचतुर्दशस्तुवैदिवि देवाःस्थापित

पाम०
२२

रश्चैव ब्रह्मनयोमनवस्तथा तेषामनुचरा येच मनुपुत्रास्तथैवच सर्वाश्रमिभिरीड्याश्च तस्मि
न्कालेनुये सुराः मन्वन्तरेषु ये ह्यासन् देवलोके दिवौकसः ते ते सयोजनैः सार्द्धं ग्रामे संका
लनेतथा कल्पनिष्ठास्तु ते सर्वे ग्रामे ह्याभूतसंप्लवे ततस्तेव ब्रूपभाविनावुधायपर्यायमात्मा
नः त्रैलोक्यवासिनो देवासिनो देवाः इहस्थानाभिमानिनः स्थितिकालेन तदा सर्वे तस्संस्थाभूते
संनेपाश्विमेंतते कल्पावसानिकाः देवास्तस्मिन्ग्रामेहापप्लवे तेनोत्कर्षविषादेन त्यक्त्वास्था
नानिभावतः महर्लोकाय ते विप्रास्ततस्ते दधिरे मतिं ते पुनः काउपपद्यन्ते महसिस्थैः शरीरकैः
विशुद्धिबहुलाः सर्वे मानसीं सिद्धिमास्थिताः तेः कल्पवासिभिः सार्द्धं महानासादितस्तु येः
दग्धाकृत्वाइवाहूत्स सस्मात्कृतिसंलयः तत्र कल्पान् दशास्थित्वा सत्यं गच्छन्ति वै पुनः
पतेनक्रमयोगेन यातिकल्पान्तवासिनः एवं देवयुगानां तु सहस्राणि परस्परान् गतानिव्र
ह्मलोकं वैअपरावर्त्तिनीं गतिं आधिपत्यं विना ते वैश्वर्येणतु नत्समा भवति ब्रह्मणस्तु
ल्यारूपेण विषयेण च तत्र ते स्थवतिष्ठंति प्रतिसंचरकामसंगमात् आनंदं ब्रह्मणः प्राप्य मु

यंते ब्रह्मणा सह अविशिष्टंभाविनार्थेन शाक्यते नैवतेस्वयं नानात्वेनाभिसंवद्धालदास्तत्कालभा
विना स्वयंतोबुद्धिसर्वेंद्रियर्यथाभवंति नाग्रतः तत्कालभाविनेष्वान्न न चाज्ञानं प्रवर्त्तते अस्याहि
रेतभेदानां येषामभिन्नानि सुप्तिष्विणैस्तस्मिंईप्रति स्त्रजंते कार्याणि कारणानिव नानात्वदर्शनात्तेषां
ब्रह्मलोकनिवासिनां विनष्टस्वाधिकाराणां स्वेनधर्मप्रतिष्ठानां नेतुस्य लक्षणसिद्धा शुद्धात्मा
नोनिरंजनाः प्रकृतौकारणतीनास्वात्मनोवव्यबलिनाः यावोपयित्वा सात्मानं प्रकृतेस्या
शुसर्वतः पुरुषाव्यवकृत्वेन प्रतीतान प्रवर्त्तते प्रवर्त्तिते पुनः सर्गे तेषां वा कारणे पुनः संयोगे प्रा
कृते नैषां मुक्तानां तत्वदर्शिना अत्रापवर्गिणां तेषां अपुनर्मार्गगामिनो अभावः पुनरावृत्तौ वा
नानामर्चिषामिव ततस्तेषु गा - इर्ष्या त्रैलोक्यात्स्थमहात्मसु तेः साइंयेमर्त्स्लौकान्तदा नामारिनोज
नः उच्छिष्टस्वेतितिष्ठंतिकल्पाहेहम्मुपासते गंधर्वाः पाशिपांवांना मानुषाब्रह्मणादयः पशवः प
क्षिणश्चैव स्थावराः समरोम्मयाः तिष्ठन्तेते पुनः काले पृथिवीतलवासिषु सरसंयन्नरश्मीनां
सूर्यस्येह विभामते नसमरश्मयोभूत्वा स्थैकैको जायते रविः क्रमेणाभिष्ठमानास्तेत्रीज्ञोकान्

प्रदहन्त्यत जंगमांस्थावरांश्चैव नदीःसर्वांश्च पर्वतान् पूर्वंशुष्काःसनावृष्ट्या सूर्यैस्ते संप्रधूपिताः त
दा ते विवशाः सर्वे निदग्धाः सूर्यरश्मिभिः जंगमाः स्थावराः सर्वे धर्माधर्मात्मकास्तु वै दग्धदेहास्तदा
स्तेवैः गतपापा युगात्यये ये ये म्याता याह्यनिर्मुक्ताशुभपापानुवंधया ततस्तेह्युपपद्यंतेतुसरूपाज
नेजनाः विशुद्धबहुला सर्वे मानसीं सिद्धिमास्थिताः उषित्वा रजनीं तत्र ब्रह्मणोऽव्यक्तजन्मनः पुनः
सर्गे भवंतीह ब्रह्मणो मानसाः प्रजाः ततस्तेषु प्रपन्नेषु जनेत्रैलोक्यवासिषु निर्दग्धेषु च लोकेषु तेषु
सूर्यैस्तु सप्तभिः वृष्ट्या क्षितौ प्लाविता या विशीर्णेषु वालयेषु च सामुद्राश्चैव मेघाश्च आपःसर्वाश्च
पार्थिवाः व्रजन्त्येकार्णवत्वं हि सलिलाख्यास्तदास्तृताः आगतागतिकं तद्वै यदा तु सलिलं बहु स
छाद्यमां स्थितभूमीमांमिवाख्यात दातु सा आभानि यस्मात्ता भांति भासंतो व्याप्तदीप्तिषु सर्वतः स
मनुव्याप्य तास्तोयांभोविभाव्यते तदंभस्तनुते यस्मात्सर्वां पृथिवीं समंततः धातुस्तनौ विविस्ता
रे तेनांभस्तनवस्मृताः अरमित्येव शीघ्रेंतु निपातः कविभिःस्मृतः एकार्णवे भवन्त्यापो न शीघ्रा
स्तेन तेनराः तस्मिन्युगसहस्रांते संस्थिते सलिले ब्रह्मणोऽहनि रजन्यां वर्त्तमानायां तावत्सलिला

त्मनः ततस्तुसलिलेतस्मिन्नष्टेयौप्रथिवीतले प्रशांतवांतेधकारेनिरालोके समंततः येनैवा
धिष्ठितंह्लींदंव्रह्मासपुरुषप्रभुः विनाशमस्यलोकस्यपुनर्वैकर्त्तुमर्हति एकार्णवेतदातस्मिन्न
ष्टेस्थावरजंगमे तदासमभवत्व्रह्मासहस्राक्षः सहस्रपात् सहस्रशीर्षापुरुषोरुक्मवर्णो
ह्यतीन्द्रियः व्रह्मानारायणाख्यस्तुसुष्वापसलिलेतदा सत्वोद्रेकात्प्रवुद्धस्तुशून्यंलोकमवेक्ष्य
च इमंचोदाहरंत्यत्रश्लोकंनारायणंप्रति आपोनारास्तनवइत्यपांनामशुश्रुम आपूर्येना
यितत्रासीत्तेननारायणस्मृतः सहस्रशीर्षःसुमनासहस्रपात्सहस्रचक्षुर्वदनःसहस्रभुक्
सहस्रवाहुःप्रथमःप्रजापतिः त्रयीपथेयःपुरुषोनिरुच्यते आदित्यवर्णोभुवनस्यगोप्ता
एकोऽपूर्वःप्रथमंतुराषाट् हिरण्यगर्भःपुरुषोमहात्मासपठ्यतेवैतमसःपरस्तात् कल्पा
दौरजसोद्रिक्तोव्रह्माभूत्वासृजत्प्रजाः कल्पांतेतमसोद्रिक्तः कालोभूत्वाग्रसत्पुनः सत्वो
नारायणाख्यस्तुसत्वोद्रिक्तोऽर्णवेस्वपन् त्रिधाविभज्यचात्मानंत्रैलोक्येसमवर्तत सृजतेग्र
सतेचैववीक्षतेचत्रिभिस्तुतान् एकार्णवेतदालोकेनष्टेस्थावरजंगमे चतुर्युगसहस्रांतेसर्वे

नः सलिलावृते ब्रह्मानारायणाद्वस्तत्र प्रकाशगर्भमेवस्वपन् चतुर्विधाश्रमाग्र्यत्वाद्ब्राह्म्या रात्र्यां
महर्लोकं पश्यंति तं महर्लोकाश्रमे कालं महर्षयः भृग्वादयो यथा सप्त कल्पेऽस्मिन्महर्षयः
महर्लोकस्थितैर्दृष्टः कालः सप्तसदाचनैः सप्तायामसमयेस्तासन्कल्पे तीते महर्षयः एवं
ब्राह्मीषु रात्रीषु अतीतानां सहस्रशः दृष्टवंतस्तथाह्यन्येऽस्मिंकाले महर्षयः कल्पस्यादौ तु वै
दृष्टो यस्मात्तस्यास्य त्वदर्शः कल्पयामास वै ब्रह्मा तस्मात्कल्पो निरुच्यते सहस्रशः सर्वभूता
नां कल्पादिषु पुनः पुनः व्यक्ताव्यक्तो महादेवस्तस्य सर्वमिदं जगत् इत्येषः प्रतिसंधिर्वः की
र्त्तितः कल्पयोर्द्वयोः सांप्रतातीतयोर्मध्ये प्रागवस्था वभूव या कीर्त्तिता तु समासेन कल्पे क
ल्पे यथा तथा सांप्रतं तु प्रवक्ष्यामि कल्पमेतं निबोधत ॥ ॥ इति श्रीमहापुराणे वायुप्रो
क्ते प्रतिसंधिकीर्त्तनो नाम ॥ ॥ सूत उवाच तस्मिन्युगसहस्रस्यैनेशे कालगणास्ततः पा
र्वयंते प्रकृते ब्रह्मत्वे सर्गकारणात् ब्रह्मा तु सलिले तस्मिन्वायुर्भूत्वा तदाचरन् अंधकारेत
दाऽस्मिन्नष्टे स्थावरजंगमे जलेन समनुव्याप्ते सर्वतः पृथिवीतले अविभागेन भूतेषु समंतात

नुस्थितेषु तु निशायामिव खद्योतः प्रावृट्काले ततस्ततः तदाकाशे चरन्ब्रह्मा वीक्ष्यमाणस्ततस्त
तः प्रतिष्ठायास्त्वपार्थं तु मार्गमाणस्तदा प्रभुः ततस्तु सलिले तस्मिन्ज्ञात्वा यान्तर्गतां महीं अनुमा
नात्तसंबुद्धो भूमेरुद्धरणं प्रति चकारान्यां तनुं चैव पूर्वकल्पादिषु स्मृतां सततरूपं वराहस्य कृ
त्वापः आविशत्प्रभुः अद्भिः संछादितां सर्वां समवेत्य प्रजापतिः उद्धृत्योर्वीमथाभ्यंस्तु अपस्ता
स्तु सविन्यसत् सामुद्रीस्तु समुद्रेषु नादेयीर्निम्नगास्वपि पार्थिवीस्तु सविन्यस्य पृथिव्यां सो
चिनोद्गिरीन् प्राक्सर्गदग्धमानेन तत्तदा संवर्तकाग्निना तेनाग्निना प्रलीनास्ते पर्वता भुवि सर्व
शः शैत्यादेकार्णवे तस्मिन्वायुना यस्तु संहताः निषक्ता यत्र यत्रासंस्तत्र तत्राचलोऽभवन् स्कं
न्नचलत्वादचलाः पर्वभिः पर्वताः स्मृताः गिरयो निर्गीर्णत्वाच्च शयनाच्च शिलोच्चयाः ततस्तु
तां समुद्धृत्य क्षितिं मेंतर्जलात्प्रभुः स्वस्थाने स्थापयित्वा च विभागमकरोत्तु नः सप्तसप्त तु व
र्षाणि तस्या द्वीपेषु सप्तसु विषमाणि समीकृत्य शिलाभिश्चिनोद्गिरीन् द्वीपेषु तेषु वर्षाणि च
त्वारिंशत्तथैव च तावंतः पर्वताश्चैव वर्षांते समवस्थिताः सर्गादौ संनिविष्टास्ते स्वभावेनैवम

तथा सप्तद्वीपांसमुद्रांश्चान्योन्यस्यानुमंडल संनिकृष्टास्वभावेन समावृत्य परस्परं भूराद्यांश्च
तथैवलोकांइंद्रादीन्सोग्रहैः सह पूर्वं च निर्ममे ब्रह्मा स्थानानि मानि सर्वशः कल्पस्य चास्य ब्रह्मा वैस्य
सृजन्स्थानिनः पुरा आपोग्निः पृथिवी वायुरंतरिक्षं दिवं तथा स्वर्गं दिशः समुद्रांश्च नद्याद्युगा
निच औषधीनां तथात्मानमात्मानं वृक्षवीरुधां लवाः काष्ठाकलाश्चैव मुहूर्त्तसंधिरात्र्यहः अर्ध
मासांश्च मासांश्चैव तथा ह्यब्दयुगानिच स्थानाभिमानिनश्चैव स्थानानिच पृथक्पृथक् स्थानात्मा
न सस्रष्टा वै युगावस्थां विनिर्ममे कृतं त्रेता द्वापरं च कलिरेव चतुर्युगं कल्पस्यादौ कृतयुगे प्रथ
मे सोसृजत्प्रजाः प्रागुक्ता या मया तुभ्यं पूर्वलोके प्रजास्तु ताः तस्मिन्संवर्तमाने तु कल्पे दग्धास्तद
ग्निना अप्राप्ता या स्तदा लोकं जनलोकं समाश्रिताः प्रवर्तति पुनः सर्गे बीजार्थं ता भवंति हि बीजा
र्थेन स्थितास्तत्र पुनः सर्गस्य कारणात् ततस्ताः सृज्यमानास्तु संतानार्थं भवंति ह धर्मार्थकाममो
क्षाणामिह ताः साधकास्तु ताः देवाश्च पितरश्चैव ऋषयो मनवस्तथा ततस्ते तपसा युक्ताः स्थाना
न्यापूरयंति हि ब्रह्मणो मानसास्ते वै सिद्धात्मानो भवंति हि ये संगद्वेषयुक्तेन कर्मणा ते दिवं गताः

आवर्त्तमानाइहतेसंभवंतियुगेयुगे स्वकर्मफलभोगेनख्यातयाचैवतथात्मिका संभवंतिजनालो
काकर्मसंसाध्यबंधनाः आशयःकारणंतत्रबोधव्यंकर्मणास्तुसः तैःकर्मभिस्तुजायंतेजनाशो
काशुभाशुभैः गृह्णंतितेशरीराणिनानारूपाणियोनिषु देवादेस्थावरांतेचउत्पद्यंतेपरस्प
रं तेषांयेयानिकर्माणिप्राक्सृष्टेप्रतिपेदिरे तान्येवप्रतिपद्यंतेसृज्यमानाःपुनःपुनः हिंसा
हिंस्रेमृदुक्रूरेधर्माधर्मेऋतानृते तद्भाविताःप्रपद्यंतेतस्मात्तत्तस्यरोचते कल्पेष्वासन्व्यती
तेषुरूप्यमानानियानिच तान्येवानागतेकालेप्रायशःप्रतिपेदिरे तस्मात्तुनामरूपाणि
तान्येवप्रतिपेदिरे पुनःपुनस्तेकल्पेषुजायंतेनामरूपतः ततःसर्गेह्यवष्टब्धेसिसृक्षो।
ब्रह्मणस्तुवैप्रजास्ताध्यायतस्तस्यसत्याभिध्यायिनस्तदा मिथुनानांसहस्रंतुसोसृजद्वक्षु
त्वात्तदा जनास्तेह्युपपद्यंतेसत्वोद्रिक्ताःसुचेतसः सहस्रमन्यद्वक्षस्तोमिथुनानांस।
सर्जह तेसर्वेरजसोद्रिक्ताःशुष्मिणश्चाप्यशुष्मिणः सृष्ट्वासहस्रमन्यत्तुद्वंद्वानामूरुतःपु
नः रजस्तमोभ्यामुद्रिक्ताईहाशीलास्तुतेस्मृताः पद्भ्यांसहस्रमन्यत्तुमिथुनानांसस

त्रेदे उत्क्रिष्टलमनसः सर्वेतिः श्रीकाः समतेजसः ततो वै हर्षमाणास्ते हृदयं तन्नास्तु याणिनः
अन्योन्यहृदयाविष्टा मिथुनायोपचक्रमुः ततः प्रभृति कल्पेस्मिन्मैथुनोत्पत्तिरुच्यते मा
सेमासेत्तवं यपत्ततदासीद्विजोषितां तस्मात्तदा न सुषुवुः सेवितैरपि मैथुनैः आयुषोंते।
प्रसूयंते मिथुनान्येव ते सकृत् उटकाउविकाश्चैव उत्पद्यंते मुमूर्षतां ततः प्रभृति कल्पे।
स्मिन्मिथुनानां हि संभवः ध्याते तु मनसा तासां प्रजानां जायते सकृत् शब्दादिविषयः शुद्धः
प्रत्येकं पंचलक्षणः इत्येवं मानसी पूर्वं प्राक् च सृष्टिः प्रजायते तस्यान्वयाये संभूता ये रिदं पू
रितं जगत् सरित्सरः समुद्रांश्च सेवंते पर्वतानपि तदा नात्यंबुशीतोष्णा युगे तस्मिन्वर्तंति वै प्र
थ्वीरसोद्भवं नाम आहारं ह्याहरंति वै ताः प्रजाः कामचारिण्यो मानसीं सिद्धिमास्थिताः ध
र्माधर्मौ न तासां स्तां लोकस्यादौ तु कृते युगे स्वेन स्वेनाधिकारेण जज्ञिरे ते कृते युगे चत्वारि तु स
हस्राणि वर्षाणि दिव्यसंख्यया आद्यं कृतयुगं प्राहुः संध्यानां तु चतुःशतं ततः सहस्रशस्ता
सु प्रजासु प्रथितास्वपि न तासां प्रतिघातोस्ति न द्वंद्वं नापि च क्लमः पर्वतोदधिसेविन्यो ह्यनि

ब्रह्मा.
पु.
२२

केनाश्रयास्तुता: विशोका सत्वबहुला एकांतसुखिता: प्रजा: ता वै निकामचारिण्यो नित्यं मुदित
मानसा: पशव: पक्षिणश्चैव न तदासन सरीसृपा: अधर्मकारकाश्चैव ते ह्यधर्मप्रसूतय: न मूलफ
लपुष्पं च नार्तवं नर्तवो न च सर्वकामसुख: कालो नात्यर्थं धर्मशीलता: बलवर्णकरी तासां सिद्धि: सारो
गता प्राणी असंस्कार्यै: शरीरैश्च प्रजास्ता: स्थिरयौवना: तासां विशुद्धसंकल्पा जायंते मिथुना: प्रजा:
समं जन्म च रूपं च म्रियंते चैव ता समं तदा सत्यमलोभश्च क्षमा तुष्टि: सुखं दम: निर्विशेषास्तु ता: स
र्वी रूपायु:शीलचेष्टितै: अबुद्धिपूर्वकं वृत्तं प्रजानां जायते स्वयं अप्रवृत्ति: कृतयुगे कर्मणो: शुभपाप
यो: वर्णाश्रमव्यवस्थाश्च न तदासन्न संकर: अनिच्छाद्वेषयुक्तास्ते वर्तयंति परस्परं तुल्यरूपायुष:
सर्वा अधमोत्तमवर्जिता: सुखप्राया ह्यशोकाश्च उत्पद्यंते कृते युगे नित्यप्रहृष्टमनसो महासत्वा म
हाबला: लाभालाभौ न तासां स्वास्तां मित्रामित्रे प्रिये ‥ मनसा विषयस्तासां निरीहाणां प्रवर्तते प्रवृत्ते
द्वापरे यज्ञं दाने कलियुगे वरं सत्वं कृतं रजस्त्रेता द्वापरं तु रजस्तमो कलौ तमस्तु विज्ञेयं युगवृत्तवशेन तु
कालं कृतयुगे त्वेव तस्य संख्यां निबोधत चत्वारि तु सहस्राणि वर्षाणां च कृते युगं संध्यांशो न स्यादि

एम.
२२

ध्यानिष्ठानां शौचसंततया तदा तासां च भूविषु नेचेद्धे प्राविय(?)तस्य संध्यायामप्यतीतायामंतकाले
युगस्य तु पादतस्त्वावसिष्टे तु संध्याधर्मे युगस्य तु एवं कृते तु निःशेषे सिद्धित्वेन दृश्यते तदा तस्यां च
सिद्धौ प्रणष्टायां मनस्यानभवन्ततः सिद्धिरन्या युगेनाल्पि वृत्तायां मंतरे कृता सर्गादौ या मया प्रोक्ता
तु मानस्यावै प्रकीर्त्तिताः अष्टौ नानाक्रमयोगेन सिद्धयो यांति संक्षयं कल्पादौ मानसी ह्येका सिद्धि
र्भवति सा कृते मन्वंतरेषु सर्वेषु चतुर्युगविभागशः वर्णाश्रमाचारकृतः कर्मसिद्धोद्भवस्य।
तः संध्याकृतस्य पादेन संध्यापादेन चांशतः कृतसंध्यांशकाहीने तेची स्त्रीन्यादान्यरस्यरान्
हसंति युगधर्मैस्ते तपश्रुतबलायुषैः ततः कृतांशे क्षीणे तु बभूव तदनंतरं त्रेतायुगमसंप्र
तकृतांशम्ऋषिसत्तमा तस्मिन्क्षीणे कृतांशे तु तच्छिष्टासु प्रजास्विह कल्पादौ संप्रवृत्तायास्ते।
तायाः प्रमुखे तदा प्रणश्यति तदा सिद्धिः कालयोगेन नान्यथा तस्यां सिद्धौ प्रनष्टायां मन्या सिद्धिः
प्रवर्त्तत अपां सौक्ष्म्ये प्रतिगते तदा मेघात्मना तु तौ मेघेभ्यः स्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्जनं सकृदे
वतया वृष्ट्या संयुक्ते पृथिवीतले प्रादुरासंस्तदा तासां वृक्षास्तु गृहसंस्थिताः सर्वप्रत्युपभोगस्तु

तासांतेभ्यःप्रजायते वर्न्नयातेभिनेभ्यस्तास्त्रेतायुगामुखेप्रजाः ततःकालेनमहता तासामेवविपर्ययात्
रागलोभात्मकोभावस्तदाह्याकस्मिकोभवेत् यत्तद्भवतिनारीणांजीवितान्तेतदार्त्तवं तदातद्वै
नभवतिपुनर्युगवलेनतु तासांपुनःप्रवृत्तेतुमासेमासेतदार्त्तवं ततस्तेनैवयोगेनवर्त्ततामिथु
नेनतदा तासांतत्कालभाविन्यामासिमास्युपगछतां अकालेह्यार्त्तवोत्पत्तिर्भागोत्पत्तिरजायत
विपर्ययेणतासांतुकालेनैवभाविना प्रणस्यन्तिततःसर्वेवृक्षास्तेगृहसंस्थिताः ततस्तेषु
प्रनष्टेषुविभ्रान्ताव्याकुलेन्द्रियाः अभिध्यायंतितांसिद्धिंसत्याभिध्यायिनस्तदा प्रादुर्बभूवुस्ता
सांतुवृक्षास्तेगृहसंस्थिताः वस्त्राणिचप्रसूयंतेफलेष्वाभरणानिच तेष्वेवजायतेतासांगंधव
र्णरसान्वितं अमाक्षिकंमहावीर्यंपुटकेपुटकेमधु तेनतावर्त्तयंतीस्ममुखेत्रेतायुगस्यवै हृ
ष्टतुष्टास्तयासिद्ध्याप्रजावैविगतज्वराः पुनःकालान्तरेणैवपुनर्लोभावृतास्तुताः वृक्षांस्ता
न्पर्यगृह्णंतमधुवामाक्षिकंवलात् तासांतेनापचारेणपुनर्लोककृतेनवै प्रविष्टामधुनासार्द्धं
कल्पवृक्षाःक्वचित्क्वचित् तस्यामेवाल्पशिष्टायांसंध्याकालवशात्तदा वर्त्ततांतुतदातासां

द्वंद्वान्यभ्युत्थितानि तु शीतवातातपैस्तीव्रैः ततस्ता दुःखिता भृशं द्वंद्वैस्ताः पीड्यमानास्तु चक्रु
रावरणानि च कृत्वा द्वंद्वप्रतीकारं निकेतानि हि भेजिरे पूर्वं निकामचारास्ता अनिकेता अथावसं
यथायोगं यथाप्रीति निकेतेष्ववसंस्ततः मरुधन्वसु निम्नेषु पर्वतेषु नदीषु च संश्रयंति चा
दुर्गाणि धन्वानं शाश्वतोदकं यथायोगं यथाकामं समेषु विषमेषु च आरब्धास्ते निकेता वै क
र्तुं शीतोष्णवारणं ततस्ता मापयामासुः खेटानि च पुराणि च ग्रामांश्चैव यथाभागं तथैवांतः
पुराणि च तासामायामविष्कंभान् संनिवेशांतराणि च चक्रुस्तदा यथाप्रज्ञं मित्वा मित्वात्म
नोंगुलैः मनोर्थानि प्रमाणानि तदा प्रभृति चक्रिरे यथांगुलं प्रदेशांस्तु वितस्तिर्हस्तविकृधनुषि
च दशात्वंगुलपर्वाणि प्रदेशः संज्ञिकस्तु नैः अष्टांगुलप्रदेशिन्याव्यासप्रादेश उच्यते ता
लस्मृतो मध्यमया गोकर्णस्त्वनामया कनिष्टयावितस्तिस्तु द्वादशांगुल उच्यते रत्नीरंगु
लपर्वाणि संख्ययाचैकविंशतिः भिस्त्रवहस्तस्याद्गुलानि तु निष्कुस्ततो द्विरत्निस्तु द्विचत्वारि
शांगुलं चतुर्हस्तं धनुर्दंडो नालिकायुगमेव च धनुःसहस्रे द्वे त्वत्र गव्यूतिस्तैर्विभाष्यते अष्टौ

श्रं
२९

धनुसहस्राणियोजनंतैर्निरुच्यते एतेनयोजनेनैवसंनिवेशस्ततःकृतः चतुर्णामेवदुर्गाणांस्वस
मुत्थानित्रीणितु चतुर्थंकृत्रिमंदुर्गंतस्यवक्ष्यामहेविधिं सोघोत्सवप्रप्रकारंसर्वंभूतस्थानकाह
तं तदेकंस्वस्तिकंद्वारंकुमारीपुरमेवच श्रोतसीसंहतद्वारंनिखातंपुनरेवच हस्ताष्टौचदश
श्रेष्ठानवाष्टौवापरेमताः खेटानांनगराणांचग्रामाणांचैवसर्वशः त्रिविधानांचदुर्गाणांपर्वतो
दकबंधने त्रिविधानांचदुर्गाणांविष्कंभायाममेवच योजनांचविष्कंभमष्टभागाईमायतं पर
मार्द्धंहिमायाममंगुरदग्रवर्णंपुरं छिन्नकर्णंविकर्णंतुव्यंजनंकृशसंस्थितं वृत्तहीनंचदीर्घंच
नगरंनप्रशस्यते चतुरस्रार्जवंदिक्स्यप्रशस्यंवैपरंपुरं चतुर्विंशतिरायतहस्तानप्रश
स्तंपरं मत्रमध्यप्रशंसंतिहस्तोन्तेष्टविसर्जितं अष्टादिक्षुशतान्यष्टौप्राङ्मुख्यनिवेशने नग
रार्द्धविष्कंभंखेटंग्रामंतस्यार्द्धतः नगराद्योजनंखेटं खेटाद्ग्रामोर्द्धयोजनं द्विक्रोशपरमा
सीमाक्षेत्रंक्रोशसाचवर्धनः विशालत्वपिविस्तीर्णादिशांमार्गास्तुतेकृताः विशहस्तग्रसिमार्गः
सीमामार्गोदशैवतु धनूंषिदशविस्तीर्णःश्रीमान्राजपथस्मृतः नवाजिरथनागानांसर्वं

राम.
२९

वायस्तु संचरः यत्नं स्थिचैव चत्वारि शालाग्राम्यास्तैः कृताः गृहरथ्योपरथ्याश्च द्विकाश्चाप्यथ रथ्य
काः घंटापथश्च तस्मादः त्रिपदं च गृहांतरं वृत्तिमार्गास्त्वर्द्धपदं प्राग्वंशाः परिकुः स्मृतः अवस्का
यरीवारं पदमात्रं समंततः कृतेषु तेषु स्थानेषु पुनश्चक्रुर्गृहाणि वै यथा ते पूर्वमासन्वै वृक्षास्तु।
गृहसंस्थिताः तथा कर्त्तुं समारब्धाश्चिंतयित्वा पुनः पुनः वृक्षाश्चैव गतास्तास्वा नताश्चैव परागताः
अत ऊर्द्ध्वं गतास्तास्वा न्यायपर्वेत्तिर्यग्गतास्तथा बुद्ध्वान्विष्य तथा न्यायावृत्तशाखा यथागता तथा कृता
स्तु लैः शाखा न स्माच्छालास्तास्तु स्मृताः एवं प्रसिद्धा शाखाभ्यः शालाश्चैव गृहाणि च तस्मात्ता वै स्मृ
ताः शालाः शालात्वं चैव तास्ततः प्रसीदति मनस्ताहृ तनमः प्रासादयं स्मृताः तस्माद्गृहाणि शाला
श्च प्रासादाश्चैव संज्ञिताः कृत्वा द्वंद्वापघातास्ता न्वार्त्तोपायमचिंतयन् नष्टेषु मधुना सार्द्धं कल्प
वृक्षेषु वै तदा विषादव्याकुलास्ता वै प्रजाः कृत्स्नाः क्षुधात्मिकाः ततः प्रादुर्बभौ तासां सिद्धिस्त्रेतायु
गे पुनः वार्त्तार्थसाधकाप्यन्या वृष्टिस्तासां हि कामतः तासां वृष्ट्युदकानीह यानि निम्नैर्गतानि
तु वृष्ट्या निम्नानि रभवन्स्रोतःखातानि निम्नगाः एवं नद्यः प्रवृत्तास्तु द्वितीये वृष्टिसर्जने येपर

वा॰ पु॰ ३०

लापन्नांस्तोकाश्चापन्नाः पृथिवीतले अपां भूमेश्च संयोगादोषध्यस्ता ह्यचाभवन् पुष्पमूलफलिन्य
स्तु ओषध्यस्ताः प्रजज्ञिरे अफालकृष्टाश्चानुप्ता ग्राम्यारण्याश्चतुर्दश ऋतुपुष्पफलाश्चैव वृक्षगु
ल्माश्च जज्ञिरे प्रादुर्भावस्तु त्रेतायां वार्त्तायां ओषधस्य तु तेनौषधेन वर्त्तंते प्रजास्त्रेतायुगे तदा ततः
पुनरभूत्तासां रागो लोभस्स सर्वशः अवश्यंभाविनार्थेन त्रेतायुगवशेन तु ततस्ताः पर्यगृह्णंत
नदीक्षेत्राणि पर्वतान् वृक्षगुल्मौषधीश्चैव प्रसह्य तु यथाबलं सिद्धात्मानस्तु ये पूर्वं व्याख्याता
नाः कृते मया ब्रह्मणो मानवास्ते वै उत्पन्नास्ते जनादिह शांताश्च शुष्मिणश्चैव कर्मिणो दुःखिनस्तदा
ततः प्रवर्त्तमानास्ते त्रेतायां जज्ञिरे पुनः ब्राह्मणाः क्षत्रियो वैश्याः शूद्रा द्रोहिजनास्तदा भाविताश्च
र्वजातीषु कर्मभिश्च शुभाशुभैः इतस्तेभ्यो बलायेन सत्यशीला ह्यहिंसकाः वीतलोभा जितात्मा
नो निवसंतीस्म तेषु वै प्रतिगृह्णंति कुर्वंति तेभ्यश्चैव बलास्तु ये तेषां कर्माणि कुर्वंति तेभ्यश्चान्या
ल्पतेजसः परिवर्यास्तु वर्त्तंते तेभ्यश्चान्येऽल्पतेजसः एवं विप्रतिभिन्नेषु प्रयत्नेषु परस्परं तेन द्वे
षेण तासां ता ओषध्यो मिषता तदा प्रनष्टा ह्रियमाणा वै मुष्टिभ्यां ग्राहकता यथा ग्रसद्भूयं कवला



ग्र

ग्राम्यारण्याश्चतुर्दश फलं गृह्णंति पुष्पैश्च फलैः पत्रैश्च या पुनः ततस्तासु प्रतिष्ठासु विप्रोता॥
स्ताः प्रजास्तदा स्वयंभुवं प्रभुं जग्मुः क्षुधाविष्टाः प्रजापतिं वृत्त्यर्थं माभिलिप्सन्तः आदौ त्रेतायुग
स्य तु ब्रह्मस्स्वयंभूर्भगवान् ज्ञात्वा सोऽमनीषितं युक्तं प्रत्यक्षदृष्टेन दर्शनेन विचार्य च ग्रस्ताः पृथि
व्या ओषध्यो ज्ञात्वा प्रत्युदुह्य स पुनः कृत्वा वत्सं सुमेरुं तं ततो दुदोह पृथिवीमिमां दुग्धेयं गौस्तदा ते
न बीजानि पृथिवीतले जज्ञिरे तानि बीजानि ग्राम्यारण्यास्तथा पुनः ओषध्यः फलपाकान्ता
स्सप्तसप्तदश स्मृताः व्रीहयश्च यवाश्चैव गोधूमा अणवस्तथा प्रियंगवो ह्युदाराश्च कारूषाश्च
सचीनकाः माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः आढक्यश्चणकाश्चैव शणास्सप्तद
श स्मृताः इत्येता ओषधीनां तु ग्राम्याणां जातयस्स्मृताः ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतु
र्दश व्रीहयः सयवा माषा गोधूमा अणवस्तिलाः प्रियंगुसप्तमा ह्येते अष्टमीस्तु कुलत्थिकाः श्या
माकास्त्वथ नीवारा जर्तिलाः सगवेधुकाः कुरुविंदा वेणुयवास्तथा मर्कटकाश्च ये ग्राम्यारण्या
स्मृता ह्येता ओषध्यस्तु चतुर्दश उत्पन्नाः प्रथमे ह्येता आदौ त्रेतायुगस्य तु अफालकृष्टा ओषध्यो

ब्र·पु·
३१

ग्राम्यारण्यास्तु सर्वशः वृक्षगुल्मलतावल्ल्यो वीरुधस्तृणजातयः मूलैः फलैश्च रोहत्यो ग्रहतु
ष्पैश्च याः फलं पृथिवी दग्धा बीजानि यानि पूर्वं स्वयंभुवा ऋतुपुष्पफलास्ता वै ओषध्यो जज्ञिरे हि
ह ब्रह्मा स्वयंभूर्भगवान् हस्तासिद्धां तु कर्मजां ततः प्रभृत्यथौषध्यः कृष्टपच्यास्तु जज्ञिरे संसिद्धा
यां तु वार्त्तायां ततस्तासां स्वयंभुवः मर्यादाः स्थापयामास यथारब्धाः परस्परं ये वै परिगृहीतारः
तासमासन्नबलात्मिकाः इतरेषां कृतत्राणान् स्थापयामास क्षत्रियान् उपतिष्ठंति ये तान्वै यावं
तो निर्भयास्तथा सत्यं ब्रह्म यथाभूतं ब्रुवंतो ब्राह्मणास्तु ते ये चान्ये ह्यबलास्तेषां वैशसं कर्म
संस्थिताः कीनाशान्नाशयंति स्म पृथिव्यां प्रागतंद्रिताः वैश्यानेव तु तानाहुः कीनाशान्वृ
त्तिसाधकान् शोचंतश्च द्रवंतश्च परिचर्यासु ये रताः निस्तेजसोऽल्पवीर्याश्च शूद्रांस्तानब्रवी
त्तु सः तेषां कर्माणि धर्मांश्च ब्रह्मा तु व्यदधात्प्रभुः संस्थितौ प्रकृतायां तु चातुर्वर्ण्यस्य सर्व
शः पुनः प्रजास्तु ता मोहात्तान्धर्मान्नान्वपालयन् वर्णधर्मैरजीवंत्यो व्यरुध्यंत परस्परं ब्र
ह्मा तमर्थं बुद्धा तु यथातथ्येन वै प्रभुः क्षत्रियाणां बलं दंडं युद्धमाजीवमादिशत् याजना

राम·
३१

ध्ययनंचैवतनीयंचप्रतिग्रहं ब्राह्मणानांविभुस्तेषांकर्माण्येतान्यथादिशत् पशुपाल्य
वाणिज्यंचकृषिंचैवविशांददौ शिल्पाजीवंभृतिंचैवशूद्राणांव्यदधात्प्रभुः सामान्यानि।
तुकर्माणिब्रह्मक्षत्रविशांपुनः यजनाध्ययनंदानंसामान्यानितुतेषुवै कर्माजीवंततो
दत्तंतेभ्यश्चैवपरस्परं लोकांतरेषुस्थानानितेषांसिद्ध्याददौप्रभुः प्राजापत्यंब्राह्म।
णानांस्मृतंस्थानंक्रियावतां स्थानमैंद्रंक्षत्रियाणांसंग्रामेष्वपलायिनां वैश्यानांमारु
तंस्थानंस्वधर्ममुपजीविनां गांधर्वंशूद्रजातीनांपरिचारेणतिष्ठतां स्थानान्येतानिवर्णा
नांव्यस्ताचारवतांस्वयं ततस्थितेषुवर्णेषुस्थापयामासचाश्रमान् गृहस्थंब्रह्मचारि
त्वंवानप्रस्थंसभिक्षुकं आश्रमांश्चतुरोह्येतान्पूर्वमस्थापयत्प्रभुः वर्णकर्माणियेकेचि।
त्तेषामिहनकुर्वते कृतकर्मक्षितिंप्राहुराश्रमस्थानवासिनः ब्रह्मानानस्थानयेषामा
स्थाश्रमानामनामतः निर्दिष्टार्थंततस्तेषांब्रह्माधर्मान्प्रभाषत प्रस्थानानिवृत्तेषांवै
यमांश्चनियमांश्चैव चातुर्वर्ण्यात्मकः गृहस्थस्याश्रमस्यतः त्रयाणामाश्रमाणांचप्रति

ब्र॰पु
५२

शायो निरेव च यथाक्रमं प्रवक्ष्यामि यमैश्च नियमैश्च तैः दाराग्नयोप्यातिथिश्च इज्या श्राद्धक्रिया प्रजाः
इत्येष वै गृहस्थस्य समासाद्धर्मसंग्रहः दंडी च मेखली चैव ह्यधःस्वायी तथाजिनी गुरुशुश्रूषणे
भैक्ष्ये विद्यार्थी ब्रह्मचारिणः चीरपत्राजिनानि स्युः फलमूलफलैर्वधं उभे संध्ये च गायश्च होमश्चा
रण्यवासिनां आसनं मुसलेभैक्ष्यं मलेयं मूच मेव च अप्रमोदो व्यवहारश्च दयाभूतेषु च क्षमा अ
क्रोधो गुरुशुश्रूषा सत्यं च दशमं स्मृतं दशलक्षणिको ह्येष धर्मः प्रोक्तः स्वयंभुवा भिक्षोर्व्रतानि प
चात्र पंचैवोपव्रतानि तु आचारशुद्धिर्विनयः शौचमाश्रमिकर्म च सम्यग्दर्शनमित्येवं पंचैवो
पव्रतानि तु ध्यानं समाधिर्मनस इंद्रियाणां समागमैरभिद्रुतमप्यावसन् मौनं यविशेषचितैर्विमुक्तः
परिव्रजेद्दर्धं त्रो पच्चितैर्विमुक्तः परिव्रजेद्धर्ममिमं वदंति सर्वत्र प्रेयसे शोक्ताश्चाश्रमाश्चावर्णास्त्वयं
सत्याजेवं तपस्तांतिर्योगपोऽप्य द मष्टविंका वेदत्यागस्य यज्ञाश्च व्रतानि नियमाश्चये न सिद्धं।
तिप्रदुष्टस्य भावदोषउपासते वहिःकर्माणि सर्वाणि प्रसिद्ध्येति कदाचन अंतर्भावप्रदुष्टस्य कुर्व
तोपि पराक्रमान् सर्वस्वमपि यो दद्यात्कलुषेणांतरात्मना न तेन धर्मभाक् स स्याद्भाव एवात्र।

रामः
५२

कारणं एवं देवाश्च पितरः ऋषयो मनवस्तथा तेषां स्थानान्यमुष्मिंस्तु संस्थितानां प्रचक्षते अष्टा
शीतिसहस्राणि ऋषीणामूर्द्धरेतसां स्मृतं तु तेषां तत्स्थानं तदेव गुरुवासिनां सप्तर्षीणां तु यत्स्था
नं स्मृतं तद्वै दिवौकसां प्राजापत्यं गृहस्थानां न्यासिनां ब्रह्मणः क्षयं योगिनाममृतं स्थानं नानाधी
नां न विद्यते स्थानं स्वाश्रमिणां तानि येस्वधर्मव्यवस्थिताः चत्वार एते पंथानो देवयाना विनिर्मि
ताः ब्रह्मणा लोककर्त्रेणाद्ये मन्वंतरे भुवि पंथानो देवयानस्य तेषां द्वारं रविः स्मृतः तथैव पितृ
यानानां चंद्रमा द्वारमुच्यते एवं वर्णाश्रमाणां वै प्रविभागे कृते तदा यदास्य न व्यवर्द्धत प्रजा वर्णाश्रमा
त्मिकाः ततोन्या मानसीः सोथ चक्रे नाममध्ये सृजत्प्रजाः आत्मनः स्थाः शरीराश्च तुल्याश्चैवात्मनो दैवे
तस्मिंस्त्रेतायुगे त्वाद्ये मध्यं प्राप्ते क्रमेण तु ततोन्या मानसीस्तत्र प्रजाः स्रष्टुं प्रचक्रमे ततः सत्वरजोद्रिक्ताः
प्रजाः सोपासृजत्प्रभुः धर्मार्थकाममोक्षाणां वार्तायाश्चैव साधिकाः देवाश्च पितरश्चैव ऋषयो मन
वस्तथा युगानुरूपा धर्मेण येरिमा विचिताः प्रजाः उपस्थिते तदा तस्मिन्प्रजाधर्मे स्वयंभुवः अभिद
ध्यौ प्रजाः सर्वा नानारूपास्तु मानसीः पूर्वोक्ता या मया तुभ्यं जनलोकं समाश्रिताः मन्वंतरक्रमेणेह

कनिष्ठश्चमेमताः ख्यात्यानुवर्त्तैस्तैस्तैस्तुसर्वैर्यैरिहभाविताः कुशलाकुशलप्रायैःकर्मा·
भिस्तैस्सदाप्रजाः तत्कर्मफलशेषेणउपसृष्टाप्रजज्ञिरे देवासुरपितॄन्वैश्चपशुपक्षिसरीसृ।
पैः वृक्षनारककीटत्वैस्तैस्तैर्भाविरूपस्थिताः आधीनार्थंप्रजानांचआत्मनोविविनिर्ममे ॥ ॥
इतिश्रीमहापुराणेवायुप्रोक्तेचातुराश्रमविभागः ॥ सूतउवाच ततोभिध्यायतस्तस्यजज्ञिरे
मानसीप्रजाः तच्छरीरसमुत्पन्नैःकार्यैस्तैःकारणैःसह क्षेत्रज्ञाःसमवर्त्तन्तगात्रेभ्यस्तस्यधीमतः
ततोदेवासुरपितॄन्मानुषांश्चचतुष्टयं सिसृक्षुरंभांस्येतान्यस्वात्मनासमयूयुजत् युक्ता
त्मनस्तमस्तस्यततोमात्रास्वयंभुवः तमभिध्यायतःसर्गंप्रयत्नोभूत्प्रजायतेः ततोस्यजघना
त्पूर्वमसुराजज्ञिरेसुताः असुःप्राणस्मृतोविप्रैस्तज्जन्मानेस्ततोसुराः ययासृष्टासुरास्तन्वा॥
तांतनुंसोव्यपोहत सापविद्धातनुस्तेनसद्योरात्रिरजायत सातमोबहुलायस्मात्ततोरात्रि
स्त्रियायामात्मिका. आवृतातमसारात्रौप्रजास्तस्मात्स्वपन्त्युत दृष्ट्वासुरास्तुदेवेशस्तनुमन्याम
पद्यत अव्यक्तांसत्ववहुलांततस्तांसोभ्ययुयुजत् ततस्तांयुंजतस्तस्यप्रियमासीत्प्रभो कि

स्तु ततोमुखेसमुत्पन्नादीव्यतस्तस्यदेवताः यतोस्यदीव्यतोजातास्तेनदेवाःप्रकीर्त्तिताः
यतोस्यदीव्यतोजातास्तेनदेवाःप्रकीर्त्तिताः देवान्सृष्ट्वाथदेवेशस्तनुमन्यामपद्यत उत्सृ
ष्टासातनुस्तेनसद्योहस्समजायत तस्मादहःकर्मयुक्तादेवताःसमुपासते देवान्सृष्ट्वा
सदेवेशस्तनुमन्यामपद्यत सत्वमात्रात्मकांदेवस्ततोन्यांसोभ्यपद्यत पितृवन्मन्य
मानस्यपुत्रांस्तान्प्रध्यायतःप्रभोः पितरोह्युपपक्षाभ्यांरात्र्यह्नोरन्तरासृजत् तस्मात्तेपि
तरोदेवाःपुत्रत्वंतेषुतेनतत् यायासृष्टास्तुपितरस्तांतनुंसव्यपोहत सापविद्धातनु
स्तेनसद्यःसंध्याप्रवर्त्तत यस्मादहस्तुदेवानांरात्रिर्यासासुरीस्मृता तयोर्मध्येतुवैपै
त्रीयातनुःसागरीयसी तस्माद्देवासुराःसर्वेऋषयोमानवास्तथा तेयुक्तास्तामुपा
सतेब्रह्मणोमध्यमांतनुं ततोन्यांसतुवैब्रह्मातनुंवैप्रत्यपद्यत रजोमात्रात्मिकांयत्तु
मनसासोसृजत्प्रभुः रजःप्रायान्ततःसोपिमानसानसृजन्सुतान् मनसस्तुततस्तस्य
मानसाजज्ञिरेप्रजाः स्पृष्ट्वापुनःप्रजाश्चापिस्वांतनुंतामपोहत सापविद्धातनुस्तेनो

ज्योत्स्नासयत्स्वजायत तस्माद्भवति संहृष्टा ज्योत्स्नायामुद्भवे प्रजाः इत्येतास्तनवस्तेन व्याहृता
महात्मना सद्योरात्र्यहनी वैव संध्या ज्योत्स्ना च जज्ञिरे ज्योत्स्ना संध्यास्तथाहश्च सत्वमात्रात्मकं
त्रयं तमोमात्रात्मिका रात्रिः सा वै तस्मात्त्रियात्मिका तस्माद्देवा दिवा तन्वा दृष्टाः सृष्टा मुखा
त्तु वै यस्मात्तेषां दिवा जन्म बलिनस्तेन ते दिवा तन्वा यदसुरान्रात्रौ जघनादसृजत्प्रभुः
प्राणेभ्यो रात्रिजन्मानो ह्यसह्या निशि तेन ते एतान्येव भविष्याणां देवानामसुरैः सह पितॄणां
मानवानां च अतीतान्यागतेषु वै मन्वन्तरेषु सर्वेषु निमित्तानि भवन्ति हि ज्योत्स्ना रात्र्यहनी सं
ध्या चत्वार्यंभांसि तानि वै भाति तानि वै भाति यस्मात्ततो भांसि भाशब्दोयं मनीषिभिः व्या
प्तिदीप्त्यां निगदितः पुनः स्वाह प्रजापतिः सोंभांस्येतानि दृष्ट्वा तु देवदानवमानवान् पितॄं
श्चैवासृजत्सोन्यानात्मनो विविधान्पुनः तामुत्सृज्य ततस्तं तु ततोन्यां प्राप्य स प्रभुः मूर्तिं
रजस्तमः प्रायां पुनरेवाभ्ययुञ्जत अंधकारे क्षुधाविष्टास्ततोन्यां सृजते पुनः तेन सृष्टाः क्षु
धाविष्टास्तेंभांस्यादातुमुद्यताः अंभांस्येतानि रक्षाम उक्तवन्तश्च तेषु ये राक्षसास्ते स्मृता।

सोकेक्रोधात्मानोनिशाचराः येऽब्रुवन्रक्षामोभोक्षितेमाऽक्ष्याम्परस्परं तेनतेकर्मणायक्षागुह्यः
काःक्रूरकर्मिणः रक्षणात्पालनेचापिधातुरेषाविभाव्यते यएषयक्षितिधातुर्वैविक्षाणेसंनिरुध्य
ते तान्दृष्ट्वाह्यप्रियेणास्यकेशाःशीर्यंतधीमतः शीर्णाश्चाक्रान्तास्यूर्ध्वंतदारोहंततप्रश्चे
हीनामकौरसोवालायस्माद्धैवासमर्पिणः तेषांसर्पव्यालयापःसर्पाश्चंडमसोरगः तस्या
क्रोधोद्भवोयोगाववग्निगर्भःसुदारुणः सन्तुसर्पसहोत्पन्नानानाविवेशविषात्मकान् सयान्सृष्ट्वात
तःक्रोधात्क्रोधात्मानोविनिर्ममे वर्णेनकपिशेनोग्रास्तेभूताःपिशिताशनाः भूतत्वात्तेस्मृता
भूताःपिशाचाःपिशिताशनात् येयन्तोगास्ततस्तस्यगंधर्वाजज्ञिरेतदा धयन्तोक्षयापानुर्वर्णा
नार्थ्यंपरिपठ्यते पिबन्तोजज्ञिरेगांतुगंधर्वास्तेननेस्मृताः सृष्ट्वास्वेतानुसृष्ट्वानादेवयोनिषु
सप्रभुः ततःस्वच्छंदतोन्यानिवयांसिवयसोऽसृजत् क्रोडतस्तानिछंदांसिवयसापिवयांस्यपि
पक्षान्सृष्ट्वापदेवोवैसृजत्पक्षिगणान्नपि मुखतोजान्ससर्जापवक्षसाश्वावयानसृजत् गा
श्चैवउदराद्ब्रह्मापार्श्वाभ्यांचविनिर्ममे पद्भ्यांचाश्वान्समातंगान् शरभानगवयान्मृगान्उष्ट्रा

नश्वतरांश्चैवन्यङ्कूनन्याश्चजातयः ओषध्यःफलमूलेभ्योरोमभ्यस्तस्यजज्ञिरे एवंयज्ञौषधीःसृ
ष्ट्वान्ययुंजत्सोध्वरेप्रभुः तस्मादादौतुकल्पस्यत्रेतायुगमुखेतदा गौरजःपुरुषोमेषोह्यश्वोश्व
तरगर्दभौ एतान्ग्राम्यान्पशूनाहुरारण्यांश्चनिबोधत श्वापदाद्विखुरोहस्तीवानराःपक्षिपंचमा
औदकाःपशवःषष्ठाःसप्तमास्तुसरीसृपाः गायत्रंचऋचश्चैवत्रिवृत्सामरथंतरं अग्निष्टोमंच
यज्ञानांनिर्ममेप्रथमान्मुखात् छंदांसित्रैष्टुभंकर्मस्तोमंपंचदशंतथा बृहत्साममथोक्थं
चदक्षिणादसृजन्मुखात् एकविंशमथर्वाणमाप्तोर्यामाणमेवच अनुष्टुभंसवैराजमुत्तरा
दसृजन्मुखात् विद्युतोशनिमेघांश्चरोहितेंद्रधनूंषिच वयांसिचससर्जादौकल्पस्यभगवान्प्रभुः
उच्चावचानिभूतानिगात्रेभ्यस्तस्यजज्ञिरे तान्येवप्रतिपद्यंतेसृज्यमानाःपुनःपुनः ब्रह्मणोहि
प्रजासर्गंसृजतोहिप्रजापतेः सृष्ट्वाचतुष्टयंपूर्वंदेवासुरपितृन्प्रजाः ततःससर्जभूतानि
स्थावराणिचराणिच यक्षान्पिशाचान्गंधर्वांस्तथैवाप्सरसांगणान् नरकिंनररक्षांसिवयः
पशुमृगोरगान् अव्ययंचव्ययंचैवयदिदंस्थाणुजंगमं तेषांयेयानिकर्माणिप्राक्सृष्ट्यां

तिपेदिरे तान्येव प्रतिपद्यन्ते सृज्यमानाः पुनःपुनः हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते तद्भावि।
प्रपद्यन्ते तस्मात्तत्तस्य रोचते महाभूतेषु नानात्वमिन्द्रियार्थेषु मूर्तिषु विनियोगं च भूतानां धातैव
व्यदधात्स्वयं केचित्पुरुषकारं तु प्राहुर्वचनमानवाः दैवमित्यपरे विप्राः स्वभावं दैवचिन्तकाः पौरु
षं कर्म दैवं च फलवृत्तिस्वभावतः न चैकं न पृथक्भावमधिकं न तयोर्विदुः एतदेवं च नैवं च न चो
भे न चाप्युते कर्मस्था विषयं ब्रूयुः सत्त्वस्थाः समदर्शिनः नामरूपं च भूतानां कृत्यानां च प्रपं
चनं वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः शर्वर्यन्तप्र
सूतानां तान्येवास्मै ददात्यजः यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये दृश्यन्ते तानि तान्येव
तथा भावा युगादिषु एवंविधास्तु सृष्टा हि ब्रह्मणाव्यक्तजन्मना शर्वर्यन्ते प्रबुद्धेन सिद्धिमाश्रित्य
मानसी एवं भूतानि सृष्टानि स्थावराणि चराणि च यदास्य ताः प्रजाः सृष्टा न व्यवर्धन्त धीमतः प्र
यान्यात्मानसात्मसृष्टान्स दृष्टानात्मनोऽसृजत् भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा मरीचिं द
क्षमत्रिं च वसिष्ठं चैव मानसं न च ब्राह्मण इत्येष युगाणि निष्पद्यो मतः तेषां ब्रह्मात्मकानां वेस

ब्र·पु· ३६

वैषांब्रह्मवादिनां ततोसृजत्पुनर्ब्रह्मारुद्रंरोषात्मसंभवं संकल्पंचैवधर्मंच पूर्वेषामपिपूर्वजः अग्रे
ससर्जवैब्रह्मामानसानात्मनः समान् सनंदनं ससनकंविद्वांसंचसनातनं सनत्कुमारंचरितेसनक
चसनंदनं ततेलोकेषुसज्जंतेनिरपेक्षाः सनातनाः सर्वेतेह्यागतज्ञानावीतरागाविमत्सराः तेष्व
तिनिरपेक्षेषुलोकवृत्तानुकारणात् हीरण्यगर्भोभगवान्परमेष्ठीह्यचिंतयत् तस्यरोषात्समुत्प
न्नःपुरुषोर्कसमद्युतिः अर्द्धनारीनरवपुस्तेजसाज्वलनोपमः सर्वतेजोमयंजातमादित्यसमते
जसं विभजात्मानमित्युक्त्वातत्रैवांतरधीयत एवमुक्ताद्विधाभूतःपृथक्स्त्रीपुरुषःपृथक् स
चैकादशधाजज्ञेअर्द्धमात्मानमीश्वरः तेनोक्तालेमहात्मानःसर्वएवमहात्मना जगतोबहुली
भावमधिकृत्यहितैहिताः लोकवृत्तांतहेतोर्हिप्रयतध्वमतंद्रिताः विश्वंविश्वस्यलोकस्यस्था
यनायहितायच एवमुक्तास्तुरुरुदुद्रुवुश्चसमंततः रोदनाद्द्रवणाच्चैवरुद्रानाम्नेतिविश्रु
ताः यैर्व्याप्तमिदंसर्वंत्रैलोक्यंसचराचरं तेषामनुचराल्लोके सर्वलोकवराणाः नैकना
गायुतबलाविक्रांताश्चगणेश्वराः तत्रयासामहाभागाशंकरस्याद्धकायिनी प्रागुक्तानमया

राम· ३६

तुभ्यं सा स्वयंभो सुरोत्तमाः कार्य्यार्थं हि दत्ता तस्याः शक्तं वामेन तस्यासितं आत्मानं विभज्य स्थिता।
सोत्तमा देवी स्वयंभुव मानसात्तात् काहि द्विधा भूता शुक्ला कृष्णा च वै द्विजाः तस्या नामानि वक्ष्यामि शृण
ध्वं सुसमाहिताः स्वाहा स्वधा महाविद्या मेधा लक्ष्मी सरस्वती अपर्णा चैकपर्णा च तथा स्यादेक
पाटला उमा हैमवती षष्ठी कल्याणी चैव नामतः ख्यातिः प्रज्ञा महाभागा लोके गौरीति विश्रु
ताः विश्वरूपमथार्याय पृथग्देहविभागवान् शृणु संक्षेपतस्तस्या यथावदनुपूर्वशः प्रकृ
तिर्नियता रौद्री दुर्गा भद्रा प्रमाथिनी कालरात्रिर्महामाया रेवती भूतनायिका द्वापरान्तविका
रेषु देव्या नामानि मे शृणु गौतमी कौशिकी कार्या चंडी कात्यायनी सती कुमारी यादवी देवी वर
दा कृष्णपिंगला बर्हिध्वजा शूलधारी परमब्रह्मचारिणी माहेन्द्री चेन्द्रभगिनी वृषकन्यैकवास
सा अपराजिता बहुभुजा प्रगल्भा सिंहवाहिनी एकानंशा दैत्यहनी माया महिषमर्दिनी त्व
लिग्रमोघा विन्ध्यनिलया विक्रान्ता गणनायिका देवीनामविकाराणि इत्येतानि यथाक्रमं भ
द्रकाल्याः स्तवोक्तानि देव्या नामानि तत्त्वतः ये पठंति नरास्तेषां विद्यते न पराभवः अरण्ये प्रा

तरेवापि

ब्र॰पु॰ ३२

न्तरेवापि गृहे पथि वा रक्षामेतां प्रयुंजीत जले वापि स्थलेपि वा व्याघ्रकुंभीरचौरेभ्यो भूतस्थाने विशेष
तः अधिष्वपि च सर्वासु देव्या नामानि कीर्त्तयेत् कूर्मकग्रहभूतेष्वपूतनामातृभिः सदा अभ्युदिता।
नो वा स्नानो रक्षामेतां प्रयोजयेत् महादेवीकुलं दैत्युधमभूतहत्यावहं सेकल्यैव कल्यादौज।
त्रिरेव्यत्नयोनितः मानसस्त्वक्रतुचिर्नी मविज्ञेयो ब्राह्मणः सुतः प्राणांत्स्यादसजद्दक्षं च चक्षुर्भ्यां
चिमरीचिनं भृगुस्तु हृदयाज्जज्ञे ऋषिः सलिलजन्मनः शिरसोगिरसं चैव श्रोत्रादत्रिं तथै.
वच पुलस्त्यं च तथो दानाद्व्यानाच्च पुलहं पुनः समानाच्च वसिष्ठं तु अपानान्निर्ममे क्रतु
अभिमानात्मकं भद्रं निर्ममे नीललोहितं इत्येते ब्रह्मणः पुत्राः प्राणजा द्वादशस्मृताः ६
त्येते मानसा पुत्रा विज्ञेया ब्रह्मणः सुताः भृग्वादयस्तु ये सृष्टा नव ते ब्रह्मवादिनः गृहमे
धिपुरातेभ्यः सर्वे धामापि पूर्वजाः व्यतीते प्रथमे कल्पे पुराणे लोकसाधको येराजेता पुभौ
लोके तेजः संक्षिप्तावास्थितौ ताबुभौ योगधर्माणावारोप्यात्मानमात्मनि प्रजाधर्मं च कामं
च वर्त्तयेतां महौजसौ यथापूर्वं तथैवेह कुमार इति चोच्यते तस्मात्सनत्कुमारोयमिति

रा॰म॰ ३२

नामास्यकीर्त्तितं तेषांद्वादशानेवंशादिव्याद्देवगणान्विता क्रियावंतःप्रजावंतोमहर्षिभिर
लंकृता इत्येषप्रकरणोद्भूतोलोकान्सृष्ट्वास्वयंभुवः महदादिविशेषांतोविकारःप्रकृतेःस्वयं
चंद्रसूर्यप्रभोलोकोग्रहनक्षत्रमंडितः नदीभिश्चसमुद्रैश्चपर्वतैश्चसमावृतः पुरैश्चवि
विधाकारैःप्रीतैर्जनपदैस्तथा तस्मिन्ब्रह्मवनेव्यक्तेब्रह्माचरतिशार्वरी अव्यक्तबीजःप्रभ
वःतस्यैवानुग्रहोस्थितः बुद्धिस्कंधमयश्चैवइंद्रियाङ्कुरकोटरः महाभूतप्रशाखश्च
विशेषैःपत्रवांस्तथा धर्माधर्मसुपुष्पस्तुसुखदुःखफलोदयः आजीवःसर्वभूतानांब्र
ह्मवृक्षःसनातनः एतद्ब्रह्मवनंचैवब्रह्मवृक्षस्यतस्यह अव्यक्तंकारणंयत्तुनित्यंसदस
दात्मकं इत्येषोनुग्रहःसर्गोब्रह्मणःप्राकृतस्तुयः मुख्यादयस्तुषट्सर्गाविकृताबुद्धि
पूर्वकाः त्रैकाल्यसंभवर्त्तंतब्रह्मणस्तेभिमानिनः सर्गाःपरस्परस्याथकारणंतेबुधौ
स्मृताः दिव्यौसुपर्णौसयुजौसशाखौपटविदुमौ एकस्तयोर्द्धसवेर्त्तंत्र्यमृतस्यस्तेभिमा
निनः नान्यसर्वात्मनस्तेन: धीमंतोनंयस्यविभाव्यवंति वनाभिर्विचंद्रसूर्यौचनेत्रे दिशः

ब्र॰पु॰
२८

श्रोत्रे च चरणौ चास्य भूमिः सोचिंत्यात्मा सर्वभूतःप्रसूतिः वक्त्रादस्य ब्राह्मणाः संप्रसूतास्तद्वक्षस-
तः क्षत्रियाः पूर्वभागे वैश्याश्चोरुभ्यां यस्य पद्भ्यां च शूद्राः सर्वे वर्णा गात्रतस्तः संप्रसूताः महेश्वरात्स्व
परस्माद्‌व्यक्तादंडमव्यक्तसंभवं अंडाज्जज्ञे पुनर्ब्रह्मा येन लोकाः कृतास्त्विमे ॥ ॥ इति श्रीवायुप्रोक्ते
महापुराणे ॥ सूत उवाच एवंभूतेषु लोकेषु ब्रह्मणा लोककर्तृणा यदा तान प्रवर्त्तन्ते प्रजा
केनापि हेतुना तमोमात्रावृतो ब्रह्मा तदाप्रभृति दुःखितः ततः स विदधे बुद्धिमर्थनिश्चयगा-
मिनीं अथात्मनि समस्राक्षित्तमोमात्रानियामिका राजसत्त्वपरामिश्य वर्त्तमानं स धर्मतः
तप्यति तेन दुःखेन शोकं च क्रे जगत्पतिः तमश्च व्यनुदत्तस्माद्रजस्तच्च समावृणोत् ततमः
प्रतिनुत्तं वै मिथुनं समजायत अधर्माचरणाज्जज्ञे हिंसा शोकादजायत ततस्तस्मिन्समुद्भू-
ते मिथुने चरणात्मनि ततश्च भगवाञ्जासीत्प्रीतिश्चैनमथाभ्रियत स्वां तनुं स ततो ब्रह्मा ता-
मपोहदभास्वरं द्विधाकरोत्स तं देहं अर्द्धेन पुरुषोभवत् अर्द्धेन नारी सा तस्य शतरूपा व्यजा-
यत प्राकृतां भूतधात्रीं तां कामाद्वै सृष्टवान्विभुः सा दिवं पृथिवीं चैव महिम्ना व्याप्य धिष्ठि

राम॰
२८

ता ब्रह्मणः सा तनुरूर्ध्वा द्विविधा आवृत्य तिष्ठति या त्वर्द्धात्सृजते नारी शतरूपा व्यजायत सा देवी
नियुतं तप्त्वा तपः परमदुश्चरं भर्त्तारं दीप्तयशसं पुरुषं प्रत्यपद्यत स वै स्वायंभुवः पूर्वं पुरुषो मनु
रुच्यते तस्यैकसप्ततियुगं मन्वंतरमिहोच्यते लब्ध्वा तु पुरुषः पत्नीं शतरूपामयोनिजां तया
स रमते सार्द्धं तस्मात्सा रतिरुच्यते प्रथमः प्रयोगः कल्पादौ समवर्त्तत विराजमसृजद्ब्रह्मा सो
भवत्पुरुषो विराट् सम्राट् मासरूपात्तु वैराजस्तु मनुः स्मृतः स वैराजः प्रजासर्गः स सर्गे पुरु
षो मनुः वैराजात्पुरुषाद्वीराच्छतरूपा व्यजायत प्रियव्रतोत्तानपादौ पुत्रौ पुत्रवतां वरौ कन्ये
द्वे च महाभागे याभ्यां जाता प्रजास्त्विमाः देवी नाम्ना तथाकूतिः प्रसूतिश्चैव ते शुभे स्वायंभुवः
प्रसूतिं तु दक्षाय व्यसृजत्प्रभुः प्राणो दक्षस्तु विज्ञेयः संकल्पो मतु रुच्यते रुचेः प्रजापतेश्चैवाऽऽकू
तिं प्रत्यपादयत् आकूत्यां मिथुनं जज्ञे मानसस्य रुचेः शुभे यज्ञश्च दक्षिणा चैव वमकौ संब
भूवतुः यज्ञस्य दक्षिणायां च पुत्रा द्वादश जज्ञिरे यामा इति समाख्याता देवाः स्वायंभुवेऽन्तरे य
मस्य पुत्रा यज्ञस्य तस्माद्यामास्तु ते स्मृताः अजिताश्चैव शुक्राश्च गणौ द्वौ ब्रह्मणः स्मृतौ यामाः

पूर्वं परिज्ञातं नायेन तमेत्योदितोकसः स्वायंभुव मनायांतु प्रसूत्यां लोकमातरः तस्यां कन्याश्चतुर्विंश॥
दक्षस्त्वजनयत्प्रभुः सर्वास्ताश्च महाभागाः सर्वाः कमललोचनाः योगपत्न्यश्च ता सर्वास्ता योगमातरः
सर्वाश्च ब्रह्मवादिन्यः सर्वा विश्वस्य मातरः श्रद्धा लक्ष्मी धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा बुद्धिर्ल
ज्जा वपुः शांतिः सिद्धिः कीर्त्तिस्त्रयोदशी यत्न्यर्थं प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः द्वाराण्येतानि।
चैवास्य विहितानि स्वयंभुवा ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ख्यातिः सत्यथ संभू
तिः स्मृतिः प्रीतिः क्षमा तथा संनतिश्चानसूया च ऊर्जा स्वाहा स्वधा तथा तास्तनः प्रत्यपद्यंत पुनर
न्ये महर्षयः रुद्रो भृगुर्मरीचिश्च अंगिराः पुलहः क्रतुः पुलस्त्यात्रिवसिष्ठश्च पितरोग्निस्तथैव
च सतीं भवाय प्रायच्छ ख्यातिं च भृगवे तथा मरीचये च संभूतिं स्मृतिं मंगिरसे ददौ प्रीतिं चै
व पुलस्त्याय क्षमां वै पुलहाय च क्रतवे संनतिं नाम अनसूयां तथात्रये ऊर्जां ददौ वसिष्ठाय स्वाहा
वैयग्नये ददौ स्वधां चैव पितृभ्यस्तु तास्वपत्यानि बध्यते एताः सर्वे महाभागाः प्रजास्वानुष्ठिताः।
स्थिताः मन्वंतरेषु सर्वेषु यावदाहूत संप्लवं श्रद्धा कामं विजज्ञे वै दर्पो लक्ष्मीसुतः स्मृत भ

स्यास्तु नियमः पुत्रः तुष्ट्याः संतोष उच्यते पुष्ट्याल्लोभस्तस्यापि मेधा पुत्रः श्रुतस्तथा क्रियायास्तु नयः
पुत्रो दंडः समय एव च बुद्धेर्बोधस्तस्यापि अप्रमादश्चैतावुभौ लज्जाया विनयः पुत्रो व्यवसायो व
पोः सुतः क्षेमः शान्तिसुतस्यापि सुखं सिद्धेर्व्यजायत यशः कीर्तिसुतस्यापि इत्येते धर्मसूनवः
कामस्य हर्षः पुत्रो वै देव्या रत्यां व्यजायत इत्येष वै सुखोदर्कः सर्गो धर्मस्य कीर्त्तितः जज्ञे हिंसा त्व
धर्माद्वै निकृतिश्चानृतावुभौ निकृत्यनृतयोर्जज्ञे भयं नरक एव च मायाच वेदना चापि मिथु
नद्वयमेतयोः भयाज्जज्ञेऽथ सा माया मृत्युं भूतापहारिणं वेदनायास्ततश्चापि दुःखं जज्ञेऽथ रौ
रवात् मृत्योर्व्याधिजराशोकक्रोधासूयाश्च जज्ञिरे दुःखोत्तराः स्मृता ह्येते सर्वे चाधर्मलक्षणाः
नासां भार्यास्ति पुत्रो वा सर्वे ह्यनिधनाः स्मृताः इत्येष तामसः सर्गो जज्ञे धर्मनियामकः प्रजाः सृ
जेति व्यादिष्टो ब्रह्मणा नीललोहितः सोऽभिध्याय सतीं भार्यां निर्ममे ह्यात्मसंभवान् नाधिका
न्न च हीनांस्तान्मानसानात्मनः समान् सहस्रं हि सहस्राणामसृजत् कृत्तिवाससः तुल्यानेवात्म
नः सर्वरूपेनेमौ वलक्षितैः पिंगलान् सनिषंगाश्च सकपर्दान् विलोहितान् विपाशान् हरिकेशा

अट्टहासांश्च कपालिनः बृहद्रूपान्विरूपांश्च त्रिरूपांश्च रूपिणः रथिनो वर्मिणश्चैव चर्मिणश्च
वरूथिनः सहस्रशतबाहूंश्च दिव्यान्भौमान्तरिक्षगान् स्थूलशीर्षानष्टदंष्ट्रान्द्विजिह्वांस्त्रि
लोचनान् अन्नादान्पिशितादांश्च आज्यपान्सोमपास्तथा मेढ्रपांश्चातिकायांश्च शितिकंठोग्र
मन्यवः सोपासंगवलत्रांश्च धन्विनो ह्यरूपवर्मिणो आसीनान्धावतश्चैव जृंभतश्चैव धिष्ठितान्
अध्यायिनो जपन्त्यतो युंजतो ध्यायतस्तथा ज्वलतो वर्षतश्चैव द्योततो धूपितांस्तथा बुधान्बुध
तमांश्चैव ब्रह्मिष्ठाञ्छुभदर्शनान् नीलग्रीवान्सहस्राक्षान्सर्वांश्चाप्यहिपाचरान् अदृश्या
न्सर्वभूतानां महायोगान्महौजसः रुदतो द्रवतश्चैव एवं युक्तान्सहस्रशः अयातयाममसृजा
त्तद्रूपान्सृजत्तमान् ब्रह्मा दृष्ट्वाब्रवीदेतान्मा स्म हासीरीदृशीः प्रजाः सृजेस्त्वं नात्मनस्तुल्याः
प्रजा नैवाधिकास्त्वया अन्याः सृज त्वं भद्रं ते प्रजा वै मृत्युसंयुताः नारप्स्यतेह कर्माणि प्रजा विगत
मृत्यवः एवमुक्तोऽब्रवीदेनं नाहं मृत्युसमन्विताः प्रजाः स्रक्ष्यामि भद्रं ते स्थितोऽहं त्वं सृज प्रजाः ए
ते ये वै मया सृष्टा विरूपा नीललोहिताः सहस्राणां सहस्रं तु आत्मनो मे निःसृताः एते देवा भविष्य

तिरुद्रनामानमहाबलाः पृथिव्यामंतरिक्षे च रुद्रानाम्नाप्रतिष्ठिताः शतरुद्रसमाम्नाताभविष्यंती
हयज्ञिकाः यज्ञभागोभविष्यंतिसर्वेदेवगणैःसह मन्वंतरेषुयेदेवाभविष्यंतीहछंदजाः साईश्मी
ष्ममानानास्तेस्यास्संतीहयुगक्षयात् एवमुक्तःसदाब्रह्मामहादेवेनधीमता प्रत्युवाचतदाभी
मंकृष्यमाणःप्रजापतिः एवंभवतुभद्रंतेयथ्योनेव्याकृतंप्रभो ब्रह्मणासमनुज्ञातेतदासर्वमभू
त्किल ततःप्रभृतिदेवेशोनप्रासूयतवैप्रजाः ऊर्ध्वरेतास्थितःस्थाणुर्यावदाहूतसंप्लवं यस्माद्यो
क्तःस्थितोस्मीतिततःस्थाणुरितिस्मृतः ज्ञानवैराग्यमैश्वर्यंतपःसत्यक्षमाधृतिः स्रष्टृत्वमा
त्मसंबोधस्त्वधिष्ठातृत्वमेवच अव्ययानिदशैतानिनित्यंतिष्ठंतिशंकरे सर्वान्देवान्सर्षीश्चै
वसमेतानतस्त्वैःसह अत्येतितेजसादेवोमहादेवस्ततःस्मृतः अत्येतिदेवानैश्वर्याद्बलेनचमहाह
रान् ज्ञानेनचमुनीन्सर्वान्योगाद्भूतानिसर्वशः ऋषयऊचुः ॥ योगतंतपश्चसत्यंचधर्मंचा
पिमहामुने ईश्वरस्यज्ञानसमाधानंचप्रचक्ष्वनः येनयेनचधर्मेणगतिंप्राप्स्यंतिवैद्विजाः त
त्सर्वंश्रोतुमिच्छामोयोगंमाहेश्वरंप्रभो ॥ वायुरुवाच पंचधर्माःपुराणेतुरुद्रेणसमुदाहृताः

ब्र॰पु॰
४२

माहेश्वर्यं यथा प्रोक्तं रुद्रेणाक्लिष्टकर्मभिः आदित्यैर्वसुभिः साध्यैरश्विभ्यां चैव सर्वशः मरुद्भिर्भृगु
भिश्चैव ये चान्ये विबुधालयाः यमः शुक्रपरोगेश्च पितृकालांतकेस्तथा एतैश्चान्यैश्च बहुभिः
ते धर्माः पर्युपासिताः ते वै प्रक्षीणकर्माणः शरद्दावरनिर्मलाः उपासते मुनिगणा मध्याया
त्मानमात्मनि गुरुप्रियहिते युक्ता गुरूणां च प्रियं सदा विमुच्य मानुषं जन्म विहरंति च देव
वत् महेश्वरेण ये प्रोक्ताः पंचधर्माः सनातनाः तान्सर्वान्क्रमयोगेन उच्यमानान्निबोधत प्रा
णायामस्तथा ध्यानं प्रत्याहारोथ धारणा स्मरणं चैव योगोस्मिन्पंच धर्माः प्रकीर्तिताः तेषां क्र
मविशेषेण लक्षणं कारणं तथा प्रवक्ष्यामि यथातत्त्वं यथा रुद्रेण भाषितं प्राणायामगतिं
श्चापि प्राणस्यायाम उच्यते स चापि त्रिविधः प्रोक्तो मंदो मध्योत्तमस्तथा प्राणायामनिरोधस्तु
प्राणायामस्तु संज्ञितः प्राणायामप्रमाणं तु मात्रा द्वादश स्मृता मध्यमश्च द्विरुद्घातश्चतु
र्विंशतिमात्रकः उत्तमस्त्रिरुद्घातो मात्राः षड्विंश उच्यते स्वेदकंपविषादानां जननो द्युत्तम
स्ततः इत्येतत्त्रिविधं प्रोक्तं प्राणायामस्य लक्षणं प्रमाणं च समासेन लक्षणं च निबोधत सिंहो

राम॰
४२

वाऽर्द्धंजरोवापितथान्योवामगोवने गृहीतंसेव्यमानस्तुमद्रुसम्प्रजायते यथाप्राणाद्दुराधर्षः
सर्वेषामकृतात्मनां योगतःसेव्यमानस्तु सएवाभ्यासतोव्रजेत् सचैवहियथासिंहःऽजरोवापि
दुर्बलः कालांतरवशाद्योगागम्यंतेपरिमर्द्दनाः परिधायमनोमंदंयथावच्चाधिगच्छति प
रिधायमनोदेवंतथाजीवतिपूति श्रमयायमनुष्याणांमगोभ्यःसंप्रवर्त्तते यथापरिचितश्चा
येवाहुर्वैवसतोमुखः परिधायमानःरुद्रःशरीरेकिल्बिषंदहेत् प्राणायामेनयुक्तस्यविप्रस्य
नियतात्मनः सर्वेदोषाःप्रणश्यंतिसत्वस्थश्चैवजायते तपांसियानितप्यंतेव्रतानि नियमाश्च
ये सर्वयज्ञफलंचैवप्राणायामश्चतत्समः अब्बिन्दुंयःकुशाग्रेणमासिमासिसमश्नुतो संवत्स
रशतंसाग्रंप्राणायामंचतत्समं प्राणायामैर्द्दहेद्दोषान्धारणाभिश्चकिल्बिषं प्रत्याहारेणविषया
न्ध्यानेनानीश्वरान्गुणान् तस्मायुक्तःसदायोगीप्राणायामपरोभवेत् सर्वपापविनिर्मुक्तःपरं
ब्रह्माधिगच्छति ॥ ॥ इतिश्रीमहापुराणेवायुप्रोक्तेपाशुपतयोगे ॥ ॥ वायुरुवाच एकंम
हांतंदिवसमहोरात्रमथापिवा अर्द्धमासंतथामासमयनाब्दयुगानिच महायुगसहस्राणिच्र

ब्र·पु·
५२

षयस्तपसिस्थिता उपासनेमहात्मानः श्राणाद्विजेनचक्षुषा अतऊर्द्धंप्रवक्ष्यामिप्राणायामस्यप्रयो
जनं फलंचैवविशेषेणयथास्तभगवान्प्रभुः प्रयोजनानि चत्वारि प्राणायामस्यविद्धिवै शांतिः
प्रशांतिर्दीप्तिश्चप्रसादश्चचतुष्टयं घोराकारशिवानांतुकर्मणांफलसंभवं स्वयंकृतानिकाले
नइहामुत्रचदेहिनां पितृमातृप्रदुष्टानांतत्तानिसंबंधसंकरैः त्यपंणाद्विकषायाणांपापानांशां
तिरुच्यते लोभमानात्मकानांहिपापानामपिसंयमः इहामुत्रहितार्थीयप्रशांतिःसउच्य
ते सूर्येंदुग्रहताराणांतुल्यस्तुविषयोभवेत् ऋषीणांचप्रसिद्धानांज्ञानविज्ञानसंपदा अतीता
नागतानांचदर्शनंसांप्रतस्यच बुधस्यसमतायातिदीप्तिस्सातुप्रउच्यते इंद्रियाणींद्रियार्थे
श्वमनःपंचचमारुतान् प्रसादयतियेनासौप्रसादइतिसंज्ञितः इत्येषधर्मःप्रथमःप्राणाया
मश्चतुर्विधः सन्निकटफलोज्ञेयःसद्यःकालप्रसादजः अतऊर्द्धंप्रवक्ष्यामिप्राणायामस्य
लक्षणं आसनंचयथातत्त्वयुंजतोयोगमेवच ओंकारमग्रमंकृत्वाचंद्रसूर्यौनमस्यवै आस
नंस्वस्तिकंकृत्वापद्ममर्द्धासनंतथा समजानुरेकजानुरुत्तानःसुस्थितोपिवा समोदृढो

राम·
५२

सनोभूत्वासंकुम्यचरणावुभौ संवृत्तास्योपबद्धाक्षस्तनरोविष्टभ्यचाग्रतः पार्ष्णिभ्यांवृषणौरक्षय
तथाप्रजननंनयनः किंचिदुन्नामितशिराःशिरोग्रीवांतथैवच संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चा
नवलोकयन् तमःप्रच्छाद्यरजसारजःसत्वेनछादयेत् ततःसत्वस्थितोभूत्वायोगंयुंजन्समा
हितः इंद्रियाणींद्रियार्थेभ्यःमनःपवनमारुतान् निगृह्यसमवायेनप्रत्याहारमुपाक्रमेत्
यस्तुप्रत्याहरेत्कामान्कूर्मोंगानिवसर्वतः तथात्मरतिरेकस्थःपश्यत्यात्मानमात्मनि धृ
त्वाशरीरंतुसवाह्याभ्यंतरंशुचिः आकंठनाभियोगेनप्रत्याहारमुपक्रमेत् कलामात्रांतुविज्ञे
योनिमेषोन्मेषएवच तथाद्वादशमात्रंतुप्राणायामोविधीयते धारणाद्वादशायामोयोगा
वैधारणाद्वयं तथावैयोगयुक्तस्यपैश्चर्यंप्रतिपद्यते वीक्ष्यतेपरमात्मानंदीप्यमानंस्वतेजसा
प्राणायामेनयुक्तस्यविप्रस्यनियतात्मनः सर्वेदोषाप्रणश्यंतिसत्वस्थश्चैवजायते एवंवैनि
यताहारःप्राणायामपरायणः जित्वाजित्वासदाभूमिमारोहेत्तुसदामुनिः अजिताहिमस्य
भूमिः दोषामुत्पादयेद्वहून् विवर्द्धयतिसंमोहंनरोहेदयितांततः नालेनतुयथातेजो
वामर्धोयममूईति [illegible] चिहृद्देपरस्मिन्प्रधारणापरमास्मृता प्राणापानसमायोगात्प्राणाया

प्र°पु
५२

नः सकथ्यते मनसो धारणाचैव धारणेति प्रकीर्त्तिता निवृत्तिर्विषयाणां तु प्रत्याहारः स संज्ञितः
सर्वेषां समवाये तु सिद्धिः स्याद्योगलक्षणा नयेत्तस्य स्वलोकस्य ध्यानं वै सिद्धिलक्षणं ध्यानयुक्तः
सदा पश्येद्दात्मानं सूर्यचन्द्रवत् तथा तत्सदर्शने प्राप्ते हेमप्राप्तः विनिर्दिशेत् देशकालविशे
षस्य विज्ञेया समदर्शिना सत्वयानुपपन्नो तु दर्शनं तु न विद्यते अदेशकालेयोगस्य दर्शनं तु
न विद्यते अग्न्यभ्यासे वने चापि शुष्कपर्णचये तथा जन्तुव्याप्ते श्मशाने वा जीर्णगोष्ठे चतुष्पथे सश
ब्दे सभये वापि चैत्यवल्मीकसंचये उदपाने तथा वापि नद्याधारे कदाचन क्षुधाविष्टस्तथा
शांतो न च व्याकुलचेतनः युञ्जीत परमं ध्यानं योगी ध्यानपरः सदा एतान् दोषान् विनिश्चित्य
प्रमादाद्यो युनक्ति वै तस्य दोषाः प्रजायंति प्रज्ञानाद्यो युनक्ति वै तस्मात्तज्ज्ञानेन युञ्जीत योगी
युञ्जन् समाहितः अप्रमत्तः सदा चैव न दोषान् प्राप्नुयात् क्वचित् तेषां चिकित्सां वक्ष्यामि दोषा
णां च यथाक्रमं यथा गच्छन्ति दोषाश्च प्राणायामसमन्विताः स्निग्धां यवागूं मतत्कसा भुक्त्वा। याम.
तत्रावधारयेत् युञ्जानस्य तु तस्य सत्वस्य स्वदेहिनां एतेन क्रमयोगेन वातगुल्मः प्रशा ५२
म्यति उदावर्त्ते प्रतीकारमिदं कुर्याच्चिकित्सितं भुक्त्वा दधि यवागूं वा मुरु इति तत्रैव ज्वरं वायुग्रं।

ष्यिननतोभित्वावायुदेशे प्रयोजयेत् तथापित्तविशेषस्याहारणां मूर्ध्निधारयेत् भुञ्जानस्यतत्तुत
स्य सत्वस्यैवदेहिनः गदावर्तेप्रतीवाते एतद्रूपाचिकित्सितं सर्वगात्रप्रकंपेनसमारब्धस्य
योगिनः इमांचिकित्सांब्रुवीत तथासंपद्यतेसुखी मनसापर्वतंकिंचिद्धिमवीकंनधारयेत्
उरोघाते उरस्थानेकंठदेशेवधारयेत् त्वचोवघातेतांचाविबाधिर्ये श्रोत्रियेनतथा जिह्वास्वा
नेत्तघातेस्वेस्वेग्रेलेहा च स्वतंनुभिः फलंवैचितयेद्योगीततःसंपद्यतेसुखी हृदयेरूपेसकौ।
लासंधारयेत्सर्वसात्विकौ यस्मिन्यस्मिन्नेजाहेशतस्मिन्युक्तोविनिर्देशेत् योगोत्तत्रसविप्र
स्य ह्रंदरूपाचिकित्सितं वंशकीलेनमूर्द्धीनंधारयानस्यताडयेत् मर्दिकीलंप्रतिष्ठाप्यकाष्ठका
ष्ठेनताडयेत् लयभीतस्यसासंज्ञाततःप्रत्यागमिष्यति अथवाल्पमसंज्ञस्यहस्ताभ्यांतत्रधारये
त् प्रतिलभ्यततःसंज्ञांधारणांमूर्द्धिधारयेत् स्निग्धमध्यंचभुंजीतततःसंपद्यतेसुखी अमा
नुषेणसत्वेनयदावध्यतियोगवित् दिवंचपृथिवींचैववायुमग्निंचधारयेत् प्राणायामेनततः।

सर्वंदुस्समानंवशीभवेत् अथापिप्रविशेद्देहंतत्तत्संप्रतिबोधयेत् ततःसंलभ्ययोगेनधारयान
स्मृईति प्राणायामैर्निर्दग्धंतत्सर्वंविलयंव्रजेत् कुष्ठसर्पापराधंतुधारयेहृदनोदरे महोज्ञ
नलमः सत्पंकृदिकृत्वातुधारयेत् कृदिकृत्वातुसद्वाप्नुतप्यासर्वाघ्नेदेवताः सहस्रेणवदनो।
वपुत्रस्तायीततोजगात् उदकेकंठमात्रेतुधारणंमूर्द्ध्निधारयेत् प्रतिघोतोविषाविद्याधारयेत्स
वेगात्रकौ घोस्मार्कपत्रपुटकैःपिबेद्वल्मीकमृत्तिकां चिकित्सितविधिह्येवविकृतोयोगनि
र्मितः आख्यातस्तुसमासेनयोगदृष्टेनहेतुना अवंतंलक्षणंकिंचिद्विप्रस्यकथ्ययेक्वचित्
अथापिकथ्ययेन्मोहात्तद्विज्ञानप्रलीयते तस्मात्प्रवृत्तियोगस्यनवक्तव्याकथंचन सत्वंत
थारोग्यमलोलुपत्ववर्णप्रभास्वरसौम्यताच गंधःशुभोमूत्रपुरीषमल्पं योगप्रवृत्तिप्रथ
माशरीरे आत्मनःपृथिवीचैवज्वलंतीयदिपश्यति कृतानिविशतेचैवविद्यात्सिद्धिमुपस्थि
तां ॥ ॥ इतिश्रीमहापुराणेवायुप्रोक्ते॥ ॥सूतउवाच अतऊर्ध्वंप्रवक्ष्यामिउपसर्गाययथात

तथा प्रादुर्भवंति ये दोषास्ताञ्छृणु तत्त्वतः देहिनः मानुष्यान्विविधान्कामान्कामयेत तत्त्वतस्त्रियः विद्या
दानफलं चैव उपसृष्टस्तु योगवित् अग्निहोत्रं हविर्यज्ञमेतत्स्त्रयपनं तथा मायाकर्म धनं स्वर्गं
उपसृष्टस्तु कांक्षति एवं कर्मस्वयुक्तस्तु सो विद्यावशमागतः उपसृष्टं तु जानीयाद्बुद्धा चैव वि
सर्जयेत् नित्यं ब्रह्मपरो युक्तः सोपसर्गात्प्रमुच्यते जितप्रत्युपसर्गस्य जितश्वासस्य देहिनः उप
सर्गाः प्रवर्त्तंते सत्वराजसतामसाः प्रतिभाश्रवणा चैव देवानां चैव दर्शनं भ्रमावर्त्तश्च इत्येते सि
द्धलक्षणसंज्ञिताः विद्याकाव्यं तथा शिल्पं सर्ववाचाकृतानि तु विद्यार्थाश्चोपतिष्ठंति प्राति
भस्येव लक्षणं शृणोति शब्दान्श्रोतव्यान्योजनानां शतादपि सर्वज्ञश्चविधिश्रवश्च योगी चो
त्सन्नवद्धिमेत यक्षराक्षसगंधर्वान्नत्सदीप्याश्चापि तथापि तन् प्रेक्षते सर्वतश्चैव उन्मत्तवत्तविनि
र्दिशेत् भ्रमेण भ्राम्यते योगी चोद्यमानो नरात्मना भ्रमेण भ्रान्तबुद्धेस्तु ज्ञानं सर्वं प्रणश्यति वा
र्त्तानाशयते चित्तं चोद्यमानो नरात्मना वर्त्तेनाक्रान्तबुद्धेस्तु सर्वं ज्ञानं प्रणश्यति शाश्वतमना
हाभूतं परं वा केवलं तथा ततस्तु परमं ब्रह्म हृदिस्थमेवानुचिंतयेत् तस्माच्चैवात्मनो दोषास्तु

पसर्गानुपस्थितान् परित्यजेतमेधावीयदिकेछिद्धिमात्मनः ऋषयोदेवगंधर्वायक्षोरगमहासुराः
उपसर्गेषुसंयुक्ताआवर्त्तंतेपुनःपुनः तस्माद्युक्तःसदायोगीलघ्वाहारोजितेंद्रियः तथासमस्तसूक्ष्मे
षुधारणामूर्द्धिधारयेत् ततस्तुयोगयुक्तस्यजितनिद्रस्ययोगिनः उपसर्गास्तथान्येजायंतेप्रा
णात्मकाः पृथिवींधारयेत्सर्वांततश्चाहंकारतः ततोग्निंचैवसर्वेषामाकाशंमनएवच ततः
परांपुनर्बुद्धिंधारयेत्प्रयत्नतः सिद्धीनांचैवलिंगानिदृष्ट्वादृष्ट्वापरित्यजेत् पृथ्वींधारयमाणस्य
मेहसूक्ष्माप्रवर्त्तते आत्मानंमन्यतेनित्यंपृथ्वींगंधश्चजायते आपोधारयमाणस्यआपःसूक्ष्माभ
वंतिहि शीतांरसाप्रवर्त्तंते सूक्ष्माहिमतसन्निभः तेजोधारयमाणस्यतेजःसूक्ष्मंप्रवर्त्तते पा
श्येतेमंडलंसूक्ष्मवायोर्यश्चापिप्रवर्त्तते तथामनोधारयतोमनःसूक्ष्मंप्रवर्त्तते मनसासर्वभूतानां
मनस्त्वेवाप्नोतिहिसः बुद्ध्याबुद्धिंयथायुंजेत्तदाविज्ञायबुध्यते एतानिसप्तसूक्ष्माणिविदित्वायस्तु
योगवित् परित्यजतिमेधावीसबुद्ध्यापरमंव्रजेत् यस्मिन्यस्मिंश्चसंयुक्तोभूतेपश्यतिलक्षणे त
त्रैवसंगंभजतेनैवप्रविनश्यति तस्माद्विदित्वासूक्ष्माणिसंसक्तानिपरस्परं परित्यजतियोबुद्ध्यास

परं प्राप्नुयाद्द्विजः इत्युपते हि महात्मानः आप्तयो दिव्यचक्षुषः संसक्ताः सूक्ष्मभावेषु ते दोषास्तेषु सं
स्थिताः तस्मात्तन्निश्चयः कार्यः सूक्ष्मेष्विह कदाचन ऐश्वर्याज्जायते रागो विरागं ब्रह्म चोच्यते विदि
त्वा सप्त सूक्ष्माणि षडंगं च महेश्वरं प्रधानविनियोगज्ञः परं ब्रह्माधिगच्छति सर्वज्ञता तृप्तिरनादिबो
धः स्वतंत्रता नित्यमलुप्तशक्तिः अनंतशक्तिश्च विभोर्विदित्वा षडाहुरंगानि महेश्वरस्य नित्यं ब्रह्म
धनो युक्तस्तूपसर्गैः प्रमुच्यते जितश्वासोऽपवर्गी स्याज्जितरागस्य योगिनः भूतान्याविश्य तेवापि त्रैलोक्यं
चापि कंपयेत् एतया प्रविशेद्देहं हित्वा देहं पुनस्त्विह मनो ह्यारं स्त्रियो गानामादित्यं च विनिर्दिशेत्
आदानादिंद्रियाणां तु आदित्य इति चोच्यते एतेन विधिना योगी विरक्तः सूक्ष्मवर्जितः प्रकृतिं समा
तिक्रम्य रुद्रलोके महीयते ऐश्वर्यं गुणसंप्राप्तं ब्रह्मभूतं तु तं प्रभुं देवस्थानेषु सर्वेषु सर्वतस्तु निव
र्तयेत् पिशाचेन पिशाचांश्च राक्षसेन च राक्षसान् गंधर्वेण च गंधर्वान् कौबेरेण कुबेरजान् इंद्र
इंद्रमिंद्रेण स्थानेन सौम्यं सौम्येन चैव हि प्रजापतिं तथा देवप्रजापत्येन साधयेत् ब्राह्मं ब्राह्म्येन चा
प्येवं प्रयामत्रयते प्रभुं तत्र सक्तस्तु उन्मत्तो तस्मात्सर्वं प्रवर्तयेत् नित्यं ब्रह्मपरो युक्तः स्यान्नान्यथा ।

वा॰पु॰
४९

निवर्त्तयेत् असज्जमानस्यानेबुद्धिः सर्वगतो भवेत् ॥ ॥ इतिश्रीमहापुराणे वायुप्रोक्ते ॥ वायु
रुवाच अतऊर्द्ध्वं प्रवक्ष्यामि ऐश्वर्यगुणविस्तरं येनयोगविशेषेण सर्वांल्लोकानतिक्रमेत् तत्राष्ट
गुणमैश्वर्यं योगिनां समुदाहृतं तत्सर्वं क्रमयोगेन उच्यमानं निबोधत अणिमा लघिमा चैव महि
मा प्राप्तिरेव च प्राकाम्यं चैव सर्वत्र ईशित्वं चैव सर्वतः वशित्वमथ सर्वत्र यत्रकामावसायिता त
च्चापि विविधं ज्ञेयं ऐश्वर्यं सर्वकामिकं सावद्यं निरवद्यं च सूक्ष्मं चैव प्रवर्त्तते वशित्वमथ सर्वत्र य
त्रकामावसायिता तच्चापि विविधं ज्ञेयं ऐश्वर्यं सर्वकामिकं सावद्यं निरवद्यं च सूक्ष्मं चैव प्रवर्त्तते
सावद्यं नाम यत्तत्वं पंचभूतात्मकं स्मृतं निरवद्यं तथा नाम पंचभूतात्मकं स्मृतं इंद्रियाणि पुनश्चै
व अहंकारश्चैव स्मृतं तत्र सूक्ष्मप्रवृत्तं तु पंचभूतात्मकं पुनः इंद्रियाणि मनश्चैव बुद्धिरहंकारमा
त्मितः तथा सर्वमयं चैव आत्मस्थ्यातिरेव च संयोग एवं त्रिविधः सूक्ष्मेषु च प्रवर्त्तते पुन
रष्टगुणश्चापि तेष्वेवाथ प्रवर्त्तते तस्य रूपं प्रवक्ष्यामि तथाह भगवान्प्रभुः त्रैलोक्ये सर्वभूतेषु
जीवोस्यानियतस्मृतः अणिमा च यथा व्यक्तं सर्वं तत्र प्रतिष्ठितं त्रैलोक्ये सर्वभूतानां दुष्प्राप्यं स

राम॰
४९

स्वेच्छाकृतं नच्चापि भवति प्राप्त्यं प्रथमं योगिनो वस्तात् लंघनं प्लवनं योगैरूपमस्य सदा भवेत् शीघ्रगं
सर्वभूतेषु द्वितीयं तत्पदं स्मृतं त्रैलोक्ये सर्वभूतानां प्राप्तिः प्राकाम्यमेव च महिमाचार्ययोयस्मिन्
स्तृतीयो योग उच्यते त्रैलोक्ये सर्वभूतेषु त्रैलोक्यगमनं स्मृतं प्रकाम्यान्विषयान्भुंक्ते न च प्रतिहतः क्व
चित् त्रैलोक्ये सर्वभूतानां सुखदुःखे प्रवर्त्तते ईशो भवति सर्वत्र प्रविभागेन योगवित् वश्यानि चैव
भूतानि त्रैलोक्ये सचराचरे भवंति सर्वकार्येषु इच्छातो न भवंति च शब्दस्पर्शौ रसो गंधो रूपं चैव मन
स्तथा प्रवर्त्तंते स्येच्छातो न भवंति तत्र चेच्छया न जायते न म्रियते भिद्यते न च छिद्यते न दह्यते न मु
ह्यते न हीयते न च लिप्यते न क्षीयते न क्षरति न खिद्यति कदाचन क्रियते चैव सर्वत्र न तथा विक्रियते न
च गंधरसरूपस्तु स्पर्शशब्दविवर्जितः अवर्णी हीश्वरश्चैव न तथा वर्णस्य कर्हिचित् भुंक्ते च वि।
षयांश्चैव विषयैर्न च भुज्यते ज्ञात्वा तु परमं सूक्ष्मं सूक्ष्मत्वाच्चापवर्गवः व्यापकस्त्वपवर्गाच्च व्या।
पित्वात्पुरुष स्मृतः पुरुषः सूक्ष्मभावात्तु ऐश्वर्ये परतः स्थितः गुणान्तरं तु ऐश्वर्यं सर्वतः सूक्ष्म।
उच्यते ऐश्वर्यमप्रतीघातं प्राप्य योगमनुत्तमम् अपवर्गं ततो गच्छेत् सूक्ष्मं परमं पदं ॥ ॥ इति

ब्र॰पु॰
४७

श्रीमहापुराणे वायुप्रोक्ते ॥ वायुरुवाच नैवेवमागतो ज्ञानाद्रागात्कर्म समाचरेत् राजसं तामसं वापि भु-
क्त्वा तत्रैव युज्यते तथा सुकृतकर्मा तु फलं स्वर्गे समश्नुते तस्मात्स्थानात्पुनश्चेष्टो मानुष्यमनुपद्यते
ब्रह्मपदेवेहि सेवेत ब्रह्मैव परमं सुखं परिश्रमस्तु यज्ञानां महतार्थेन वर्त्तते भूयो मृत्युवशं याति तस्मा-
न्मोक्षपरं सुखं अपेक्षध्यानसंयुक्तो ब्रह्मयज्ञपरायणः मत्सच्या वर्त्तितं प्राक्यो मन्वन्तरशतैरपि दृष्ट्वा।
तं पुरुषं दिव्यं विश्वाख्यं विश्वजीवनं विश्वपादशिरोग्रीवं विश्वेशं विश्वभावनं विश्वगंधविश्वमाल्य-
विश्वांबरधरं प्रभुं गोभिर्महीयमं पतत्रेपतत्रिणं महात्मानं परममतिवरेण्यं कविं पुराणमनुशासि-
तारं सूक्ष्माच्च सूक्ष्मं महतो महान्तं योगेन पश्यन्ति न चक्षुषा तं निरीन्द्रियं पुरुषं रुक्मवर्णं अलिंगं तं
पुरुषं रुक्मवर्णं सलिंगिनं निर्गुणं चेतनं च नित्यं सदा सर्वगतं सुशौचं पश्यन्ति युक्ता ह्यचलं प्रका-
शं सर्वज्ञाविनस्तेजसा दीप्यमानः अपाणिपादोदरपार्श्वजिह्वः अतीन्द्रियोऽप्यतिसुसूक्ष्म एकः पश्य-
ति युक्त्या स च तं प्रकाशं त्वचत्वत्सगुणात्मकस्तः तस्माद्बुद्ध्यावारचबुद्धिरस्ति स वेद सर्वं न च वेदवेद्यः
तमाहुरग्र्यं पुरुषं महान्तं अचेतनानां सर्वगतानां स सूक्ष्मात्प्रसवधर्मिणी प्रवृत्तिं सर्वभूतानां युक्ताः पश्यन्ति।

राम॰
४७

त्तिचेतसा सर्वतः पाणिपादांतं सर्वतोक्षिशिरोमुखं सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति मुक्ता
मुक्तेनचेष्टानं सर्वतस्तु सनातनं पुरुषं सर्वभूतानां तस्माद्दृष्ट्वा तान मुह्यति भूतात्मानं महात्मानं प
रमात्मानमव्ययं सर्वात्मानं परं ब्रह्म तद्वै ध्यात्वा न मुह्यति पवनो हि यथा ग्राह्यो विचरन्सर्वमूर्ति
षु भूरिशेते तथाह्येव तस्मात्पुरुष उच्यते अथ चेत्स धर्मात्तु मावशेषैस्तु कर्मभिः ततस्तु ब्र
ह्मयोन्यां वै शुक्रशोणितसंयुतम् स्त्रीपुंसोः संप्रयोगेण जायते हि पुनः पुनः ततस्तु गर्भकाले
तु कललं नाम जायते कालेन कललं चापि बुद्बुदस्तु प्रजायते मृत्पिंडस्तु यथा चक्रे चक्रावर्तेन
पीडितः हस्ताभ्यां क्रियमाणस्तु विघ्नत्वमुपगच्छति एवमात्मास्थितं युक्तो वायुना समुदीरितः
जायते मनुषस्तत्र यथारूपं तथा मनः वायुसंभवते तेजो वातात्संजायते जलं जलात्संभवति
रश्मिना प्राणः प्राणाच्छुक्रं विवर्द्धते रक्तभागास्त्रयो शुक्रभागाश्चतुर्दश भागतोर्द्ध पलं गत्वा ततो
गर्भे निषेक्ष्यते ततस्तु गर्भसंयुक्तः पंचभिर्वायुभिर्वृतः पितुः शरीरात्प्रत्यंगरूपमस्योपजायते त
तोस्य मातुराहारात्पीतलीढप्रवेशनं नाभिस्रोतप्रवेशेन प्राणधारो हि देहिनां नवमासान्परि

वृ॰
५८

क्लिष्टः सवेष्टितशिरोधरः वेष्टितः सर्वगात्रेश्च मूषार्थायक्रमातः नवमासोषितश्चैवयोनिच्छिद्रा
द्वान्मुखेः ततस्तुकर्मभिः पापैनिरयंप्रतिपद्यते असिपत्रवनेचैव शाल्मलिच्छेदनेद्वयोः तत्रनि
र्भर्त्सनेचैवयथाशोणितभोजने एतास्तुयातनाघोराः कोटीयाकात्तरुः सहः यथाग्लापत्य
विक्लिन्नास्वरूपमुपयातिवै तस्माच्छिन्नाश्च भिन्नाश्च यातनास्थानमागताः एवंजीवस्ततःपापै
र्लप्यमानस्वयंकृतैः प्राप्नुयात्कर्मभिर्घोरं दुःखंवायदिचेतरं एकेनैवतुगंतव्यं सर्वमुत्सृज्यवै
वनं एकेनैवचभोक्तव्यं तस्मात्सुकृतमाचरेत् नहस्तंप्रस्थितंकश्चित्तमनुगच्छति यदनेन
कृतंकर्मतदेनमनुगच्छति तन्निरयमविषयेविभिन्नदेहाशोचंतः सततमनिष्टसंप्रयोगाः प्र
ध्यंतेपरिगतवेदनाघारीरावच्छोभिस्तम्भशामधर्मयातनाभिः कर्मणामनसावाचायदभीक्ष्णं
निषेव्यते तत्प्रसह्यहरत्येनं तस्मात्सुकृतमाचरेत् यथायिचापिणंपस्यात्मावकर्मणिदेहि
नः संसारंतामसंवैषड्विधंप्रतिपद्यते मानुष्यंपशुतांचैव पशुभावात्मृगोभवेत् मृगत्वात्पक्षि
भावंतु तस्माच्चैवसरीसृपः सरीसृपत्वाद्गच्छेद्धि स्थावरत्वंनसंशयः स्थावरेचधुनप्राप्ता

५८

यावदुन्मिषते नरः कुलालचक्रवद्भ्रांतः तत्रैव परिवर्त्तते इत्येवं हि मानुष्यादिसंसारे स्थावरांतिके
विज्ञेयस्तमसो नाम तत्रैव परिवर्त्तते सात्विकस्यापि संसारो ब्रह्मादिः परिकीर्त्तितः पिशाचांतः स वि
ज्ञेयः स्वर्गस्थानेषु देहिनां ब्रह्माद्यं केवलं सत्वं स्थावरे केवलं तमः चतुर्द्दशानां स्थानानां मध्ये वि
ष्टंभकं रजः मर्म्मसु छिद्यमानेषु वेदनावर्त्तं देहिनः तस्य परमं ब्रह्म सकृत्पश्य विप्रस्सारिष्यति संस्का
रात्सर्वधर्मस्य भावनाया प्रनोदितः मानुष्यं भजते नित्यं तस्मान्नित्यं समाद्धेत ॥ ॥ इति श्री
महापुराणे वायुप्रोक्ते ॥ वायुरुवाच ॥ चतुर्द्दशविधो ह्येतद् बुद्धा संसारमंडलं तथा समारभेत्कर्म
संसारभयपीडितः ततः स्मरति संसारं चक्रेणापरिवर्त्तितः तस्मात्तु सततं युक्तो ध्यानतत्परयुंज
कः तस्मात्समारभेद्योगं अग्निर्वै विश्वतो मुखे हृदिस्थं सर्वभूतानां मुपासीत विधानवित् कृत्वाष्टौ
वाहुतिः सम्यक् चित्तस्तु क्रमानसः वैश्वानरं हृदिस्थं तु यथावत् पूर्वशः आपः पूर्वं सकृत्प्राश्य
तूष्णीं भूत्वानुपासते प्राणाय चेति तेन तस्य प्रथमाहुतिः स्मृता अपानाय द्वितीया तु समानाये
ति चापरा उदानाय चतुर्थी तु व्यानायेति च पंचमी स्वाहाकारैः पृथक् कृत्वा शेषं भुंजीत कामतः आपः पु

वा.पु.
५९

नमस्कृत्याशूपस्थाचमा हृदयं संस्पृशेत् प्राणानां ग्रथिरस्यात्मा रुद्रो ह्यात्मा विशांतकः सरुद्रो ह्यात्मनः
प्राण एवमाप्याययेस्स्वयं त्वं देवानामसि ज्येष्ठ उग्रः त्वं च तु रोवृषा मृत्युर्लोकस्य च मस्तमप्यं भद्रमेनद्भा
तेरुविः एवं हृदयमालभ्य पादांगुष्ठे तु दक्षिणे विन्यस्य दक्षिणं पाणिं नाभिं वै पाणिना स्पृशेत् ह्या
वात्मानं तु भावेनो प्राणेण यानावुदाहृतौ नयो प्राणेनरात्मा स्ववाहोयानो तदुच्यते अन्नं प्राणस्य
प्यात्मानं मत्स्यजीवनमेव च अन्नं ब्रह्म व विज्ञेयं प्रजानां प्रभवस्तथा अन्नाद्भूतानि जायन्ते स्थितिरन्येन
वर्ध्यते वंहूतितेन भूतानां तस्मादन्नं तदुच्यते तदेवाग्नौ हुतं ह्यत्र भजते देवदानवाः गंधर्वयक्षरक्षां
सि पिशाचाश्चान्यमेव च ॥ इति श्रीमहापुराणे वायुप्रोक्ते ॥ वायुरुवाच ॥ अत ऊर्ध्वं प्रवक्ष्यामि
शौचाचारस्य लक्षणं यदनुष्ठाय शुद्धात्मा प्रेत्य स्वर्गं हि वाप्नुयात् उदकार्थीन शौचानां मुनी।
नामुत्तमं पदं यस्तेष्वप्रमत्तस्यात्समुनिर्नावसीदति मानावमानौ द्वावेतौ तावेवाहुर्विषामृते अ।
विमानं विषं तत्र मानस्तम मृतमुच्यते गुरोः प्रियहिते युक्तः सत्तु संवत्सरं वसेत् नियमेष्वप्रमत्तस्तु।
यमेषु वसदा भवेत् प्राप्यानुज्ञां ततश्चैव ज्ञानगममनुत्तमं अविरोधेन धर्मस्य विचरेत्पृथिवीमिमां

५९
राम.

चक्षुः पूतं व्रजेन्मार्गं वस्त्रपूतं जलं पिबेत् सत्यपूतां वदेद्वाणीमिति धर्मानुशासनं आतिथ्यश्राद्ध
यज्ञेषु न गच्छेद्योगवित्क्वचित् एवं कुर्यात्सदा योगी भवेदिति विचारणा वाह्ये विधूमे व्यंगारे सर्वस्मि
न्भुक्तवज्जने विचरेन्मतिमान्भैक्षं सतां धर्ममदूषयन् भैक्षं चरेद्गृहस्थेषु यायावरगृहेषु च
श्रेष्ठा तु परमा चेयं वृत्तिरस्योपदिश्यते अत ऊर्द्धं गृहस्थेषु शालीनेषु चरेद्द्विजः श्रद्दधानेषु दा
न्तेषु श्रोत्रियेषु महात्मसु अत ऊर्द्धं पुनश्चापि अदुष्टापतितेषु च भैक्षचर्या विवर्णेषु जघन्या वृ
त्तिरुच्यते भैक्षं यवागूं तक्रं वा पयो यावकमेव वा फलमूलं विपक्वं वापि स्याकं कणक्लिनो पिवा
इत्येते वै मया प्रोक्ता योगिनां सिद्धिवर्द्धना आहारास्तेषु सिद्धेषु श्रेष्ठं भैक्षमिति स्मृतं अप्बिन्दुं यः कु
शाग्रेण मासे मासे समश्नुते न्यायतो यस्तु भिक्षेत स पूर्वोक्ताद्विशिष्यते योगिनां चैव सर्वेषां श्रे
ष्ठं चान्द्रायणं स्मृतं एकं द्वे त्रीणि चत्वारि शक्तितो वा समाचरेत् अस्तेयं ब्रह्मचर्यं च अलोभस्त्याग
एव च व्रतानि चैव भिक्षूणां अहिंसा परमा ह्येता अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवं नित्यस्वा
ध्याय इत्येते नियमाः परिकीर्तिताः वीजयोनिर्गुणावस्तुर्वद्धः कर्मभिरेव च यथा द्विप इवारण्यम

वा.पु.
९०

तुष्णाणं विहीयते आध्यनेवाविरादेवा अंकुशेनननिवारितः एवंज्ञानेनशुद्धेनदग्धवीजोह्यकल्मषः
विमुक्तबंधनः शांतोमुक्त इत्यभिधीयते वेदैस्तुल्या सर्वयज्ञक्रियास्तु न ज्ञेजयध्यज्ञात्तिनामाकुरग्यं ज्ञा
नाद्यानं सर्वरागाद्ययेततस्मिन्नाश्रमे आश्रमस्तस्योपलब्धिः दमः शमः सत्वमकल्मषत्वं मौनं च भूते
ष्वखिलेतथार्जवं अतींद्रियज्ञानमिदं तथार्जवं प्राहुस्तथा ज्ञानविशुद्धबुद्धयः समाहितो ब्रह्मपरो
प्रमादी शुचिस्तथैवात्मरतिर्जितेंद्रियः समाप्नुयुर्योगमिमं महाधियो महर्षयश्चैवमनिंदितामम
लाः ॥ इति श्रीमहापुराणे वायुप्रोक्ते ॥ वायुरुवाच आश्रमत्रयमुत्सृज्य प्राप्तस्तु परमाश्रमं अतः
संवत्सरस्यांते प्राप्यज्ञानमनुत्तमं अनुज्ञाप्य गुरुंश्चैव विचरेत्पृथिवीमिमां सारभूतमुपासीत ज्ञा
नं यज्ञार्थसाधकं इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत् अपिकल्पसहस्रायुर्नैवज्ञेयमवाप्नुयात् त्य
क्तसंगो जितक्रोधो लघ्वाहारो जितेंद्रियः पिधाय बुद्ध्या द्वाराणि ध्याने ह्येवं मनो दधेत् शून्येष्वेवा
वकाशेषु गुहासु च वने तथा नदीनां पुलिने चैव नित्ययुक्तः सदा भवेत् वाग्दंडः कर्मदंडश्च म
नोदंडश्च ते त्रयः यस्यैते नियता दंडाः स त्रिदंडी व्यवस्थितः अवस्थितो ध्यानरतिर्जितेंद्रियः शुभा

राम.
९०

शुभेहित्यचकर्मणीउभे इदंशारीरंविप्रमुच्यप्राश्वतोनजायते म्रियतेवाकदाचित् ॥ इतिश्रीमहा
पुराणेवायुप्रोक्ते ॥ वायुरुवाच ॥ अतऊर्द्ध्वंप्रवक्ष्यामियतीनामिहनिश्चयं प्रायश्चित्तानितत्वेनयानि
कामकृतानितु अथकामकृतेप्राहु: सूक्ष्मधर्मविदोजना: पापंचत्रिविधंप्रोक्तं वाङ्मन:कायसं
भवं सततंहिदिवारात्रौयेनेदंवेष्टितेजगत् नकर्माणिनचाप्येषतिष्ठन्तीतिपराश्रुति: क्षणमे
वप्रयोक्ष्यंत:आयुषस्तुविधारणात् भयेह्वाराप्रसक्तस्तुयोगाद्धिपरमंवलं नहियोगात्परंकिंचिन्न
राणामिहदृश्यते तस्माद्योगंप्रशंसंतिधर्मयुक्तामनीषिण: अविद्यांविषयातीत्वाप्राप्यैश्वर्यमनु
त्तमं इष्ट्वापरावरंधीरा:परंगच्छंतितत्पदं व्रतानियानिभिक्षूणांतथैवोपव्रतानिच एकैकापक्र
मेतेषांप्रायश्चित्तंविधीयते उपेत्यस्त्रीयंकामात्प्रायश्चित्तंविनिर्दिशेत् प्राणायामसमायुक्तं
कुर्यात्सांतपनंतथा ततश्चरेतिनिर्देशात्कृच्छ्रंसांतेसमाहित: पुनराश्रममागम्यचरेद्भिक्षुरतंद्रि
त: नमर्मयुक्तंवचनंहिनस्तीतिमनीषिण: तथापिचनकर्तव्यंप्रसंगोह्येषदारुण: अहोरा
त्राधिक:कश्चिन्नास्त्यधर्मइतिश्रुति: हिंसाह्येषापरासृष्टादैवतेमुनिभिस्तथा यदेतद्द्रविणंना

मप्राणाश्चैतेवहिस्वराः सततस्पृहयतिप्राणान्योयस्पृहयतेघृतं एवंकृत्वासउद्यात्मानिन्नवृत्तोव्रताच्यु
तः भूयोनिर्वेदमापन्नश्चरेच्चांद्रायणव्रतं विधिनाशास्त्रदृष्टेनसंवत्सरमितिश्रुतिः ततःसंवत्सर
स्यांतेभूयःप्रक्षीणकल्मषः भूयोपिनिर्वेदमापन्नःचरेद्धिस्तुरतेंद्रितः अहिंसासर्वभूतानांकर्मणामन
नसागिरा अकामादपिहिंसेतयदिभिक्षुःपशून्मृगान् कृच्छ्रातिकृच्छ्रंकुर्वीतचांद्रायणमथापि
वा स्कंदेदिंद्रियदौर्बल्यात्स्त्रियंदृष्ट्वायतिर्यदि तेनधारयितव्यावैप्राणायामस्तुषोडशः दिवास्कं
न्नस्यविप्रस्यप्रायश्चित्तंविधीयते त्रिरात्रमुपवासश्चप्राणायामशतंतथा रात्रौस्कन्नःशुचिःस्ना
तोद्वादशैवतुधारणाप्राणायामनशुद्धात्माविरजाजायतेद्विजः एकान्नंमधुमांसंवाह्यामश्राद्धंत
थैवच अभोज्यानियतीनांचप्रत्यक्षलवणानिच एकैकातिक्रमेतेषांप्रायश्चित्तंविधीयते प्राजाप
त्येनकृच्छ्रेणततःपापात्प्रमुच्यते व्यतिक्रमाच्चयेकेचिद्वाङ्मनःकायसंभवाः सद्भिःसहविनि
श्चित्ययद्वयुस्तत्समाचरेत् विशुद्धबुद्धिःसमलोष्टकांचनःसमस्तभूतेषुचरन्समाहितः स्था
नंध्रुवंशाश्वतमक्षयंसतांपरंसगत्वावपुनर्हिजायते ॥ ॥ इतिश्रीमहापुराणेवायुप्रोक्ते॥

वायुरुवाच अतःपरंप्रवक्ष्याम्यरिष्टानिनिबोधत येनज्ञानविशेषेणमृत्युंपश्यतिचात्मनः अ
रुंधतींध्रुवंचैवसोमच्छायांमहापथं योनपश्येन्नसोजीवेन्नरःसंवत्सरात्परं अरश्मिवंतमादित्य
रश्मिवंतंचपावकं यःपश्येन्नसजीवेत्तुमासादेकादशात्परं वमेन्मूत्रंपुरीषंवासुवर्णंरजतंत
था प्रत्यक्षमथवास्वप्नेदशमासान्नजीवति अग्रतःपृष्ठतोवापिखंडंयस्यपदंभवेत् पांशुलेक
र्दमेवापिसप्तमासान्सजीवति काकःकपोतोगृध्रोवानिलीयेद्यस्यमूर्द्धनि क्रव्यादोवाखगःक
श्चित्षण्मासान्नातिवर्त्तते वध्येहायसपंक्तीभिःपांशुवर्षेणवापुनः छायांवापिकृतांपश्येच्च
तुःपंचसजीवति अनभ्रेविद्युतंपश्येद्दक्षिणांदिशमाश्रितां उदकेइंद्रधनुर्वापित्रयोद्वौवासजी
वति अप्सुवायदिवादर्शेआत्मानंयोनपश्यति अशिरस्कंतथात्मानंमासादूर्द्ध्वंनजीवति शाव
गंधिर्भवेद्गात्रंवसागंधिस्तथापिवा मृत्युरुपस्थितस्तस्यअर्द्धमासंसजीवति यस्यवैस्नातमा
त्रस्यहृत्पादंचावशुष्यति धूमोवामस्तकान्नश्येद्दशाहंनसजीवति संभिन्नोमारुतोयस्यमर्मस्था
नानिकृंतति अद्भिःस्पृष्टोनहृष्येत्तस्यमृत्युरुपस्थितः ऋक्षवानरयुक्तेनरथेनाशांतुदक्षिणां

मायांतस्य चतुर्नस्य मे विद्यान्मृत्युमुपस्थितं॥ कृष्णां वरधरां श्यामां मामायंतीं शपवांगना॥ यस्तु येदृशीं
मां शांतस्व स्वप्नेसोपि न जीवति॥ किं वा संस्य कृष्णस्य च स्वप्ने योविप्रियान्नरः॥ नगरे वाथवक्षां हत्वा विद्या
न्मृत्युमुपस्थितं॥ आमलकं न शाखायस्तु ति मज्जंपकसागरे॥ हृष्टाननतां दृशं स्वप्ने स च षष्ठं न जीवति
सूर्योदये प्रत्युपस्थिते यस्य च त्वचं स्वैव श्यावा॥ क्रोधांतीसन्मुखो याति समानायुर्भवेन्नरः॥ यस्यैव स्ना
नमात्रस्य हृदयं पीड्यते भृशं जायते दंत हर्षश्च तं गतायुषमादिशेत्॥ भूयो भूयस्य स्वे यस्य रात्रौ
वा यदि वा दिवा॥ दीपगंधं च यो वेत्ति विंद्यान्मृत्युमुपस्थितं॥ रात्रौ चेंद्रायुधं पश्येत् दिवा नक्षत्रमंड
लं॥ परनेत्रेषु चात्मानं न पश्येन्न स जीवति॥ नेत्रमेकं श्रवे यस्य कर्णौ स्थानाच्च भ्रस्यतः॥ नासा च व
क्रा भवति सज्ञेयो गतजीवितः॥ यस्य कृष्णा खरा जिह्वा पङ्काभानासं च वै मुखं॥ गंधे च पित्तकेरक्तेन
समन्तृत्युपस्थितं॥ मत्तके शोहंस्थैवगायन्नंस्थ्योनरः॥ याम्यां शामभिमुखो गच्छेत् दंतं तस्य
जीवितं॥ यस्य स्वेदसमुद्भूतास्वेत सर्षपसंयुताः॥ स्वेदा भवंति सहसा कृतस्य मृत्युरुपस्थितं॥ उष्ट्रा
वारासभावापि युक्तास्वप्ने रथे शुभाः॥ यस्य सोपि न जीवेत् दक्षिणाभिमुखो गतः॥ दृष्ट्वात्र परमेरिष्टे

पतद्रूतं परं भवेत् योऽयं नस्तु एवात्मकर्णे ज्योतिर्नेत्रे न पश्यति स चेद्योनि पतेत्स्वेदो द्वारं चास्य विधीयते
नेत्रोन्मिह्णतिय: स्वचा तं दंतं तस्य जीवितं यस्तु प्रावरणं शुक्लं स्वकं पश्यति मानव: रक्तं कृष्णमपि
स्वेन तस्य मृत्युरुपस्थित: ऊर्द्ध विद्दृष्टिर्न च संप्रविष्टा रक्ता घूर्न: संपरिवर्त्तमाना मुखस्य चोष्मा।
शुराच नाभिरन्यसमुत्रो विषमस्याय वादिवावायदिवारात्रौ प्रत्यहं यो भिरन्यते तं प्रश्येद्यारं
वारं स हृ तस्तु न जीवति अग्निप्रवेशो ऊरुते स्वप्नान्ते यस्तु मानव: स्मृतिं नोपलभेच्चापि तदंतं तस्य
जीवितं अरिष्टं सुविनं देहे तस्मिन्कालमुपागते मत्वा भयविषादं च उयश्चेद्बुद्धिमान्नर: प्रा
चीनां यदि वोदीचीं दिशां निर्गम्य वै शुचि: समे तिष्ठा वरे देशे विविक्ते जनवर्जिते उदङ्मुख: प्राङ्मु
खो वा स्वस्थ: स्वाचांतपवच स्वस्तिको पनिविष्टश्च नमस्कृत्वा महेश्वरं समकायशिरोग्रीवं धार
येन्नावलोकयेत् यथा दीपो निवातस्थो नेंगते सोमपास्मृता: प्रागुदक्प्रवणे देशे तस्मात्थं जीत
योगवित् कामं वितर्कं प्रीतिं च सुखदुःखे उभे यथा निगृह्य मनसा सर्वं शुक्लं ध्यानमनुस्मरेत् का
त्यमं च विज्ञाय सम्यकृ हुचेव सर्वश: द्वादशाध्यात्म इत्येवं योगधारणमुच्यते शान्तमहाशान्तवाधिथारं

धारयेत् तंतस्य धारणायुक्तो वायुः सर्वं प्रवर्त्तते ततस्त्वापूरयेद्देहं ओंकारेण समाहितः त्वयोंकारमयो
योगी न क्षरेत्त्वक्षरी भवेत् ॥ ॥ इति श्रीमहापुराणे वायुप्रोक्ते ॥ वायुरुवाच अतऊर्ध्वं प्रवक्ष्यामि।
ओंकारप्राप्तिलक्षणं एष त्रिमात्रो विज्ञेयो व्यंजनं चात्र सस्वरा प्रथमा वैद्युती मात्रा द्वितीया तामसी
स्मृता तृतीया निर्गुणां विद्यान्मात्रा मक्षरगामिनी गंधर्वी निच विज्ञेया गांधारस्वरसंयुता पिपीलि
कासमस्पर्शा प्रयुक्ता मूर्द्ध्नि लक्ष्यते प्रयुक्तमोंकारं प्रति निर्वाति मूर्द्धनि ततोंकारमयो योगी त्व
क्षरेत्वक्षरी भवेत् ओंमित्येकाक्षरं ब्रह्म गुहायां निहितं पदं ओमित्येतत्त्रयो वेदास्त्रयो लोकास्त्रयो।
ग्नयः विष्णुक्रमास्त्रयस्त्वेते ऋक्सामानि यजूंषि च मात्राश्चात्र चत्वस्रस्तु विज्ञेया परमार्थतः
तत्र युक्तश्च यो योगी तस्य सालोक्यतां व्रजेत् अकारस्त्वक्षरो ज्ञेय उकारः स्वरितः स्मृतः मकारस्तु प्लु
तो ज्ञेयः त्रिमात्र इति संज्ञितः अकारस्त्वथ भूर्लोक उकारो भुव उच्यते सव्यंजनो मकारश्च।
स्वर्लोकश्च विधीयते ओंकारस्तु त्रयो लोकाः शिरस्तस्य त्रिविष्टपं भुवनांतं च तत्सर्वं ब्राह्मं तत्
पदमुच्यते मात्रापदं रुद्रलोको ह्यमात्रस्तु शिवं पदं एवं ध्यानविशेषेण तत्पदं समुपास्यते

तस्य ध्यानरतिर्नित्यममात्रं हितदुत्तरं ऽणास्पर्शप्रयत्नेन श्वासं चरितं पदमिकृता इस्वा नुप्रथमा मात्रा त
तोदीर्घान्वनंतरं ततः प्लुतवती चैव तृतीया उपदिश्यते एतास्तु मात्रा विज्ञेया यथावदनुपूर्वशः
यावच्चैव तु शक्यते धार्यते तावदेव हि इंद्रियाणि मनो बुद्धिं ध्यायन्नात्मनि यः सदा अर्द्धाष्टमात्रामा
त्रामपि चेद्गृणुयात्फलमाप्नुयात् अष्टिं विंदुकुशाग्रेण मासे पिबेन्नरः संवत्सरशतं पूर्णमात्रया
तदमाप्नुयात् इष्टापूर्तस्य यज्ञस्य सत्यवाक्ये च यत्फले अभक्षणे च मांसस्य मात्रया तदवा
प्नुयात् स्वाम्यर्थे युध्यमानानां शूराणामनिवर्तिनां यज्ञेवत्फलं दृष्टं मात्रया तदवाप्नुयात्
न तथा तपसोग्रेण न यज्ञैर्भूरिदक्षिणैः यत्फलं प्राप्नुयात्सम्यग्मात्रया यदवाप्नुयात् तत्रैकेशा
र्द्धमात्रायः प्लुतो नामो यदिश्यते एष एव भवेत्कार्यो गृहस्थानां तु योगिनां एषु चैव विशेषेण
पुष्पर्द्धं समलक्षणा यो मिमातु विशेषेण पश्यर्यैश्वर्यलक्षणे अणिमाद्येति विज्ञेयात स्मायं
जीनतंता हि जः एवं हि योगी संयुक्तः शुचिर्दान्तो यतेंद्रियः आत्मानं विंदते यस्तु स सर्वं विंदते हि
जाः ऋचो यजूंषि सामानि वेदोपनिषदस्तथा योगध्यानादवाप्नोति ब्राह्मणो ध्यानचिंतकः स

प्र॰उ॰
२८

वैभूतलयो भूत्वा यान्ति वैष्णवं तत्पदं अपि चात्र चरुः संतां ध्यायमानाश्चतुर्मुखी प्रकृतिविश्वरू
पा द्वादशादिभेनचद्वेषा अनामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपां अजोह्ये
को जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः अष्टाक्षरीषोडशपाणिपादा चतुर्मुखी
त्रिशिखामेकशृंगी अयामज्ञां विश्वरूपां स्वरूपां ज्ञात्वा बुधास्त्वमृतत्वं व्रजेति येब्राह्मणप्रव
वेदयेति न ते पुनः संसरंतीह भूयः इत्येतदक्षरं ब्रह्म परमोंकारसंज्ञितं यस्तु वेदयते स
म्यकृतप्याध्यायति वा पुनः संसारचक्रमुत्सृज्य मुक्तो बंधनिबंधनैः अचलं निर्गुणं स्था
नं शिवं प्रोमोत्यसंशयं इत्येतद्धि यमाम्नाक्रमोंकारप्रतिलक्षणं नमो लोकेश्वराय संक
ल्पसंकल्पलक्षणाय महांतमुपतिष्ठेद तद्धोहितं ब्रह्मणे नमः सर्वत्रस्थानेनिर्गुणाया
म सन्नो योगीश्वरायच पुष्करपर्णमिवाद्भिर्विमुद्धमिव ब्रह्ममुपतिष्ठेत्पवित्रं पवित्राणां
पवित्रं विपत्रेण परीस्रुतं पवित्रेण कृत्वदीर्घ स्तुतमिति तद्दतमोंकारमथ्यापूमस्पर्शास्यमदृ
पमपसरस्तमगंधं परिमुपासीत अविचेष्टानाय नमो योगेश्वरायेति येन घौरुग्रा च पृथिवी

ग्राम॰
२८

चेदृष्टायेनसम्यक्लभितंयेननावसयोरंतविदं इमेवरीयसोदेवानांहृदयंविश्वरूपोननसप्र
माणमोपसंचास्ति ॐकारोविश्वविश्वावैयज्ञयज्ञोवैवे:वेवेदोवैनमस्कार:नमस्कारोरुद्र:नमो
रुद्राययोगेश्वराधिपतयेनमोनमः इतिसिद्धप्रत्युपस्थानेसायंप्रातर्मध्याह्नेनमस्कृति सर्वकाम
फलोरुद्रः यथावृंतात्फलंपक्वंपवनेनसमीरितं नमस्कारेणरुद्रस्यतथापापंप्रणस्यति य
थारुद्रनमस्कारःसर्वधर्मफलोध्रुवः अन्यदेवनमस्कारोनतत्फलमवाप्नुयात् तस्मात्त्री
षवणंयोगीउपासीतमहेश्वरं दशविस्तारकंब्रह्मतथाचब्रह्मविस्तरं आकारंसर्वतःकांस्तेस
वैविहतवान्प्रभुः तेनतेप्रभविष्णुत्वेनमस्कारमहायशाः नमस्कारस्तथाचैवप्रणवस्तुवतेप्रभुं
प्रणवंस्तुवतेयज्ञोयज्ञंसस्तुवतेमनः मनस्तुवतिवैरुद्रंतस्माद्रौद्रंपदंशिवं इत्येतानिरहस्या
नियतीनांवैयथाक्रमं यस्तुवेदयतेध्यानंसपरंप्राप्नुयात्पदं ॥ ॥ इतिश्रीमहापुराणेवायुप्रो
क्ते ॥ ॥ सूतउवाच ऋषीणामग्नीकल्पानांनैमिषारण्यवासिनां ऋषिःस्तुतिधरःप्राज्ञःसा
वर्णिर्नामतः तेषांसोग्रणीर्भूत्वावाग्मीवाक्यविशारदः सातत्यंतत्रऊर्द्ध्वतिप्रियार्थंसत्रया॥

ब्रु· २२

जितां विनयेनापसंगम्य पप्रच्छ समहाद्युतिः सावर्णिः ... विभोः पुराणसंबद्धां कथां वै वेदसंमतां
श्रोतुमिच्छामहे सम्यक्प्रसादात्सर्वदर्शिनः हिरण्यगर्भो भगवान्ललाटान्नीललोहितः कथं
तत्तेजसं देवं लब्धवान्पुत्रमात्मनः कथं च भगवान्जज्ञे ब्रह्मा कमलसंभवः रुद्रत्वं चैव स
र्वस्य सात्मजस्य कथं प्रभुः कथं च विष्णो रुद्रेण सार्द्धं प्रीतिरनुत्तमा सर्वे विष्णुमया देवाः सर्वे
विष्णुमया गणाः नहि विष्णुसमा काचिद्गतिरन्या विधीयते इत्येवं सततं देवा गायन्ते नात्र संश
यः एवं यस्य सकथ्यनित्यं प्रमाणं कुरुते हरिः सूत उवाच एवमुक्तेऽथ भगवान्वायुः सावर्णिं।
अब्रवीत् अहो साधु त्वया साधो पृष्टः प्रश्नो ह्यनुत्तमः भवस्य पुत्रजन्मत्वं ब्रह्मणः सोऽभवद्य
था ब्रह्मणः पद्मयोनित्वं रुद्रत्वं शंकरस्य च विस्तरेणानुपूर्व्याच्च शृणु तत्कथयतो मम मन्वंतरस्य
संहारे पश्चिमस्य महात्मनः आसीत्सप्तमः कल्पः पद्मो नाम द्विजोत्तमाः वराहः सांप्रतस्तेषां त
स्य वक्ष्यामि विस्तरं सावर्णिरुवाच कियता चैव कालेन कल्पः संभवते कथं किं च प्रमाणं कल्पा
स्य तत्त्वः प्रब्रूहि सकृत्ता वायुस्त ॥ मन्वंतराणां सर्वेषां कालसंख्यां यथाक्रमं प्रवक्ष्यामि समासत।

राम· २२

नस्रूवनोमेनिबोधतं कोटीनाद्धिःसहस्रैवैःअष्टौकोटिशतानिच द्विःषष्टिस्तुतथाकोट्योनियुता
निचसप्तति: कल्पार्द्धस्यतुसंख्यायामेतत्सर्वमुदाहृतं पूर्वोक्तोचगुणाकेदोवर्षाग्रंलक्षमादिशेत।
प्रातीचैवतुकोटीनामहस्रसप्तति: द्वेवेक्ष्रुतसहस्रेतुनवत्तिनियुतानिच मानुषेणप्रमाणेनयाव
द्देवस्रुतांतरं एषुकल्पस्तुविज्ञेयःकल्पार्द्धद्विगुणाकृते अनागतानांसप्तानामेतदेवयथाक्रमं
प्रमाणंकालसंख्यायाविज्ञेयमतमीश्वरं नियुतान्यष्टपंचाशत्तथाशीतिशतानिच चतुरा
शीतिचान्यानिप्रयुतानिप्रमाणतः सप्तर्षयोमनुश्चैवदेवाश्चेंद्रपुरोगमाः एतकल्पस्यविज्ञेय
वर्षाग्रंतुप्रमाणतः एषमन्वंतरेतेषांमानुषोनोप्रकीर्त्तितः एवंवक्ष्येदेवासाध्यादेवगणा
श्चये विश्वेदेवाश्चयेनित्याःकल्पंजीवंतितेगणाः अयंयोवर्त्ततेकल्पोवराहःसतुकीर्त्यते
यस्मिन्स्वायंभुवाद्याश्चमनवोवैचतुर्दश जायंते कस्माद्वाराहकल्पोयंनामतःपरिकीर्त्ति
तःकस्माच्चकारणाद्धायोवराहइतिकोर्त्यते कोवावराहोभगवान्कस्ययोनिःकिमात्मकःव
राहकल्पमुत्पन्नःएतदिच्छामिविदितं वायुरुवराहस्तुयथोत्पन्नोयस्मिन्नर्थेचकल्पितःव

राहस्यं यथाक्रमः कल्पस्तु कल्पनाश्च या कल्पयोरंतरं यच्च तत्स्वचास्यच कल्पितं तत्सर्वं संप्रव
क्ष्यामि यथा दृष्टं यथाश्रुतं भवस्तु प्रथमः कल्पो कल्पादौ प्रथितः पुरा ज्ञानब्राह्मभगवान्यत्र सा
नेह साम्प्रतः स्वयं ब्रह्मस्थानमिदं दिव्यं प्राप्तं वा दिव्यसंभवं द्वितीयस्तु भुवः कल्पः तृतीयस्तपउ
च्यते भवश्चतुर्थो विज्ञेयः पंचमो रंभ एव च ऋतुकल्पस्तु षष्ठः सप्तमस्तु क्रतुः स्मृतः अ
ष्टमस्तु भवेद्वह्नि नवमो हव्यवाहनः सावित्रो दशमः कल्पो भुवस्त्वेकादशः स्मृतः उशिको
द्वादशस्तत्र कुशिकस्त्रयोदशः चतुर्दशस्तु गांधर्वो गांधारो यत्र वै स्वरः उत्पन्नस्तु यथा नादो
गांधर्वो यत्र चोत्थिता ऋषभस्तु ततः कल्पो ज्ञेयः पंचदशो द्विजाः ऋषभो यत्र संभूतः स
र्वलोकमनोहरः षड्जस्तु षोडशः कल्पः षड्जना यत्र चर्षयः शिशिरश्च वसंतश्च निदाघो
वर्ष एव च शरद्धेमंत इत्येते मानसाः ब्रह्मणः सुताः उत्पन्नाः षड्जसंसिद्धाः पुत्राः कल्पेन षोडशा
यस्माज्जातैश्च तैः षड्भिः सद्योजातो महेश्वरः यस्मात्समुत्थितः षड्जः स्वरस्तु दधिसंभवः ततः सप्त
दशः कल्पो मार्जालीय इति स्मृतः मार्जालीयं तु तत्कर्म यस्माद्ब्रह्मकल्पयत् ततस्त्वमध्यमो।

नामकल्पोष्टादशः उच्यते यस्मिंस्तु मध्यमो नाम स्वरो धैवतपूजितः उत्पन्नः सर्वभूतेषु मध्यमो वै
स्वयंभुवः ततः स्त्वेकोनविंशस्तु कल्पो वैराजकः स्मृतः वैराजो यत्र भगवान्मनुर्वै ब्रह्मणः सुतः
तस्य पुत्रस्तु धर्मात्मा दधीचिर्नाम धार्मिकः प्रजापतिर्महातेजा बभूव त्रिदिशेश्वरः स कामय
त गायत्रीयजमानप्रजापतिं तस्माज्जज्ञे स्वरः सिद्धः पुत्रस्तस्य दधीचिनः ततो विंशतिमः का
ल्पो निषादः परिकीर्त्तितः प्रजापतिस्तु तं दृष्ट्वा स्वयंभूप्रभवं तदा विरराम प्रजासृष्टे निषादस्तु
तपो तप्यत दिव्यं वर्षसहस्रं तु निराहारो जितेंद्रियः तमुवाच महातेजा ब्रह्मा लोकपितामहः
डोद्विग्नं तपोग्लानं दुःखितं त्यपमासितं निषीदेत्यब्रवीत्येनं पुत्रं शांतं पितामहः तस्मा
न्निषादः संभूतः स्वरस्तु स निषादवान् एकविंशतिमः कल्पो विज्ञेयः पंचमो द्विजाः प्राणोऽपा
नः समानश्चोदानो व्यान एव च ब्रह्मणो मानसाः पुत्राः पंचैते ब्रह्मणः समाः तेस्तु पंचवाद्विभिर्गी
तैर्वाग्भिरिष्टो मनोहरः यस्मात्प्रगीयते गीतः पंचभिस्तैर्महात्मभिः स्वरस्तु पंचमः स्निग्धः
तस्मात्कल्पस्तु पंचमः द्वात्रिंशस्तु ततः कल्पो विज्ञेयो मेघवाहनः यत्रा विष्णुर्महाबाहुर्मे।

ब्र॰पु॰
५२

ध्रीभूत्वा महेश्वरं दिव्यं वर्षसहस्रं तत्र वह कृत्वा वासं तस्य निःश्वसमानस्य भाराक्रांतस्य वै मुखात्
निर्जगाम महाकायः कालो लोकप्रतापनः यः स्वयं पश्यते विप्रैर्विश्वैर्वै कश्यपात्मजः त्रयोविंश।
तिमः कल्पो विज्ञेयो चिंतितस्तथा प्रजापतिस्ततः श्रीमान्विज्ञिश्च मिथुनं च तौ ध्यायतो ब्रह्मणश्चै
व यस्माच्चिंतासमुत्थिताः तस्माच्च चिंतकः सो वै कल्पः प्रोक्तः स्वयंभुव चतुर्विंशतिमश्चापि सा
कृतिः कल्प उच्यते आकूतिश्च तथा देवी मिथुनं संबभूव ह प्रजाः सृष्टतथाकूतिं यस्मादासीत्स्व
यंभुवः तस्मात्सपुरुषोत्तेयः आकूतिः कल्पसंज्ञितः पंचविंशतिमः कल्पो विज्ञातिः परिकीर्ति
तः विज्ञातिश्च तथा देवी मिथुनं संप्रसूयत ध्यायतः पुत्रकामस्य मनस्य ध्यानसंज्ञितं विज्ञातं वै
समासेन विज्ञातिस्तु ततः स्मृतः षड्विंशस्तु ततः कल्पो मन इत्यभिधीयते देवी च शंकरी नाम।
मिथुनं संप्रसूयते प्रजां वै चिंतयामास सृष्टुकामस्य वै तदा यस्मात्प्रजासंभवनादुत्पन्नस्तस्य
यंभुवः तस्मात्प्रजासंभव नाभावनाः संभवः स्मृतः सप्तविंशतिमः कल्पो भावो वै कल्पसंज्ञि
तः पौर्णमासी तथा देवी मिथुनं समपद्यत प्रजा वै स्रष्टुकामस्य ब्रह्मणः परमेष्ठिनः ध्यायत

स॰म॰
५२

स्तु परं ध्यानं परमात्मानमीश्वरं अग्निस्तु मंडली भूत्वा रश्मिमालसमन्वितः भुवं दिवं च विष्टभ्य
दीप्यते स महावपुः ततो वर्षसहस्रांते संपूर्णेति मंडले अविष्टया महोत्पन्नमपशात्सूर्यमं
डले यस्माददृष्टो भूतानां ब्रह्मणा परमेष्ठिना दृष्टस्तु भगवानेवं सूर्यः संपूर्णमंडलः स
र्वयोगाश्च मंत्राश्च मंडलेन सहोत्थिताः यस्मात्कल्यासूर्यदृष्टः तस्मात्त्वं दर्शमुच्यते यस्मात्सते
स्मिं संदृष्टो ब्रह्मणः परमेष्ठिनः पुरा वै भगवान्सोमः पौर्णमासी ततः स्मृता तस्मात्तु पूर्वं दर्शो वै
पौर्णमासं च योगिभिः उभयोः पक्षयोर्यो यमात्मनो हितकाम्यया प्रदर्शं च पौर्णमासं च येय
जंति द्विजातयः न तेषां पुनरावृत्तिर्ब्रह्मलोकात्कदाचन यो नाहिताग्निः प्रयतो वीराधान
गतो पि वा समाधाय मनसीद्रं मंत्रमुच्चारयेच्छनैः त्वमेग्न रुद्रो असुरो महो दिवस्त्वं शार्द्धो मा
रुतस्पृक्ष ईशिषे त्वं वातैर्यासि शंकरायत्त्वं पूषावीतधामासि तन्मनाः इत्येवं मंत्रं मनसा सम
मुच्चारयन्द्विजाः अग्निं प्रविष्टास्ते यान्तु रुद्रलोकं सगकृति सोमश्चाग्निस्तु भगवाल्लोककरुड इति
श्रुतिः तस्माद्यः प्रविष्टोदग्निं सकृज्ञात्तु निवर्तते अष्टाविंशतिमः कल्पो विज्ञेयः सत्त्वविं।

तकैः ब्रह्मणः पुत्रकामस्य स्रष्टुकामस्य वैप्रजाः ध्यायमानस्य मनसा बृहत्साम रथांतरं यस्मात्
त्र समुत्पन्नो बृहतः सर्वतोमुखः तस्माद्वै बृहतः कल्पो विज्ञेयः सप्तपंचकैः अष्टाशीतिसहस्रा
णि योजनानां प्रमाणतः रथंतरं तु विज्ञेयं परमं सूर्यमंडलं तस्मादंडं तु विज्ञेयमनेयं सूर्यमंड
लं यत्सूर्यमंडलं चापि बृहत्साम तु भिद्यते भित्वा चैतं द्विजा यांति योगात्मानो दृढव्रताः संघात
मुपनीतास्तु अस्मिन्कल्पे रथांतरे इत्येतत्तु मया प्रोक्तं चित्रमध्यात्मदर्शिनं अतः परं प्रवक्ष्या
मि कल्पानां विस्तरं शुभं ॥ इति श्रीमहापुराणे वायुप्रोक्ते ॥ ऋषय ऊचुः अत्यद्भुतमिदं स
र्वं कल्पानां ते महामुने रहस्यं वै समाख्यातं मंत्राणां च प्रकल्पने न च वा विदितं किंचित्त्रिषु
लोकेषु विश्रुतं तस्माद्विस्तरतः सर्वां कल्पसंख्यां ब्रवीहि नः वायुरुवाच ॥ अत्र वः कथ
यिष्यामि कल्पसंख्यां यथा तथा युगाग्रं च वर्षाग्रं च ब्रह्मणः परमेष्ठिनः एकं कल्पसहस्रं
तु ब्रह्मणोऽहः प्रकीर्तितः एतदष्टसहस्रं तु ब्रह्मणस्तु युगं स्मृतं एकं युगसहस्रं तु सवनं
तत्र जायते सवनानां सहस्रं तु द्विगुणं त्रिवृतं तथा ब्रह्मणः स्थितिकालस्य वै तन्त्र।

वैप्रकीर्त्तितं तस्य संख्यां प्रवक्ष्यामि पुरस्ताद्वै यथाक्रमं अष्टाविंशतिये कल्पा नामतः परिकीर्त्ति
ताः तेषां पुरस्ताद्वक्ष्यामि कल्पसंज्ञा यथाक्रमं रथंतरस्य सामस्य उपरिष्टान्निबोधत कल्पांत
नामधेयानि मंत्रोत्पत्तिश्च यस्य या एकोनत्रिंशकः कल्पो विज्ञेयः श्वेतलोहितः यस्मिंस्तत्प
रमं ध्यानं ध्यायतो ब्रह्मणस्तथा श्वेतोष्णीषः श्वेतमाल्यः श्वेतांबरधरः शिखि उत्पन्नस्तु महाते
जाः कुमारः पावकोपमः भीमंसुरवं महारौद्रं ह्वीवोरं श्वेतलोहितं दीप्तं दीप्तेन वपुषा महास्य
श्वेतवर्चस तद्दृष्ट्वा पुरुषः श्रीमान्ब्रह्मा वै विश्वतो मुखः कुमारं लोकधातारं विश्वरूपं महेश्वरं
पुराणपुरुषं देवं विश्वास्यायोगिनां वरं ववंदे देवदेवेशं ब्रह्मा लोकपितामहः हृदि कृत्वा महा
देवं परमात्मानमीश्वरं सद्योजातं ततो ब्रह्मा ब्रह्म वै समचिंतयत् ज्ञात्वा मुमोच देवेशो हृदि
हासं जगत्पतिः ततोस्य पार्श्वतः श्वेताज्जज्ञयो ब्रह्मवर्चसः प्रादुर्भूता महात्मानः श्वेतमाल्यानु
लेपना सुनंदो नंदकश्चैव विश्वनंदोपनंदनः शिष्यास्तेवै महात्मानो यैस्तद्ब्रह्म ततो वृतं त
स्याग्रे श्वेतवर्णाभः श्वेतनामा महामुनिः विजज्ञेपम महातेजा यस्माज्जज्ञे नरः स्वयं तत्र ते रुष

यः सर्वैस्मयोगात्तं महेश्वरं तस्माद्विश्वरं देवं ये प्रपद्यंति वै द्विजाः प्राणायामपरायुक्ता ब्रह्मणि
व्यवसायिनः ते सर्वे पापनिर्मुक्ता विमला ब्रह्मवर्च्चसः ब्रह्मलोकमतिक्रम्य ब्रह्मलोकं व्रजंति
च वायुरु ॥ ततस्त्रिंशत्तमः कल्पो रक्तो नाम प्रकीर्त्तितः रक्तो यत्र महातेजा रक्तं वर्णमधारये
त् ध्यायतः पुत्रकामस्य ब्रह्मणः परमेष्ठिनः प्रादुर्भूतो महातेजाः कुमारो रक्तविग्रहः रक्त
माल्यांवरधरो रक्तनेत्रः प्रतापवान् स तं दृष्ट्वा महादेवं कुमारं रक्तवाससं ध्यानयोगं परं गत्वा ।
बुबुधे विश्वमीश्वरं स तं प्रणम्य भगवान् ब्रह्मा परमयंत्रितः वामदेवं ततो ब्रह्मा ब्रह्ममेवव्यचिं
तयत् एवं ध्यातो महादेवो ब्रह्मणा परमेष्ठिना मनसा प्रीतियुक्तेन पितामहमथाब्रवीत् ध्याय
ता पुत्रकामेन यस्मात्तेहं पितामह दृष्टः परमया भक्त्या ध्यानयोगेन सत्तमः तस्माध्यानं परं
प्राप्य कल्पे कल्पे महातपः वेत्स्यसे मां महासत्व लोकधातारमीश्वरं एवमुक्त्वा ततः सर्वः श्वा
हृहासं मुमोच ह ततस्तस्य महात्मानश्चत्वारश्च कुमारकाः संबभूवुर्महात्मानो विरजः पुरु
बुद्धयः विरजश्च विवाहुश्च विशोको विश्वभावनः ब्रह्मण्या ब्रह्मणस्तुल्या वीरा अध्यवसायिनः

रक्तांवरधराः सर्वे रक्तमाल्यानुलेपनाः रक्तभस्मानुलिप्तांगा रक्तास्या रक्तलोचनाः ततो
वर्षसहस्रांते ब्रह्मण्याव्यवसायिनः ग्रहं तच्च महात्मानो ब्रह्मत्वं तद्धाम देविकं अनुग्रहार्थं
लोकानां शिष्याणां हितकाम्यया धर्मोपदेशमखिलं कृत्वा ते ब्रह्मणः स्वयं पुनरेव महा
देवं प्रविष्टा रुद्रमव्ययं येपि चान्ये द्विजश्रेष्टा युंजाना वाममीश्वरं प्रपद्यंति महादेवं लग्न
का स्तत्परायणा ते सर्वे पापनिर्मुक्ता विमला ब्रह्मवर्चसः रुद्रलोकं गमिष्यंति पुनरावृत्ति
दुर्लभं ॥ ॥ इति श्रीमहापुराणे वायुप्रोक्ते ॥ वायुरुवाच एकत्रिंशत्तमः कल्पः पीतवासा
इति स्मृतः ब्रह्मा यत्र महातेजा पीतवर्णत्वमागतः ध्यायतः पुत्रकामस्य ब्रह्मणः परमेष्ठिनः
प्रादुर्भूतो महातेजा पीतवस्त्रत्वमागतः पीतगंधानुलिप्तांगं पीतमाल्यधरो युवा पीतयज्ञो
पवीतश्च पीतोष्णीषो महाभुजः तं दृष्ट्वा ध्यानसंयुक्तं ब्रह्मलोकेश्वरं प्रभुं मनसा लोकधाता
रं ववंदे परमेश्वरं ततो ध्यानगतस्तत्र ब्रह्मा माहेश्वरीं परां अपश्यद्गां विरूपाक्षं महेश्वरमुखा
च्युतां चतुष्पदां चतुर्वक्त्रां चतुर्हस्तां चतुस्तनीं चतुर्नेत्रां चतुःशृंगीं चतुर्दंष्ट्रां चतुर्मों

तेजो महो

त्वी द्वात्रिंशाक्षरा लोकसंयुक्ता ईश्वरी सर्वतोमुखी सतां दृष्ट्वा महादेवीं महेश्वरीं पुनराह महादेवः स
वैर्देवैर्नमस्कृतः मतिस्मृतिर्बुद्धिरिति गायमानाः पुनः पुनः प्रसीदेति महादेवी सोऽत्र हृष्ट्वांज
लिर्भवत् विश्वमावृत्य योगेन जगत्सर्वं वशीकुरु अथवा त्वं महादेवी रुद्राणीत्वं भविष्यति ब्रा
ह्मणानां हितार्थाय परमार्थं भविष्यसि अथैनां पुत्रकामस्य ध्यायतः परमेष्ठिनः प्रददौ देवदे
वेशस्तु ध्यात्वा महेश्वरीं ततस्तां ध्यानयोगेन विदित्वा परमेश्वरीं ब्रह्मलोकनमस्कार्यः प्र
पश्यतां महेश्वरीं गायत्रीं तु ततो रौद्रीं ध्यात्वा ब्रह्मा तु यंत्रितः इत्येतां वैदिकीं विद्यां रौद्रीं गाय
त्रीं प्रपंडितां जपित्वा तु महादेवीं रुद्रलोकनमस्कृतां प्रपन्नस्तु महादेवं ध्यानयुक्तेन चेतसा ततः

अथछति

स्तस्य महादेवो दिव्यं योगं बुभुः स्मृतं ऐश्वर्यं ज्ञानसंपत्ति वैराग्यं च ददौ पुनः अथाट्टहासं
मुमुचे भीषणं दीप्तमीश्वरं ततोस्य सर्वतो दीप्ताः प्रादुर्भूताः कुमारकाः पीतमाल्याम्बरध
राः पीतस्रग्गन्धलेपनाः पीतासीपट्टिशाश्चैव पीतास्याः पीतमूर्द्धजाः ततो वर्षसहस्रान्ते
उषित्वा विमलौजसः योगात्मानस्ततो स्नाना ब्राह्मणानां हितैषिणः धर्मयोगबलोपेता

ब्राह्मणानां दीर्घसत्रिणां । उपदिष्टवतस्ते योगं प्रतिष्ठा रुद्रमीश्वरं । एवमेतेन विधिना प्रपन्ना ये महे-
श्वरं । अन्येपि नियतात्मानो ध्यानयुक्ता जितेन्द्रियाः । ते सर्वे पापमुत्सृज्य विरजा ब्रह्मवर्चसः । प्र-
विशंति महादेवं रुद्रं तत्त्वपुनर्भवाः । वायुरुवाच । ततस्त्रिंशत्तिमो नाते कल्पः पीठवर्णः स्वयंभु-
वः । पुनरन्यः प्रवृत्तस्तु सितकल्पो हि नामतः । एकार्णवे तदा वृत्ते दिव्ये वर्षसहस्रके स्रष्टु-
कामः प्रजा ब्रह्मा चिंतयामास दुःखितः । तस्य चिंतयमानस्य पुत्रकामस्य वै प्रभोः । कृष्णः सम-
भवद्वर्णो ध्यायतः परमेष्ठिनः । अथापश्यन्महातेजाः प्रादुर्भूतं कुमारकं । कृष्णवर्णं महावीर्यं
दीप्यमानं स्वतेजसा । कृष्णांबरधरोष्णीषं कृष्णयज्ञोपवीतिनं । कृष्णेन मौलिना युक्तं कृष्णस्नाना-
नुलेपनं । स तं दृष्ट्वा महात्मानममरं घोरसंमितं । ववंदे देवदेवेशं विश्वेशं कृष्णपिंगलं । प्रा-
णायामपरः श्रीमान् हृदि कृत्वा महेश्वरं । मनसा ध्यानसंयुक्तं प्रपन्नस्तु यतीश्वरं । अघोरेति त-
तो ब्रह्मा ब्रह्मरूपं वानुचिंतयन् । एवं वै ध्यायतस्तस्य ब्रह्मणः परमेष्ठिनः । स्मितं च भगवान् रुद्रः
हासं महास्वनं । अथास्य पार्श्वतः कृष्णाः कृष्णस्नानानुलेपनः । चत्वारस्तु महात्मानः संबभूवुः ।

ले

ब्र.पु.
६१
७

ॐ

ऽमारका: कुत्रा:कुत्रांवरघ्रीका:कुत्रास्याकुत्रवासमः तेभ्याहृहासःसमहान् ॐकारस्त्वपु
ष्कलः नमस्कारस्त्वसमहान्पुनः पुनरुदीरितः ततोवर्षसहस्रंतुयोगात्तत्पारमेश्वरं उपासि।
त्वामहाभागाः शिष्येभ्यप्रदत्तः योगेनयोगसंपन्नाःप्रविश्यमनसाशिवं भ्रमन्तोतिगुणस्या
नंप्रविष्टा विश्वमीश्वरीश्वरं एवमेतेनयोगेनयेचान्येचद्विजातयः स्मरिष्यंतिविधात्रींतारो
रुद्रमव्ययं ततस्तस्मिन्गतेकल्पेकृष्णरूपेभयानके ग्रन्थः प्रवर्त्तितः कल्पोविश्वरूपस्तुनाम
नः विनिवृत्तेतुसंहारेपुनःसृष्टेचराचरे ब्रह्मणःपुत्रकामस्यध्यायतःपरमेष्ठिनः प्रादुर्भूता
महानादाविश्वरूपासरस्वती विश्वमाल्यांबरधरंविश्वयज्ञोपवीतिनं विश्वोष्णीषंविश्वगंधंविश्व
स्थानंमहाभुजं अथतंमनसाध्यात्वायुक्तात्मावैपितामह ववंदेदेवमीशानंसर्वेशंसर्वगंप्रभुं ओं
मीशाननमस्तेस्तुमहादेवनमोस्तुते एवंध्यानगतंतत्रप्रणम्यतंपितामहं उवाचभगवानीशः।
प्रीतोहंतेकिंकरोमि ततस्तुप्रणतोभूत्वावाग्भिस्तुत्वामहेश्वरं एतद्वेदितुमिच्छामिकथंवैपर
मेश्वरः कैषाभगवतीदेवीचतुष्पादाचतुर्मुखी चतुःशृंगीचतुर्वक्त्राचतुर्दंष्ट्राचतुःस्तनी चतुर्ह

गं

राम.
६१

स्याचतुर्भेत्रा विश्वरूपा कथं स्मृता किंनामनेत्रो कस्यात्मा किंवीर्या चापि किं मतः महेश्वर उ ॥ रहस्यं
सर्वमंत्राणां पावनं पुष्टिवर्द्धनं शृणुष्वैतत्परं गुह्यं मादिसर्गप्रधानपं अयं योवर्त्तते कल्पो विश्वरू
पस्त्वसौ स्मृतः अस्मिन्संभवा द्वयो देवाः षड्विंशान्नवस्मृता ब्रह्मस्थानमिदं वापि यदाप्राप्तं त्वा
याविभो तदाप्रभृति कल्पश्चत्रे यात्तमोस्य यथाप्राप्तं शतसहस्राणि मतीतायेभ्ययं स्तवः पुरस्तात्त्व
देवेशानानम्मृणुष्व महामुने आनंदस्तु स विज्ञेय आनंदत्वे महानया तालव्यगोत्र तपसा मम
पुत्रत्वमागतः त्वयि योगं च सांख्यं च तपो विद्या विधिक्रिया ऋतं सत्यं च वब्रह्म अहिंसा सन्नतिक्र
माः ध्यानं ध्यानवपुः शांतिर्विद्यामतिर्धृतिः कांतिः शांतिः धृतिर्मेधा लज्जा बुद्धिः सरस्वती तुष्टिः
पुष्टिः क्रियाचैव लज्जा क्षांति प्रतिष्ठिता षड्विंशाकगुणाह्य षाद्वात्रिंशात्तरसंक्षिताः प्रकृतिं विद्धि
तां ब्रह्मत्वप्रसूतिं महेश्वरीं सैषा भगवती देवी त्वत्प्रसूतिः स्वयंभुवः चतुर्मुखी जगद्योनिः प्रकृ
तिर्गौः प्रकीर्तिता प्रधानं प्रकृतिं चैव यामाहुस्तत्वचिंतकाः अजामेतां लोहितां शुक्लकृष्णां विश्वं स
म्पृजमानां सरूपां अजोहं वै बुद्धिमान्विश्वरूपां गायत्रीं गां विश्वरूपां हि बुद्धा एवमुक्त्वा महादेवो।

अट्टहासमथाकरोत् वल्गितास्फोटितरवं कहहाकहहनंदनम् ततोस्य पार्श्वतो देव्याः सर्वरूपाः कुमा
रकाः जटी मुंडी शिखंडी च अर्द्धमुंडश्च जज्ञिरे ततस्ते तु यथोक्तेन योगेन सुमहौजसः दिव्यवर्षसह
स्रांतं उपासित्वा महेश्वरं धर्मोपदेशं नियतं कृत्वा योगमयं दृढं शिष्टानां नियतात्मानः प्रतिष्ठा रु
द्रमीश्वरं वायुरुवाच ततो विस्मयमापन्नो ब्रह्मा लोकपितामह प्रयत्नस्तु महादेवभक्तियुक्तेन चे
तसा उवाच वचनं प्रार्वं सर्वं त्वं तत कथं विभो शिव उ श्वेतकल्पो यदा ह्यासीदहं श्वेतस्ततो भवं श्वेतो
ष्णीषः श्वेतमाल्यः श्वेतांवरधरः शिवः श्वेतास्थि मांसरोमा च श्वेतत्वक् श्वेतलोहितः तेन नाम्नाच
विख्यातः श्वेतकल्पस्तदा ह्यसौ मत्प्रसादाच्च देवेश त्वया गुह्यं प्रदेशतः विज्ञातस्तेन तपसा सद्योजातः
सनातनः सद्योजातेति ब्रह्मैतद्गुह्यं चैव प्रकीर्तितं तस्माद्गुह्यत्वमापन्नं ये वेत्स्यंति द्विजातयः तत्समी
पं गमिष्यंति पुनरावृत्तिदुर्लभं यदाहं च पुनस्त्वासं लोहितो नाम नामतः सो मत्कृतेन वर्णेन कल्पो
वै लोहितः स्मृतः तदा लोहितमांसास्थि लोहितक्षीरसंनिभा लोहिताक्षस्तनवती गायत्री गौः प्र
कीर्तिता ततोस्य लोहितत्वेन वर्णस्य च विपर्यये वामत्वाच्चैव योगस्य वामदेवत्वमागतः तथापि

हि महासत्त्व त्वयाहं नियतात्मना विज्ञातस्त्वेन वर्णेन तस्माद्वर्णो न मे स्मृतः ततोहं वामदेवेति ख्या
तिं यातो महीतले ये चापि वामदेवत्वं ज्ञास्यंतीहि द्विजातयः ये च मां रुद्र रुद्राणीं गायत्रीं मातरं वि
भो सर्वपापविनिर्मुक्ता विरजा ब्रह्मवर्चसः रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं यदा ते पुनरेवा
यं कल्पस्य वर्णो भयानकः मत्कृतेन च वर्णेन मत्कल्पः कृष्ण उच्यते तत्राहं कालसंकाशः कालो लोक
प्रकल्पनः विज्ञातोहं त्वया ब्रह्मन् घोरो घोरपराक्रमः तस्माद्घोरत्वमापन्नं ये मां वेत्स्यंति भूतले ते
षां मघोरः शांतश्च भविष्याम्यहमव्ययः तस्माद्विश्वत्वमापन्नं ये मां वेत्स्यंति भूतले तेषां शिवश्च
सौम्यश्च भविष्यामि सदैव तु तस्माच्च विश्वरूपा वै कल्पोयं समुदाहृतः विश्वरूपा तथा चेयं सा।
वित्री समुदाहृता सर्वरूपास्तथा चेमे संवृत्ता मम पुत्रकाः चत्वारस्ते समाख्याताः पादा वै लोकसं
स्थिताः तस्माच्च सर्ववर्णत्वं प्रजानां च भविष्यति सर्वभक्ष्या च मेध्या च वर्णतश्च भविष्यति मोक्षा
धर्मस्तथार्थश्च कामश्चेति चतुष्टयं तस्माच्चेमानि वेदांश्च चतुष्पादो भविष्यति मोक्षो धर्मस्तथार्थश्च
कामश्चेति चतुष्टयं भूतग्रामाश्च चत्वारश्चत्वारो मम पुत्रकाः तस्माच्चतुर्युगावस्थं जगद्वै सचरा

ब्र॰पु॰
६३

चरं चतुर्द्धावस्थितं चैव चतुष्पादं भविष्यति भूर्लोकःप्रथमोलोकः स्वर्लोकोथमहास्तथा जना।
लपश्च शांतश्च रुद्रलोकस्ततःपरं ब्रह्मणस्त्वस्मनोलोकः स्थाने स्थाने तदक्षरं भुवंद्वितीयंपरंचैवपा।
दश्चत्वारएवच भूर्लोकःप्रथमःपादोभुवोलोकस्ततःपरं स्वर्लोकोथतृतीयस्तुचतुर्थस्तुमह।
स्ततः तत्रलोकपरस्थानंपदंतद्योगिनांस्मृतं निर्ममानिरहंकाराकामक्रोधविवर्जिताः द्रक्ष्यंते
तद्द्विदोयुक्ताध्यानतत्परयाजकाः यस्माच्चतुष्पदाहेषात्वयादृष्टासरस्वती तस्माच्चपशवःसर्वे
भविष्यंतिचतुष्पदाः तस्माच्चैषांभविष्यंतिचत्वारोवैपयोधराः सोमश्चमंत्रसंयुक्तोयस्मान्मम
मुखाच्युतः जीवप्राणभृतांब्रह्मसर्वपीत्वास्तनैर्धृतं तस्मात्सोममयंचैतदमृतंचैवसंज्ञितं चतुष्पा
दात्प्रविष्यंविश्वेतत्त्वंचास्मेनततन् यस्माच्चैवंक्रियाभूत्वाद्विपादावैमहेश्वरी दृष्टात्वनस्त्वयावेधा
सावित्रीलोकभाविनी तस्माद्वैद्विपदासर्वेद्विस्तनाश्चनराःस्मृताः यस्माच्चैवमजाभूत्वासर्ववर्णा
महेश्वरी दृष्टात्वयामहामत्वासर्वभूतधरापरा तस्मात्तुविश्वरूपत्वमजानांवैभविष्यति अजश्च
वमहातेजाविश्वरूपोभविष्यति अमोघरेताःसर्वत्रमुखेचास्यहुताशनः तस्मात्सर्वगतोमध्यः

राम॰
६३

पशुरूपीकृतास्थानः तपसाभावितात्मानो येवैद्रक्ष्यंतिवैप्रजाः ईशात्वेचशिवत्वेच सर्वग सर्वगं सर्वगा
स्थितं रजस्तमोविनिर्मुक्तास्त्यक्त्वातेमानुषंभुवि नत्वामियंगमिष्यंति पुनरावृत्तिदुर्लभं इ
त्येवमुक्त्वाभगवान्ब्रह्माहृष्टमनाद्विजाः प्रणम्यप्रयतोभूत्वापुनराहपितामह ब्रह्मोवाच॥भगवा
न्देवदेवेशविश्वरूपोमहेश्वरः इमास्तवमहादेवतनवोलोकवंदिताः विश्वरूपमहासत्वकस्मि
न्कालेमहाभुजः कस्यांवायुगसंभूत्यांद्रक्ष्यंतित्वांद्विजातयः केनवातत्त्वयोगेनध्यानयोगेनकेन
वा तनवस्तेमहादेवशक्याद्रष्टुंद्विजातिभिः महादेवउ॥ तपसानैवयोगेनदानधर्मफलेनवा न
तीर्थफलयोगेनक्रतुभिर्वाप्तदक्षिणैः नवेदाध्ययनैर्वापिनवित्तेननिवेदनैः शक्योहमानवै
र्द्रष्टुंऋतेध्यानात्परंनहि माधवोनारायणश्चैवविष्णुः त्रिभुवनेश्वरः भविष्यतीहनाम्नातुवाराहो
नामविष्णुतः चतुर्बाहुश्चतुष्पादःचतुर्नेत्रश्चतुर्मुखः तदासंवत्सरोभूत्वायज्ञरूपोभविष्यति
षडंगश्चत्रिशीर्षश्चत्रिस्थानोद्विशरीरवान् कृतत्रेताद्वापरंचकलिश्चैवचतुर्युगं एतस्यपादा
श्चत्वारःअंगानिक्रतवस्तथा भुजाश्चचतुरोवेदाऋतवःसंधिमत्वानिच द्वेमुखेद्वेचअयने

ब्रपु॰
६४

नेत्राश्च चतुरस्त्रभा शिरांसि त्रीणि पूर्वाणि फाल्गुन्याषाढकृत्तिका दिव्यान्तरिक्षभौमानि त्रीणि स्थानानि
यानि तु संभवः प्रलयश्चैव यश्चाश्रमो ह्यप्रकीर्त्तितो सयदा कालरूपा भो वराहत्वे व्यवस्थितः भविष्यति
यदा साध्यो विष्णुर्नारायणः प्रभुः एकवर्षसहस्रे चैव शयानं पुरुषं हरिं यदाद्रक्ष्यसि देव त्वं ध्यानयुक्तं म।
हामुनिं तदा वो मम योगेन मोहितौ नष्टचेतसौ अन्योन्यस्पर्द्धिनौ राजन्नाविज्ञाय परस्परं एकैकस्यो।
दरस्थांस्तु दृष्ट्वा लोकांश्चराचरान् विस्मयं परमं गत्वा ध्यानाद्बुद्धा तेमानुषौ ततस्त्वं पद्मसंभूतः प
द्मनाभः सनातनः पद्माङ्कितस्तदा कल्पे ख्यातिं यास्यसि पुत्रक ततस्तस्मिंस्तु तदा कल्पे वाराहे सम
मेव प्रभोः पुनर्विष्णुर्महातेजाः कल्पान्तो लोकप्रकालनः मनुर्वैवस्वतो नाम तव पुत्रो भविष्यति तदा।
चतुर्युगावस्थे कल्पे तस्मिन्युगान्तके भविष्यामि शिखायुक्तः श्वेतो नाम महामुनिः हिमवच्छिखरे।
रम्ये छागले पर्वतोत्तमे चत्वारः शिष्याः शिवे पुत्रा भविष्यन्ति द्रुमा मम श्वेतः श्वेतशिखश्चैव श्वेतास्यः श्वे
तलोहितः चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः ततस्ते ब्रह्मभूयिष्ठा दृष्ट्वा ब्रह्मगतिं परां तत्स
मीपं गमिष्यन्ति पुनरावृत्तिदुर्लभं पुनस्तु मम देव श्री हितो यो द्वापरे प्रभुः सत्यः प्रजापतिर्यदा व्यासस्तेना

राम॰
६४

न भविष्यति तदा लोकहितार्थाय सुतारो नाम नामतः भविष्यामि कलौ तस्मिन् लोकानुग्रहकारणात्
तत्रापि मम ते पुत्रा भविष्या नामतो मतः दुंदुभिः शतरूपश्च ऋचीकः केतुमांस्तदा प्राप्य योगं तदा ध्या
नं ब्रह्मस्यैव [illegible] नानेन रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं तृतीये द्वापरे चैव यदा व्यासस्तु भार्गवः
तदाप्यहं भविष्यामि दमनस्तु युगान्तये तत्रापि च भविष्यंति पुनरावृत्तिदुर्लभं चतुर्थे द्वापरे चैव
यदा व्यासोंगिरा स्मृतः तदाप्यहं भविष्यामि सुहोत्रो नाम नामतः तत्रापि मम ते पुत्राश्चत्वारश्च त
पोधनाः भविष्यंति द्विजश्रेष्ठा योगात्मानो दृढव्रताः सुमुखो दुर्मुखश्चैव दुर्दमो दुरतिक्रमः प्रा
प्य योगगतिं सूक्ष्मां विमला दग्धकिल्बिषाः तेपि तेनैव मार्गेण गमिष्यंति न संशयः पंचमे द्वापरे
चैव व्यासस्तु सविता यदा तदा चापि भविष्यामि कंको नाम महातपाः अनुग्रहार्थं लोकानां योगा
त्मानैककर्मकृत् चत्वारस्तु महाभागा विरजाः शुद्धयोनयः पुत्रा मम भविष्यंति योगात्मानो दृढ
व्रताः सनः सनंदनश्चैव प्रभुर्यश्च सनातनः ऋभुः सनत्कुमारश्च निर्ममा निरहंकृताः तत्समीपं
गमिष्यंति पुनरावृत्तिदुर्लभं परिवृत्ते पुनः षष्ठे मृत्युर्व्यासो यदा विभुः तदाप्यहं भविष्यामि लो

कात्विर्नामनामतः शिष्याः ह्यममते शिष्या योगात्मानोरदव्रताः भविष्यंतिमहाभागाश्चत्वारोलोक
संमताः सुधामा विरजश्चैव शंखपाव्यासस्तथैव च तैः विभुर्नाममहातेजाः पूर्वमासीत्कृतनंदनः तदाप्यहं
गमिष्यामि कलौकास्मिन्युगांतके जैगीषव्यो तिविख्यातः सर्वेषां यायिनावरः तत्रापि ममते पुत्रा भविष्य
ति युगे तदा सारस्वतः समेधा च वसुवाहः सुवाहनः तेपि तेनैव मार्गेण ध्यानयुक्तिसमाश्रिताः भवि
ष्यंति महात्मानो रुद्रलोकपरायणाः वसिष्ठश्चाष्टमे व्यासः परिवर्त्ते भविष्यति कपिलश्चासुरिश्चै
व तथा पंचशिखो मुनिः वाग्वलिश्च महायोगी सर्व एव महौजसः प्राप्य माहेश्वरं योगं ध्यानिनो दग्ध
किल्बिषाः मत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं परिवर्त्ते नवमे व्यासः सारस्वतो यदा तदाहं चा
भविष्यामि ऋषभो नाम नामतः तत्रापि ममते पुत्रा भविष्यंति महौजसः पराशरश्च गार्ग्यश्च भार्ग
वो ह्यंगिरास्तथा भविष्यंति महात्मानो ब्राह्मणा वेदपारगाः सर्वे तपोबलोत्कृष्टाः शापानुग्रह
कोविदाः तेपि तेनैव मार्गेण योगोक्तेन तपस्विनः ध्यानमार्गं समासाद्य गमिष्यंति तथैव च दश
मे द्वापरे व्यासः त्रिधामा नाम नामतः तदा भविष्यंते विप्रा तदाहं भविता पुनः हिमवच्छिपरे रम्ये

भृगुतुंगे नगोत्तमे नाम्ना भृगोस्तु शिषरं तस्मान्नैक्षिषरं भृगुः तत्रैव मम ते पुत्रा भविष्यंति दृढव्रताः
बलबंधुर्निरामित्रः केतुशृंगस्तपोधनः योगात्मानो महात्मानो ध्यानयोगसमन्विताः रुद्रलोकं
गमिष्यंति तपसा दग्धकिल्बिषा भविष्यंति महौजस्काः सद्वृत्ता लोकविश्रुताः लंबोदरश्च लं
बश्च लंबाक्षो लंबकेशप्रलंबकः प्राप्य माहेश्वरं योगं रुद्रलोकाय संस्थिताः तेपि तेनैव मार्गेण गमि
ष्यंति परांगतिं द्वादशे परिवर्त्ते तु शततेजा महामुनिः भविष्यति महासत्वो व्यासः कविवरोत्तमः
तेनाप्यहं भविष्यामि अत्रिर्नाम युगांतिके हैमकं वनमासाद्य योगमास्थाय भूतले तत्रापि मम ते पु
त्रा भस्मस्नानानुलेपनाः भविष्यंति महायोगा रुद्रलोकपरायणाः सर्वज्ञः समबुद्धिश्च साध्यः स
र्वस्तथैव च रुद्रलोकं गमिष्यंति ध्यानयोगपरायणाः त्रयोदशे पुनः प्राप्ते परिवर्त्ते क्रमेण तु धर्मो
नारायणो नाम व्यासस्तु भविता यदा तदाप्यहं भविष्यामि वालिर्नाम महामुनिः वालखिल्या
श्रमे पुण्ये पर्वते गंधमादने तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः सुधामा काश्यपश्चैव वसि
ष्ठो विरजास्तथा महायोगबलोपेता विमला ऊर्द्ध्वरेतसः तेनैव योगमार्गेण गमिष्यंति न संशयः

यदा व्यासस्तु रद्वस्तु पर्याये च चतुर्दशे तत्रापि पुनरेवाहं भविष्यामि युगांतिके वंशेत्वंगिरसः
श्रेष्ठो गौतमो नाम योगवित् तस्माद्भविष्यते पुण्यं गौतमं नाम तद्वनं तत्रापि मम ते पुत्रा भविष्यंते क
लौ तदा अत्रिरुग्रतपाश्चैव श्रवणोथ श्रविष्टकः योगात्मानो महात्मानो ध्यानयोगपरायणाः
तेपि तेनैव मार्गेण रुद्रलोकनिवासिनः ततः प्राप्ते पंचदशे परिवर्ते क्रमागते त्रय्यारुणिस्तु यदा व्या
सो द्वापरे भविता प्रभुः तदाप्यहं भविष्यामि नाम्ना वेदशिरा द्विजः तत्र वेदशिरा नाम अस्त्रं तत्
पारमेश्वरं भविष्यति महावीर्यं वेदशीर्षश्च पर्वतः हिमवत्पृष्ठमाश्रित्य सरस्वत्या नगो तु मे तदा
पि मम ते पुत्रा भविष्यंति तपोधनाः कुणिश्च कुणिबाहुश्च कुशरीरः कुनेत्रकः योगात्मानो महा
त्मानो ब्रह्मिष्ठाश्चोर्द्धरेतसः तेपि तेनैव मार्गेण रुद्रलोकं गतास्तु वै ततः षोडशमे चापि परिवर्ते क्र
मागते व्यासस्तु संजयो नाम भविष्यति तदा प्रभुः तदाप्यहं भविष्यामि गोकर्णो नाम नामतः त
स्माद्भविष्यते पुण्यं गोकर्णं नाम तद्वनं तत्रापि मम ते पुत्रा भविष्यंति महौजसः काश्यपो ह्युशनाश्चैव
च्यवनोथ बृहस्पतिः तेपि तेनैव मार्गेण भविष्यंति परं पदं ततः सप्तदशे चैव परिवर्ते क्रमागते

तदा भविष्यते व्यासो नाम्ना देवकृतंजयः तदाप्यहं भविष्यामि गुहावासीति नामतः हिमवच्छिखरे चैव म
हातुंगमहालये सिद्धक्षेत्रं महापुण्यं भविष्यति महालयं तत्रापि मम ते पुत्रा ब्रह्मायोगवादिनः भवि
ष्यंति महात्मानो पुंमन्त्रा निरहंकृताः उतथ्यो वामदेवश्च महाकालो महालयः तेषां शतसहस्रं तु शि
ष्याणां ध्यानसाधनं भविष्यंति तदा कल्पे सर्वे ते ध्यानयुंजकाः ते तु सन्निहिता योगे हृदिकृत्वा महेश्वरं
महालये पदं दृष्ट्वा प्राश्य विष्ण्वाशिवमव्ययं येचान्येपि महात्मानः कालेतस्मिन्युगांतिके ध्यानयुक्तेन म
नसा विमलाः शुद्धबुद्धयः गत्वा शिवालयं पुण्यं दृष्ट्वा माहेश्वरं पदं तूर्णं तारयते जंतुः दश पूर्वान्दशा
परान् आत्मानमेकविंशं च तारयित्वा महालये मम प्रसादाद्यास्यंति रुद्रलोकं गतज्वराः ततोऽष्टाद
शमे चैव परिवर्त्ते यदा भवेत् तदा ऋतंजयो नाम व्यासस्तु भविता मुनिः तदाप्यहं भविष्यामि शि
खंडीनाम नामतः सिद्धक्षेत्रे महापुण्ये देवदानवपूजिते हिमवच्छिखरे रम्ये शिखंडी यत्र पर्वतः शि
खंडिनो वनं चापि रुद्धिसिद्धनिषेवितं तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः वाचश्रवा रुचीकश्च श्या
वास्यश्च दृढव्रतः योगात्मानो महासत्वाः सर्वे ते वेदपारगाः प्राप्य माहेश्वरं योगं रुद्रलोकं व्रजंति ति

ततस्त्वेकोनविंशेतुपरिवर्तेक्रमागते व्यासस्तुभवितानाम्नाभरद्वाजोमहामुनिः तत्राप्यहंभविष्यामिजटा
मालीतिनामतः हिमवच्छिखरेरम्येजटायुर्यत्रपर्वतः तत्रापिममतेपुत्राभविष्यंतिमहौजसः हिरण्यनामा
कौशिल्यकाक्षिवःकुथुमिस्तथा ईश्वरायोगधर्माणः सर्वेतेऊर्ध्वरेतसः प्राप्यमाहेश्वरयोगंगमिष्यंति
नसंशयः ततोविंशतिमःस्वर्गेपरिवर्तेक्रमेणतु वाचःश्रवास्मृतोव्यासोभविष्यतिमहामतिः तदाप्य
हंभविष्यामिसट्टहासेतिनामतः अट्टहासप्रियाश्चापिभविष्यंतितदानराः तत्रैवहिमवत्पृष्ठेअट्टहा
सोमहामुनि भविष्यतिमहातेजाःसिद्धचारणसेवितः तत्रापिममतेपुत्राभविष्यंतिमहौजसः सुमन्तुर्वा
र्वरिर्विद्वान्कबंधुकुशिकंधरः प्राप्यमाहेश्वरंयोगंरुद्रलोकायतेगताः एकविंशेपुनःप्राप्तेपरिवर्ते
क्रमेणतु वाचस्पतिस्मृतोव्यासोयदासऋषिसत्तमः तदाप्यहंभविष्यामिदारुकोनाममामतः तस्मा
द्भविष्यतेपुण्यंदेवदारुवनंमहत् तत्रापिममतेपुत्राभविष्यंतिमहौजसः प्लक्षोदार्भायणिश्चैवकेतुमा
लीनकस्तथा योगात्मानोमहात्मानोनियताऊर्ध्वरेतसः परमंयोगमास्थायरुद्रप्राप्तास्तदानघाः
द्वाविंशेपरिवर्तेतुव्यासःशुक्रायतोयदा तदाप्यहंभविष्यामिवाराणस्यामहामुनिः नाम्नावैलांगली

भीमो यत्र देवाः सवासवाः द्रक्ष्यंति मां कलौ तस्मिन्नवतीर्णं हलायुधं तत्रापि मम ते पुत्रा भविष्यंति
सुधार्मिकाः भल्लावी मधुपिंगाक्षः श्वेतकेतुस्तथैव च तेपि माहेश्वरं योगं प्राप्य ध्यानपरायणाः
विरजा ब्रह्मभूयिष्ठा रुद्रलोकाय संस्थिताः परिवर्ते त्रयोविंशे तृणबिंदुर्यदा मुनिः व्यासो भविष्यति
ब्रह्मन् तदाहं भविता पुनः श्वेतो नाम महाकायो मुनिपुत्रः सुधार्मिकः तत्र कालं जयिष्यामि तदा गि
रिवरोत्तमे तेन कालंजरो नाम भविष्यति स पर्वतः तत्रापि मम ते पुत्रा भविष्यंति महौजसः उशिजो
बृहदुक्थ्यश्च देवलः कविरेव च प्राप्य माहेश्वरं योगं रुद्रलोकं गता हि ते परिवर्ते चतुर्विंशे ऋक्षो व्या
सो भविष्यति तत्राहं भविता ब्रह्मन् कलौ तस्मिन्युगांतिके शूली नाम महायोगी नैमिषे देववंदिते
तत्रापि मम ते पुत्रा भविष्यंति तपस्विनः शालिहोत्रोग्निवेशश्च युवनाश्वः शरद्वसुः तेपि योगब
लोपेता रुद्रं यास्यंति सुव्रताः पंचविंशे पुनः प्राप्ते परिवर्ते यथाक्रमं वासिष्ठस्तु तदा व्यासः शक्तिर्ना
म भविष्यति तदाप्यहं भविष्यामि दंडी मुंडीश्वरः प्रभुः कोटिवर्षं समासाद्य नगरं देवपूजितं तत्रा
पि मम ते पुत्रा भविष्यंति क्रमागताः योगात्मानो महात्मानः सर्वे ते ह्यूर्ध्वरेतसः छगलः कुंभकर्णस्य

ॐ भस्मैव प्रवाहकः । प्राप्य माहेश्वरं योगं गमिष्यंति पथैव ते । षड्विंशे परिवर्त्ते तु यदा व्यासः परा-
शरः । तदाप्यहं भविष्यामि सहिष्णुर्नाम नामतः । पुण्ये रुद्रवटे प्राप्य कलौ तस्मिन् युगान्तिके । तत्रापि
मम ते पुत्रा भविष्यंति सुधार्मिकाः । उलूको वैद्युतश्चैव शावको ह्याश्वलायनः । प्राप्य माहेश्वरं योगं
गंतारस्ते तथैव हि । सप्तविंशतिमे प्राप्ते परिवर्त्ते क्रमागते । जातूकर्ण्यो यदा व्यासो भविष्यति तपो-
धनाः । अक्षपादकुमारश्च उलूको वत्स एव च । योगात्मानो महात्मानो विमला शुद्धबुद्धयः । प्रा-
प्य माहेश्वरं योगं रुद्रलोकं ततो गताः । अष्टाविंशे पुनः प्राप्ते परिवर्त्ते क्रमागते । पराशरसुतः
श्रीमान्विष्णुर्लोकपितामहः । यदा भविष्यति व्यासो नाम्ना द्वैपायनः प्रभुः । तदा षष्ठेन चांशेन कृ-
ष्णः पुरुषसत्तमः । वसुदेवाद्यदुश्रेष्ठो वासुदेवो भविष्यति । तदा चाहं भविष्यामि योगात्मा यो-
गमायया । दिव्यां मेरुगुहां पुण्यां त्वया सार्द्धं च विष्णुना । भविष्यामि तदा ब्रह्मन् लकुली नाम ना-
मतः । कायारोहणमित्येवं सिद्धक्षेत्रं च वै तदा । भविष्यति तु विख्यातं यावद्भूमिर्धरिष्यति । तत्रा-
पि मम ते पुत्रा भविष्यंति तपस्विनः । कुशिकश्चैव गार्ग्यश्च मित्रको रुष्य एव च । योगयुक्ता महा-

त्मानो ब्राह्मणा वेदपारगाः प्राप्य माहेश्वरं योगं विमलाश्चोर्ध्वरेतसः रुद्रलोकं गमिष्यंति पुनरावृ
त्ति दुर्लभं इत्येतद्वै मया प्रोक्तमवतारेषु लक्षणं मन्वादि[illegible]स्य पर्यंतं अष्टाविंशं युगक्रमात् तत्र
श्रुतिसमूहानां विभागो धर्मलक्षणं भविष्यति तदा कल्पे कृष्णद्वैपायनाद्यदा ॥ इति श्रीमहा
पुराणे वायुप्रोक्ते माहेश्वरावतारयोगो नाम ॥ वायुरुवाच ॥ चत्वारि भारते वर्षे युगानि मुनयो वि
दुः कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं एतत्सहस्रपर्यंतं महर्ब्रह्मणः स्मृतं मायायास्तु गणाः
सप्तरोमवंतचतुर्दश्या सप्तार्दीराश्रयंते स्म जनलोकं महानुगाः एवं देवेष्वतीतेषु महर्लोकाज्जनं तपः
मन्वंतरेष्वतीतेषु देवाः सर्वे महौजसः ततस्तेषु गतेषूर्द्ध्वं सायोज्यं कल्पवासिनी सामत्पदेवेस्ते देवाः
प्राप्ते संकालनेन तदा महर्लोकं परित्यज्य गणास्ते वै च तद्दृशा भूतादिष्ववसिष्टेषु स्थावरांतेषु वै तदा
शून्येषु तेषु लोकेषु महांतेषु भुवादिषु देवेष्वपगतेष्वूर्द्धं कल्पवासिषु वै जने संहृतान्संहृत्य तेना
देवर्षिगणदानवा संस्थापयति वै सर्वान्दाहवृष्ट्या युगान्तये योऽतीतः सप्तमो कल्पो मया वः परिकी
र्त्तितः समुद्रैः सप्तभिर्गाढे मेकीभूते महार्णवे आसीदेकार्णवं घोरं अविभागं तमोमयं मायये का

ब्र॰ पु॰
६६

सर्वेतस्मिन्शंखचक्रगदाधरः श्रीमान्नाभौवृजातस्तुकिरीटीश्रीपतिःहरिः नारायणोमहायोगीश्वरःसो
ऽप्रमःपुरुषोत्तमः अस्रवाहुर्महावलोलोकानांयोनिरुच्यते किमप्यचिंत्यपुरुषात्मायोगमास्थाययथा
गवित् फणासहस्रकलिततमप्रतिमवर्चसं महाभोगपतेर्भोगमन्वास्थीर्यमहाव्रया तस्मिन्स्वपिति।
पर्यंकेपुनस्तैवैकनकप्रभो एवंतत्रशयानेनविष्णुनाप्रभविष्णुना आत्मारामेणक्रीडार्थंसृष्टंनाभ्यां
तुपद्मजं शतयोजनविस्तीर्णंतरुणादित्यवर्चसं वज्रदंडमहोत्सेधंलीलयाप्रभविष्णुना तस्यैवं।
क्रीडमानस्यसमीपंदेवमीढुषा हेमवर्णोऽजोब्रह्मारुक्मवर्णोह्यतींद्रियः चतुर्मुखोविशालाक्षः
समानाभ्ययदृच्छया श्रियायुक्तेनदिव्येनसुप्रभेणस्रग्धिना तंक्रीडमानंपद्मेनदृष्ट्वाब्रह्मानुभे।
जिवान् सविस्मयमथागम्यप्राहस्पष्टंपूर्णयागिरा प्रोवाचकोभवान्शेतेःआश्रितोमध्यमंभसा
अथतस्यास्युतःश्रुत्वाब्रह्मणस्तुशुभंवचः उदतिष्ठत्पर्यंकात्तेद्विस्मयोत्फुल्ललोचनः प्रत्यु।
वाचोत्तरंचैवक्रियतेयच्चकिंचन द्यौरंतरिक्षंभूश्चैवपरंपदमहंप्रभुः तमेवमुक्त्वाभगवान्वि
ष्णुःपुनरप्यावव्रवीत् कस्त्वंखलुसमायातःसमीपंभगवान्कुतः कुतश्चभूयोगंतव्यंकुत्रवाते

राम॰
६६

प्रतिश्रयः को भवान्विश्वमूर्तिस्त्वं कर्तव्यं किंच ते मया एवं ब्रुवाणं वैकुंठं प्रत्युवाच पितामहः य
थां भवांस्तथा चाहमादिकर्ता प्रजापतिः नारायणः समाख्यातः सर्वं वै मयि तिष्ठति स विस्मयपरां
श्रुत्वा ब्रह्मणा लोककर्तृणा सोऽनुज्ञातो भगवता वैकुंठे विश्वसंभवः कौतूहलान्महायोगी प्रविष्टो
ब्रह्मणो मुखं इमानष्टादशद्वीपान्ससमुद्रान्सपर्वतान् प्रविश्य स महातेजाश्चातुर्वर्ण्यसमाकुलान् ब्र
ह्मादिस्तंबपर्यंतान्सप्तलोकान्सनातनान् ब्रह्मणस्तूदरे दृष्ट्वा सर्वान्विस्मयमहायशाः अहोस्य तप।
सो वीर्यं पुनः पुनरभाषत पर्यटन्विविधांल्लोकान्विभुर्नानाविधान्प्रयान् ततो वर्षसहस्रांतेनांतं।
हि ददृशे तदा तदास्य वक्त्रान्निष्क्रम्य पन्नगाशारिकेतनः अजातशत्रुर्भगवान्पितामहमथाब्रवीत्
भगवन्नादिमध्यं च अंतं कालं च दिशोत्तम नाहमंतं प्रपश्यामि ह्युदरस्य तवानघ एवमुक्त्वाब्रवीद्
यः पितामहमिदं हरिः भवानप्येवमेवाद्य उदरं मम शाश्वतं प्रविश्य लोकान्पश्यैतान ततो पद्मा
न हि देवोत्तम मनः मद्वाक्यैर्निवार्याणि श्रुत्वा तस्याभिनंदयच श्रीपतेरुदरं भूयः प्रविवेश उवाधज ना
नैव लोकानगम्यः स्य पश्यन्सोऽचिंत्यविक्रमः पर्यटित्वा हि देवस्य उदरे दृष्टांतं नैव हरे ज्ञात्वा गमनस्य

पितामहस्य हृद्यानि सर्वाणि पितायविष्णुः विष्णुर्मनः कर्तुमियेष चाशुस्वं प्रस्थितोमहात्मलोके त
तो हृद्यानि सर्वाणि विहितान्यस्य लक्ष्म्यै सूक्ष्मं कृत्वात्मनो रूपं नाभ्याहारमविदत एषस्त्वज्ञानमार्गं
णाह्यनुगम्य पितामहः उज्जहारात्मनो रूपं पद्मष्ठात्मचतुराननः विरराजारविंदस्थः पद्मगर्भसमद्यु
तिः एतस्मिन्नंतरे नाभ्यां पद्मे कस्यान्तकान्तस्य तः प्रवर्त्तमाने संहर्षमध्ये तस्यासीद्वसन्तु ॥ इति
श्रीमहापुराणे वायुप्रोक्ते ॥ सूत उवाच ॥ ततो ह्यपरिमेयात्मा भूतानां प्रभुरीश्वरः शूलपाणि
र्महादेवो हेमवीराम्बरच्छदः आगच्छद्यत्र सोऽनंतो नागभोगपतिर्हरिः तस्यांघ्रिविक्रमतस्तस्य पद्भ्यां
मत्यंत पीडिताः उद्भूतास्तु स्मिमकाशप्रचुलास्तायविंदवः अत्यर्थ पूष्माति शीतश्च वायुस्तत्र व
वौ न शं तं दृष्ट्वा महदाश्चर्यं ब्रह्मविष्णुमसाधत स्फुत्वा प्रतिमेक महि भगवान स्वयंगतः कृतं किं
नु खल्वत्र मे नाभ्यां भूतमन्यत्कृतालयं वदति प्रियमत्यर्थं विप्रिये पिहितेन मया इत्येवं मनसा ध्या
त्वा प्रत्युवाचेदमजरम किंतत्र भगवानस्मिन्मुखे जातसंभ्रमः किं मयायकृतं देव यन्मां प्रियमनु
त्तमं भाषसे पुरुषश्रेष्ठ किमर्थं ब्रूहि तत्त्वतः एवं ब्रुवाणं देवेशं लोकपाद्यं ततस्त्वगं ब्रह्मुवा

वांबुजाभास्त्वंब्रह्मावेदनिधिप्रभुः योसौववोदरंसर्वंप्रविष्टोहंत्वदिच्छया यथाममोदरेलोका
सर्वेदृष्टास्त्वयाविभो तथैवदृष्टाकान्स्तेनमयालोकास्तवोदरे ततोवर्षसहस्रांतेउपःवृतस्य
मेनव नूनमत्सरभावेनमांवशीकर्तुमिच्छता द्वाराणिसर्वाणिघटितानित्वयाऽनघः त
तोमयामहाभागसंचिंत्यस्वेनतेजसा लब्धोनाभ्याप्रवेशास्तुपद्मसूत्राद्विनिर्गमः माभूत्ते
मनसोल्पोपिव्याबाधोपंवक्ष्यंचन इत्येषामगतिर्विष्णोः कार्याणामोपसर्गिकी यन्मयानंतरं
कार्यंमयाध्यवसितंतत्त्वयि विष्णुरुवाच त्वांबाधितुकामेनक्रीडार्थंयदृच्छया अग्निद्वाराणिस
र्वाणिघटितानिमयाऽनघः नतेन्यथावमंतव्यंनान्यःपूज्यश्चमेभवान् सर्वंमर्षयकल्याणयन्मया
पकृतंतव तस्मान्मयोच्यमानस्त्वंपद्मादवतरप्रभो नाहंभवंतंशक्नोमिसोढुंतेजोमयंगुरुं
सचोवाचपरंब्रूहि पद्मादवतरामहं ॥विष्णुरु॥ पुत्रोभवममारिघ्नमुदंप्राप्स्यसिशोभना स
त्यपद्मोमहायोगीत्वमीड्यप्रणवात्मकः अद्यप्रभृतिसर्वेशश्वेतोष्णीषविभूषणः पद्मयोनि
तिख्यातोनाम्नाभविष्यति पुत्रोमेत्वंभवब्रह्मन्सर्वलोकाधिपप्रभो ततःसभगवान्

ब्र॰पु॰
७१

ब्रह्मा वरं दत्त्वा किरीटिनः एवं भवतु तेनैक्त्वा प्रीतात्मागतमत्सरः प्रत्यासन्नमथायांतं बालार्की
भमेहाम्बुजं भूतमत्यद्भुतं दृष्ट्वा नारायणमथाब्रवीत् अप्रमेयो महावक्त्रो दंष्ट्री ध्वस्तशिरोरुहः द
शार्धबाहुस्त्रिशूली लोचनैर्बहुभिर्वृतः लोकप्रभुः स्वयं साक्षाद्विकृतो मुंजमेखली मेंढ्रेणोर्ध्वेन
महता नदमानो ऽतिभैरवं कः खल्वेष पुमान्विष्णो तेजोराशिर्महाद्युतिः व्याप्य सर्वा दिशो द्यां च
इत एवाभिवर्तते तेनैवमुक्तो भगवान्विष्णुर्ब्रह्माणमब्रवीत् पद्भ्यां तलनिःपातेन यस्य विक्रांतो
लोके वेगेन महताकाशे व्यथिताम्बुजलाशयाः छटाभिर्विप्लुतोऽत्यर्थं सिक्तश्चाहं पद्मसंभवः घ्रा
णजेन च वातेन कम्पमानेन त्वया सह दोधूयते महापद्मं स्वच्छंदं मम नाभिजं स एष भगवानीशो
ह्यनादिर्ह्यांतकृद्विभुः भवानहं च स्तोत्रेण उपतिष्ठाव धोधजं ततः क्रुद्धोम्बुजाभाक्षो ब्रह्माणं प्रो
वाच केशवं न भवान्नु न मामन्यं लोकानां योनिमुत्तमं ब्रह्माणं लोककर्तारं मां च वेत्सि सनातनं
कोऽयं भोः शंकरो नाम महावीर्योऽतिरिच्यते तस्य तत्क्रोधजं वाक्यं श्रुत्वा विष्णुरभाषत मामैवं वद
कल्याणपरिवादं महात्मनः मायायोगेश्वरो धर्मो दुराधर्षो वरप्रदः हेतुरस्याथ जगतः पुराणपु

राम॰
७१

रूपोव्ययः जीवः खल्वेष जीवानां योनिरंतं प्रकाशते वासक्रीडनकैर्देवः क्रीडते शंकरः स्वयं प्रधानम
व्ययं ज्योतिरव्यक्तं प्रकृतिस्तमः अस्यैतानि नामानि नित्यं प्रसवधर्मिणः यः कः स इति दुःखार्तैर्मृग्य
ते यतिभिः शिवः एष बीजी भवान्बीजं अहं योनिः सनातनः एवमुक्तो थ विश्वात्मा ब्रह्मा विष्णुमभा
षत भवान्योनिरहं बीजं कथं बीजी महेश्वरः एतन्मे सूक्ष्ममव्यक्तं संशयं छेत्तुमर्हसि ज्ञात्वा चैवं समुत्प
त्तिं ब्रह्मणा लोककर्तृणा इदं परमसादृश्यं प्रश्नमभ्यवदद्धरिः अस्मान्महत्तरं गुह्यं भूतमन्यन्न वि।
द्यते महतः परमं धाम शिवमध्यात्मिनां पदं द्वैधीभावेन चात्मानं प्रविभज्य व्यवस्थितः निष्कलः सू
क्ष्ममव्यक्तः सकलश्च महेश्वरः अस्य मायाविधिज्ञस्य अगम्यगहनस्य च पुरा लिंगं भवाद्बीजं प्रथ।
मं त्वादिसर्गिकं मयि योनौ समायुक्तं तद्बीजं कालपर्ययात् हिरण्मयमपारं तद्योन्यामंडमजायत श
तानि दश वर्षाणामंडं चाप्सु प्रतिष्ठितं अंते वर्षसहस्रस्य वायुना तद्द्विधाकृतं कपालमेकं द्यौर्जज्ञे
कपालमपरं क्षितिः उल्वं तस्य महोत्सेधं यो सौ कनकपर्वतः ततस्तस्मात्प्रबुद्धात्मा देवो देववरः
प्रभुः हिरण्यगर्भो भगवान्ब्रह्मजज्ञे चतुर्भुजः अनार्कचंद्रनक्षत्रं शून्यं लोकमवेक्षत कोयमित्ये।

त्वभिध्यानेऽकुमारास्तेऽभवंस्तदा प्रियदर्शनास्तुततनवोयेतीताः सर्वजास्तत भूयोवर्षसहस्रांतेततएवा
त्मजास्तव भुवनानेलसकाभ्रापञ्चपञ्चायतेहूणाः श्रीमान्सनत्कुमारस्तुरिभुश्चैवोर्ध्वरेतसौ सना
तनश्चसनकस्तथैवचसनंदनः उत्पन्नासमकालंतेवुद्ध्यातीऽप्रियदर्शनाः उत्पन्नाप्रतिघात्मानोजग
ज्ज्वालद्देवहि नारस्यतेचकर्माणिताएत्रयविवर्जिताः अल्पसौख्यंवहूक्लेशंजराशोकसमन्वितं
जीवितंमरणंचैवसंभवंचपुनःपुनः स्वप्नभूतंपुनस्वर्गंदुःखानिनरकास्तथा विदित्वाचागमस्त
र्वमवश्यंभवितव्यतां ऋभुंसनत्कुमारंचदृष्ट्वातेववशास्थितौ त्रयस्तुत्रीन्गुणानहित्वात्मजाः
सनकादयं वैवर्तेनतुज्ञानेननिवृत्तास्तेमहौजसः ततस्तेष्वपवृत्तेषुसनकादिषुवैत्रिषु भवि
ष्यतिविमूढस्त्वंमायुयायाकारस्तु पूर्वकल्पेतुवैकल्पेसाज्ञानस्पतितेनच कल्पशेषाविभूता
निमूढस्मानिपार्थिवानिच साचैषाह्यैश्वरीमायाजगतःसमुदाहृता सपक्षपर्वतोमेरुर्देवलोकौ।
स्तदाकृतः तेवैवेदहिमहात्मंदृष्ट्वाचात्मानमात्मना ज्ञात्वाचेश्वरसद्भावंज्ञात्वामांचाब्जेक्षण
महादेवंमहायोगंभूतानांवरदंप्रभुं प्रणवेचोच्यसामाद्यनमस्कृत्वाजगद्गुरुं त्वांचमांचैवसं

क्रुद्धो निश्वासात्त्रिर्दहेदयं एवं ज्ञात्वा महायोगं भूतानां वरदं प्रभुं प्रणवं चौ ग्रभक्ष जितेह्महावल व्रं
हृत्वा मग्रतः कृत्वा सोष्टोहमनलप्रभं॥ सू.त उ॥ ब्रह्माणमग्रतः कृत्वा ततः सगरुडध्वजः अतीते
श्रुभविष्ये भवर्तमाने तथैव च नामभिर्भ्रान्दशैश्चैव वरदं स्तोत्रमुदीरयत् नमस्तुभ्यं भगवते स्तु
व्रतेनंततेजसे नमः क्षेत्राधिपतये बीजिने शूलिने नमः अमेंड्रायोर्ध्वमेढ्राय नमो वैकुंठरेतसे नमो
ज्येष्ठाय श्रेष्ठाय सपूर्वप्रथमाय च नमो रुद्राय पूज्याय सद्योजाताय वै नमः हरकाय हरनेत्राय
हैमवतीरावराय च नमस्ते धवनीपीदाम पीर्णाप्रभवे नमः उदधीनां च प्रभवे द्वीपानां प्रभवे नमः
अद्रीणां प्रभवे चैव वर्षाणां प्रभवे नमः नमो नदानां प्रभवे नदीनां प्रभवे नमः नमश्चौषधिप्रभ।
वेरक्षाणां प्रभवे नमः धर्माध्यक्षाय धर्माय स्थितीनां प्रभवे नमः नमो रसानां प्रभवे रत्नानां प्रभ
वे नमः नमः क्षणानां प्रभवे कलानां प्रभवे नमः निमेषप्रभवे चैव काष्ठानां प्रभवे नमः अहोरात्रा
सामानां र्द्धमासानां प्रभवे नमः नमो नक्षत्रानां प्रभवे संख्यायाः प्रभवे नमः प्रभू वचपराईस्परस्य प्रभवे नमः
नमः पुराणप्रभवे युगस्य प्रभवे नमः चतुर्विधस्य सर्गस्य प्रभवे नंत चेतसे कल्पोदयनिवद्धानां

ब्र॰पु॰ ७३

वार्त्तीनांप्रभवेनमः नमोविश्वस्यप्रभवेब्रह्मादिप्रभवेनमः विद्यानांप्रभवेचैवविद्यानांपतयेनमः
नमोव्रतानांपतयेमंत्राणांपतयेनमः पितृणांपतयेचैवपशूनांपतयेनमः वाग्वृषायनमस्तुभ्य
पुराणवृषभायच स्ववाञ्चाल्केशायऊर्द्ध्ववक्त्रःशिरणयच नमः पशूनांपतयेगोवृषेंद्रध्वजायच प्र
जापतीनांपतयेसिद्धानांपतयेनमः दैत्यदानवसंघानांरक्षसांपतयेनमः गंधर्वाणांचपतयेय
क्षाणांपतयेनमः गरुडोरगसर्पाणांपक्षिणांपतयेनमः गोकर्णायचगोप्त्रायशंकुकर्णायवैनमः
वाराहायाप्रमेयायऋक्षाधिपतयेनमः नमोप्सराणांपतयेगणानांपतयेनमः बलाबलसमू
हायसत्वोभक्षोभणायच अंभसांपतयेचैवतेजसांपतयेनमः नमोस्तुलक्ष्मीपतयेश्रीमतेह्रीमते
नमः दीर्घशृंगैकशृंगायवृषभायककुद्मिने नमस्थैर्यायवपुषेतेजसेसुप्रभायच भूतायचभवि
ष्यायवर्त्तमानायवैनमः सुवर्चसेचवीरायश्रुतिगायच वरदायवरेण्यायनमःसर्वगतायचन
मोहायजनायभूतायभव्यायभव्यायमहतेतपोजनायच नमस्तुभ्यंतपसेवरदायच शर्वायमह
तेजायनमःसर्वगतायच नमोबंधायमोहायजनायनरकायच भवायभज्यमानायईश्यायया

भूराय

राम॰ ७३

जकायच अभ्रदीर्घायवीप्तायतत्वायनिर्गुणायच नमःपाशणायहस्तायनमःस्वाभरणायच हुता
यग्रकुलायप्रकुतप्राशनायच नमस्त्रिशूलायमृहूर्नीयसाग्निहोमर्त्विजायच सहस्रायनमश्चैवदक्षि
णावभृथायच अहिंसायायचलोकानांपशुमन्त्रौषधायच नमस्तुष्टिप्रदायायपत्रिविक्रायसर्गाधिने
नमोखिंडियपतयेपरिणाहायसृग्विणेविश्वायविश्वरूपायविश्वतोक्षिमुखायच सर्वतःपालिपा
दायतडायाप्रमितायच नमोहव्यायकव्यायहव्यकव्यायवैनमः नमःसिद्धायमेध्याययज्ञेष्टायत्वा
मपायच सुवीरायसुघोरायसुघोराघोरभणायच सुमेधसेसुप्रज्ञायदीप्तायभास्करायच नमो
नमःसुपर्णायतपनीयनिभायच विरूपाक्षायत्र्यक्षायपिंगलायमरोमसे दृष्टिहृत्यायनमश्चैवनमः
सौम्येक्षणायच नमोधूम्रायश्वेतायकृष्णायलोहितायच पितायपिशंगायपीतायच निषंगिणे
नमस्तेसविशेषायनिर्विशेषायवैनमः नमईज्यायपूज्यायचोपजीव्यायवैनमः नमःक्षेम्यायवृद्धा
यवत्सलायनमोनमः नमोज्ञानायसत्यायसत्यासत्यायवैनमः नमोवैपमवर्णायमनस्फटिकायचमम
वे नमःउपमायगौरायकृष्णवेरोहितायच महासंध्याभ्रवर्णायचारुरूपायदक्षिणे नमःकपित

ब्र·पु·
१४

हस्तायदिग्वस्त्रायकपर्द्दिने अप्रमेयायसर्वायसर्वध्यायवरायच पुरस्तात्पृष्ठतश्चैवविधांतायकृत्स्ना
नवे दुर्गायमहतेचैवरोधायकपिलायच अर्कमर्कशरीरायवल्लिनेरंहसायच पिनाकायप्रसिद्धा
यस्फितायप्रसृतायच समेधमेढ्रमालायदिग्वासाचशिखंडिने चित्रायचित्रवर्णायचित्रचर्मधरा
यच चेकितानायतुह्यायनमस्तुनिहितायच नमःशौनायक्षमायवज्रसंहननायच रक्षोघ्नाय
मत्तवह्यायसितकंठोर्द्धरेतसे अरिहायकृतान्तायतिग्मायुधधरायच समोदायप्रमोदायइरिण्या
येयतेनमः अणवःप्रणवेशायभक्तानांशर्मदायच मृगव्याधायदक्षायदक्षयज्ञहरायच स
र्वभूतायभूतायसर्वेशातिशयायच पुरवेत्तायशांतायसुगंधायचरंभवे स्थूलोदंतविनाशा
यभगनेत्रांतकायच कामदायवरिष्ठायकामांगदहनायच रवेःकरालवक्त्रायनागेंद्रदमना
यच दैत्यानामंतकायचघोरदिव्याक्रंदकरायच श्मशानरतिनित्यायनमस्तुलस्वकधारिणे न
नमःप्राणपालायवनमालाधरायच जटिनेदंडिनेतुभ्यंव्यालयज्ञोपवीतिने प्रक्षीणशोके
र्विविधैर्भूतैःपरिवृतायच नरनारीशरीरायदेव्याप्रियकरायच नमोस्तुनृत्तशीलायवोपने

१५
राम

नप्रियाय च नमो वेगीतशीलाय सुगीतिंगायनेन नमः कटंकटाय भीमाय चोग्रेग्रतराय च विभीष
णाय भीमाय भगं प्रमथनाय च सिद्धसंघातगीताय महाभागाय वै नमः नमो मुक्ताट्टहासाय क्ष्वे
डितास्फोटिताय च नदते कूर्दते चैव नमः प्रमुदिताय च नमो द्भुताय स्वपते धावते चाधिष्ठि
ताय च ध्यायते जृंभते चैव रुदते द्रवते नमः वाल्गिते क्रीडिते चैव नंवांदरशरीरिणे नमस्ते
ताय कंपाय मुंडाय विकटाय च नम उन्मत्तवेषाय किंकिणीकाय वै नमः नमो विकृतवेषाय।
क्रूरोग्रामर्षणाय च अप्रमेयाय गोप्ताय दीप्ताय निर्गुणाय च वादप्रियाय वाद्याय मुंडाय मुंडा
मणिधराय च लोकधात्री त्वियं भूमी पादौ सज्जन सेविनौ सर्वेषां सिद्धियोगानामधिष्ठानं तवो
दरं मध्ये अंतरिक्षं विस्तीर्णं ताराणगणविभूषितं ताराप्रपथ इवाभाति श्रीमान्हारस्तवोरसि दिशो
दशाभुजास्तुभ्यं केयूरांगदभूषिताः विस्तीर्णपरिणाहश्च नीलांबुदचयोपमः कंठस्ते
शोभते श्रीमान्हेमसूत्रविभूषितः दंष्ट्राकरालदुर्धर्षमनौपम्यं मुखं तव पद्ममालाकृतो
ष्णीषं शिरो शोभते कथं दीप्तिः सूर्ये वपुश्चंद्रे स्थैर्यं भूम्यानिलो बले तीक्ष्णमग्न्यप्रभावे

ब्र·पु·
१४

दुर्वेशाहं सैन्यमस्मच अहरोत मविस्मंदानुगणनेतान्विदुर्बुधा जयोजयोजघ्यो महायोगी महादे
वो महेश्वरः पुरेशयो गुहावासी खेचरो रजनीचरः तपोनिधिर्गुरुर्नंदी नंदिवर्द्धनः हयशी
र्षो धाता विधाता भूतिवाहनः बोधव्यो बोधनो नेता धूर्वहो दुःप्रकंपकः बृहद्रथो भीमकर्मा
बृहत्कीर्तिर्धनंजय घंटाप्रियो ध्वजी छत्री पिनाकी ध्वजिनीपतिः कवची पट्टिशी खड्गी धनुर्ह
स्तः परश्वधी अघस्मरोऽनघः शूरो देवराजारिमर्दनः त्वां प्रसाद्य पुरास्माभिर्द्विषंतो निहता यु
धी अग्निस्त्वं सागराश्चान्ये सर्वांस्त्वं पिबन्नेव न तृप्यसे क्रोधागारः प्रसन्नात्मा कामदः कामदः प्रियः ब्र
ह्मचारी चागाध ब्रह्मचारी च गोप्रेस्त्वं सिद्धपूजितः वेदानाम ध्ययः कोशः त्वया यज्ञप्रकल्पितः हव्यं च
वेदं वहति वेदोक्तं हव्यवाहनः प्रीते त्वयि महादेव वयं प्रीता भवामहे ब्रह्मा नीशेन नादिमान्स्मा
म राशिर्ब्रह्मा लोकानां त्वं हर्ता त्वादिसर्गः सर्वेभ्यः प्रकृतिभ्यः परमं त्वां विदित्वा अक्षीण धामा
लेन त्वां विशंति योगेन त्वां ध्यायिनो नित्ययुक्ता ज्ञात्वा भोगान्संत्यजंते पुनस्तान् ये त्वां सम्या
क्प्रपन्ना विशुद्धा — कर्मभिस्त्वां भजंते अप्रमेयस्य तत्त्वस्य यथा विद्मः स्वशक्तितः की
हि

राम·
१४

र्त्तितं तव माहात्म्यमपारं परमात्मनः शिवो नो भव सर्वत्र योऽसि सोऽसि नमोऽस्तु ते ॥ ॥ इति श्री
महापुराणे वायुप्रोक्ते शार्वस्तवः ॥ सूत उवाच ॥ आपिबन्निव नेत्राभ्यां पुण्डरीकायतेक्षणः प्र
हृष्टवदनो ऽत्यर्थमभवत्तुष्टकीर्त्तनात् उमापतिस्त्वरूपाख्यो दक्षयज्ञविनाशनः पिनाकी खण्डपर
ततः शुः प्रभूतप्रांतत्रिलोचनः स भगवान्देवः श्रुत्वा वाक्यामृतं तयोः जानन्नपि महाभागः क्रीडापूर्वम
थाब्रवीत् कौ भवन्तौ महात्मानौ परस्परहितैषिणौ समेतावम्बुजाभाक्षौ अस्मिन्घोरे जलप्लवे.
तावूचतुर्महात्मानौ समनिरीक्ष्य परस्परं भगवन्किं चितत्क्येन विज्ञातेन परस्परं कृत्स्नं वाः सुखमानं
त्यमिच्छावो वा मतेन्त्वया लयोपलक्षवनं कृत्वा सपिवयानुभान्यच उवाच भगवान्देवो मधुरश्लक्ष्ण
यागिरा भो भो हिरण्यगर्भ त्वां त्वां च कृष्ण वदाम्यहं प्रीतोऽहमनया भक्त्या शाश्वतानादरयुक्तया भ
वंतौ मान्नभावप्रियौ मम सर्वहितरावुभौ युवाभ्यां किं ददाम्यद्य वराणां वरमुत्तमं तेनैवमुक्ते वचने ब्रह्मा
णं विष्णुरब्रवीत् ब्रूहि ब्रूहि महाभाग वरं यस्ते विविक्षितः प्रजाकामोऽस्म्यहं विष्णो पुत्रमिच्छामि धू
र्वहं ततः स भगवान्ब्रह्मा वरं पुत्रलिप्सया अथ विष्णुरुवाचेदं प्रजाकाम प्रजायते वीरमप्रति

ब्रपु॰
७६

मंपुत्रंयत्त्वमिछसिपूर्वदं नान्यंवरमहंवव्रेप्रीतेत्वयिमहेश्वरातस्मान्मांप्रार्थयंतांश्रुत्वाभगवान्भा
नेत्रहा निकल्मषममायंचवाढमित्यब्रवीद्वचः यदाकार्यसमारंभेकस्मिंश्चित्तवसुव्रत अनि
घ्नैत्राचकार्यसक्रोधस्त्वामनुपैष्यति आत्मैकादशेरुद्राःविहिताःप्राणहेतवः सोहमेकादशस्तात्मा
वैश्मूलहस्तमहानुगः ऋषिर्मित्रोमहात्मावैललाटाद्धविनानदा प्रसादमतुलंकृत्वाब्रह्मणः
स्त्विदंशीघ्रंशुरा विश्रुतंपुनरुवाचेदंददामिचवरंतव महोवाचमहाभागोविरूद्भवमिदंवचः स
मुक्त्वा महादेवः सपत्नीकः सहानुगः अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः अवाप्य च तदा भागं य
थोक्तं ब्रह्मणा भवः ज्वरं च सर्वधर्मज्ञो बहुधा व्यभजत्तदा शान्त्यर्थं सर्वभूतानां शृणु धतत्र वै द्विजाः
शीर्षाभितापो नागानां पर्वतानां शिलाजतुः अपां तु नीलिकां विद्यान्निर्मोकं भुजगेष्वपि खोरकः सौ
रभेयाणां ऊषरः पृथिवीतले धर्मानामपि धर्मज्ञ दृष्टिप्रत्यवरोधनं रन्ध्रोद्भूतं तथाश्वानां शिखोद्भेद

अश्वहिंसा नेत्ररोगः कोकिलानां ज्वरः प्रोक्तो महात्मनि: अज्ञानां पत्तभेदश्च सर्वेषामपि नः श्रुतं शुकाना
मपि सर्वेषां हिक्का प्रोचितं ज्वरः शार्दूलेष्वपि देव प्रोक्ता श्रमो ज्वर इहोच्यते मानुषेषु तु सर्वेषु ज्वरो नामैष
कीर्तितः मरणे जन्मनि तथा मध्ये च विशते सदा एतन्माहेश्वरं तेजो ज्वरो नाम महादारुणः नमस्यश्चैव
वन्द्यश्च सर्वप्राणिभिरीश्वरः इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यः सुसमाहितो नरः विमुक्त
रोगः स नरो मुदायुतो लभेत कामान्स यथा मनीषितान् रुद्रप्रोक्तं स्तवं चापि कीर्तयेद्यः शृणोति वा
नाशुभं प्राप्नुयात्किंचिद्दीर्घं चायुरवाप्नुयात् यथा सर्वेषु देवेषु वरिष्ठो भगवान्हरः तथा स्तवो वरिष्ठो
यं स्तवानां ब्रह्मनिर्मितः यशोराज्यसुखैश्वर्यं वित्तायुर्धनकांक्षिभिः स्तोतव्यो भक्तिमास्थाय विद्याका
मैश्च यत्नतः व्याधितो दुःखितो दीनश्चौरराजभयार्दितः राजकार्यनियुक्तो वा मुच्यते महतो भयात्
अनेनैव च देहेन गणानां स गणाधिपः इह लोके सुखं प्राप्य गण एवोपपद्यते न च यक्षाः पिशाचा वा
न नागा न विनायकाः कुर्युर्विघ्नं गृहे तत्र यत्र संस्तूयते भवः शृणुयाद्या इमं नारी सुभक्त्या ब्रह्मचारिणी
पितृभिर्भर्तृपक्षाभ्यां पूज्या भवति देववत् शृणुयाद्वा इदं सर्वं कीर्तयेद्वाप्यभीक्ष्णशः तस्य सर्वाणि का

यो णमिड्डिंगाङ्कं त्वविघ्नत: मनसाचिंतितं यच्च यच्च वाचाप्युपकृतं सर्वं संपद्यते तस्य स्तवनस्यानुकीर्त्तनात्
देवस्य सत्कृतस्यापदे ध्यानं दीश्वरस्य तु वलिभवंतः कृत्वा दमेन नियमेन च ततः सश्रेष्ठोग्रहणाया नामा
न्याश्वयपाक्रमं ईप्सितान्लभते त्वर्थीकामाञ्चोगाश्च मानवः मृतस्य स्वर्गमाप्नोति स्त्रीसहस्रपरिवृतः सर्व
कर्मसयुक्तो वायुक्तो वा सर्वपापनके पठन्व स्तवं तत्स्तोत्रं सर्वपापैः प्रमुच्यते मृतश्चगणसालोक्यं प्रजामा
नः सुराहरैः वृषेत्वविधियुक्तेन विमानेन विराजते आहूतसंस्तवस्यापि रुद्रस्यानुचरो भवेत् इत्याह भ
गवान्व्यासः पराशरसुतं प्रभुः नैतद्वेदयते कश्चिन्नेदं श्राव्यं तु कस्यचित् श्रुत्वैनत्परमं गुह्यं ये पि स्युः पा।
पकारिणः वैश्याः स्त्रियः शूद्राश्च रुद्रलोकमवाप्नुयुः श्रावयेद्यस्तु विप्रेभ्यः सदापर्वसु पर्वसु रुद्रलोक।
मवाप्नोति द्विजो वै नात्र संशयः ॥ ॥ इति श्रीवायुप्रोक्ते महापुराणे दक्षप्रोक्तः स्तवः समाप्तः ॥ सूत
उवाच इत्येषा समनुज्ञाता कथा पापप्रणाशनी यदहं समधिकृत्येह कथा सर्वा उपागता पितृवंशप्रसंगे
न कथा हि प्रापकीर्त्तिताः पितृनामानुपूर्व्येण देवान्वक्ष्याम्यतः परं त्रेतायुगमुखे पूर्वमासन्स्वायंभुवे
न्तरे देवा यामा इति ख्याताः पूर्वं ये यज्ञसूनवः अजिताः ब्रह्मणः पुत्रा अजेत्वादजितास्तु ये पुत्राः स्वायं।

ब्र॰पु॰
१०१

तुवस्येतेशुक्रनामाश्रुमानसाः त्विषिमंतोयंगुणाःसेतेदेवानांशुत्रयस्मृताः छंदोगास्तुत्रयस्त्रिंशत्स्वै
स्वायंभुवस्यह वहुर्यायातिहोदेवोदीधयःस्ववसोमतिः विभासश्चक्रतुश्चैवप्रजानिविशतोद्युतिः
वायसोमगणश्चैवमायाद्दादशकीर्त्तिताः आसन्स्वायंभुवस्यैतंअंतरेसोमपायिनः त्विषिमंतोगणे
तेवीर्यमंतोमहावलाः तेषामिंद्रस्तमाह्यासीद्विश्वभुक्प्रथमोविभुः असुरायेतदातेषांमासांदायाद
वांधवाः सुपर्णायक्षगंधर्वाःपिशाचोरगराक्षसाः अष्टौताःपितृभिःसार्द्धंतास्तथादेवयोनयः स्वायंभुवे।
तेऽतीताःप्रजास्त्वासांसहस्रशः प्रभावरूपसंपन्नाआयुषाचवलेनच विस्तरादिहनोक्तास्तेमावसंगो।
भवेदिह स्वायंभुवोनिसर्गश्चविज्ञेयःसांप्रतेनतु अतीतोवर्त्तमानेनदृष्टोवैवस्वतेनसः प्रजाभिर्देवता व॰
भिश्चऋषिभिःपितृभिःसह तेषांसप्तर्षयःपूर्वमासन्येतान्निबोधत भृग्वंगिरामरीचिश्चपुलस्त्यःपु
लहःक्रतुः अत्रिश्चैववसिष्ठश्चसप्तस्वायंभुवेंतरे अग्नीध्रश्चातिबाहुश्चमेधामेधातिथिर्वसुः ज्यो
तिष्मान्द्युतिमान्हव्यःसवनःपुत्रएवच मनोःस्वायंभुवस्यैतेदशपुत्रामहौजसः वायुप्रोक्तामहासत्वा
राजानःप्रथमेंतरे मासुरंतत्सगंधर्वंसयक्षोरगराक्षसं सपैशाचमनुष्यंचससुपर्णाप्सरोगणं:

श्राम॰
१०१

नोशक्यमाणापूर्व्वेणवक्तुं वर्षशतैरपि बहुत्वान्नामधेयानां संख्यातेषां कुले कुले यावैब्रजकुलाख्यास्तथा
मनूस्वायंभुवेंतरे कालेन बहुनातीतास्तन याता युगाक्रमैः ऋषय ऊचुः कः स भगवान्कालः सर्वभूताप
हारकः कस्ययोनिः किमादिश्च किंतत्वं स किमात्मकः किमस्य चक्षुः का मूर्त्तिः केचास्यावयवाः स्मृताः
किंनामधेयः कोस्यात्मा एतन्नो ब्रूहि पृच्छतां सूत उवाच श्रूयतां कालसद्भावः श्रुत्वाचैवावधार्यतां सू
र्ययोनिर्निमेषादिः संख्याचक्षुः स उच्यते मूर्त्तिरस्य त्वहोरात्रे निमेषावयवश्च सः संवत्सरशतं त्व
स्य नामचास्य कलात्मकं सांप्रतानागतातीतः कालात्मा स प्रजापतिः पंचानां प्रविभक्तानां कालावस्थां
स्यां निबोधत दिनार्धमासमासैस्तु ऋतुभिस्त्वयनैस्तथा संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः शुक्लेः
कृस्नागतिश्चापि त्र्यथा सारमयः स्वगः इद्वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः वत्सरः पंचमस्तेषां
कालः स युगसंज्ञितः तेषांतु तत्ववक्ष्यामि कीर्त्यमानं निबोधत ऋतुरग्निस्तु यः प्रोक्तः सतु संवत्स
रो मतः आदित्ययस्तु यस्त्वसौ सौरकालाग्निः परिवत्सरः स इद्वावत्सरः सोमः पुराणेनिश्चयो मतः प
श्चायं तपते लोकान्कालेन्तुभिः सप्तसप्तभिः आयुः कर्त्ता च लोकस्य स वायुरनुवत्सरः अहंकाराद्रुद्र

रुद्रः संज्ञितो ब्रह्मणः सुतः सरुद्रो वत्सरस्तेषां विज्ञेयो नीललोहितः तेषां सतत्वं वक्ष्यामि कीर्त्यमानं
निबोधत अंगाग्रस्यैगसंयोगात्कालात्माप्रपितामहः ऋक्सामयजुषां योनिः पंचानां पतिरीश्वरः
सोग्निर्यज्ञश्च सोमश्च सस्मृतः सप्रजापतिः श्रौतः संवत्सरश्चेति सूर्यो योनिर्मनीषिभिः यस्मात्कालविभा
गानां मासर्त्वयनयोरपि ग्रहनक्षत्रशीतोष्णवर्षायुःकर्मणां तथा योनितः प्रविभागानां दिवसानां
च भास्करः वैकारिकः प्रसन्नात्मा ब्रह्मपुत्रः प्रजापतिः एकैनेको ह्यदिवसोमासोथ्यर्तुः पितामहः
आदित्यः सविता ज्ञातुर्जीवनो ब्रह्मसत्तमः प्रभवश्चाव्ययश्चैव भूतानां तेन भास्करः ताराभिमानी
विज्ञेयः तृतीयः परिवत्सरः सोमः सर्वौषधीपति यस्मात्सप्रपितामहः अजीवः सर्वभूतानां योग
क्षेमकृदीश्वरः अवेक्षमाणः सततं विभर्त्ति जगदंशुभिः तिथीनां पर्वसंधीनां पौर्णिमादर्शयोरपि
योनिर्निशाकरो यश्च योमृतात्मा प्रजापतिः तस्मात्सपितृमान् लोके मतस्त्वेदसात्मकः प्राणा
पानसमानाद्यैर्व्यानोदानात्मकैरपि कर्मभिः प्राणिनां लोके सर्वचेष्टाप्रवर्त्तकः पंचानां चेंद्रियमनो
बुद्धिस्मृतिजलात्मनां समानकालकरणः क्रियाः संपादयन्निव सर्वात्मा सर्वलोकानां मावहः

प्रवहादिभिः विधाता सर्वभूतानां हमीनित्यं प्रभंजनः योनिरग्नेरपां भूमेरवेश्चंद्रमसस्तथा वा
युः प्रजापतिर्भूतं लोकात्मा प्रपितामह प्रजापतिमुखैर्देवैः सम्यक्कृत्विष्टफलान्विभिः त्रिभिरेव क
पालैस्तु सृष्टं बुकैरो घधीत्वये ईज्यते भगवान्यस्मात्तस्माद्वैक उच्यते गायत्री चैव त्रिष्टुप् जगती चै
व यास्मृता त्रैवकानामतः प्रोक्ता योनयः सवनस्मृताः ताभिरेकत्वभूतानि स्त्रीविधाभिस्ववीर्यतः
त्रिसाधनपुरोडाशस्त्रिकपालः सवैस्मृतः इत्येतत्पंचवर्षं च युगं प्रोक्तं मनीषिभिः यच्चैव पंचधा
त्मावैप्रोक्तः संवत्सरो द्विजैः सैकैव— विजज्ञेप्यमधादीन तवः किल ऋतुपुत्रार्तवः पंच इति स
र्गसमासतः इत्येष पवमानो वै प्रजानां जीवितानि तु नदीवेगसमायुक्तः कालो धावति संहरन् अ
होरात्रकरस्तस्मात्स वायुरभवत्पुनः एते प्रजानां पतयः चत्वार उपपन्नताः पितरः सर्वलोका
नां लोकात्मानः प्रकीर्त्तिताः ध्यायतो ब्रह्मणो वक्त्रात् रुद्रस्समभवद्भवः ऋषिर्विप्रो महादेवो भूता
त्मा प्रपितामहः ईश्वरः सर्वभूतानां प्राणवायोपपद्यते आत्मा वै शितभूतानामंगप्रत्यंगसंभवः
अग्निः संवत्सरः सूर्यश्चंद्रमा वायुरेव च युगाभिमानी कालात्मा नित्यं संज्ञेयकाह्निभिः उन्माद

कोनुग्रहस्तस्य हन्तारउच्यते रुद्राविष्टो भगवतानगत्यस्मिन्स्वतेजसा आश्रयाश्रयसंयोगात्तनुभिर्नो
मतिस्तथा ततस्तस्यानुवीर्येणलोकानुग्रहकारकं द्वितीयंभङ्सयोगंशाततस्यैककारकं देवत्वंचपि
तत्वचकालत्वचास्वयन्त्रयम् तस्माद्देसर्वथाभङ्सद्धिर्ञिरतिहन्यते यतिः पतीनांभगवान्ब्रजेशानो
प्रजापतिः भावनः सर्वभूतानांसर्वेषांनीललोहितः ओषधीप्रतिसंधत्तेरुद्रःक्षीणाःपुनःपुनः इत्ये
षांयवपत्येवैनतक्षसंप्रमाणतः बहुत्वात्परिसंख्यातं पुत्रपौत्रसनंतकाः इमंवंशाग्नेशानामहा
तेपुण्यकर्मणां कीर्तयन्स्थिरकीर्तीनांमतीसिद्धिमाप्नुयात् वायुरु ॥ अतऊर्ध्वंप्रवक्ष्यामिप्रणव
स्यचनिश्चयं ॐकारमक्षरंब्रह्मत्रिवर्णंब्रह्मवादिनः स्मृतं योयायस्यस्यथावर्णाविहितोदेवतास्तथा ऋ
चोयजूंषिसामानिवायुरग्निस्तथाजलं तस्मात्तुषडक्षरादेवपुनरग्रेप्रजज्ञिरे चतुर्दशमहात्मानो।
देवानांयेतुदेवता तेषुसर्वगतश्चैवसर्वगः सर्वयोगवित् अनुग्रहार्थंलोकानामादिमध्यांतउच्य
ते सप्तर्षयस्तथाजायैवदाश्चपितृभिः सह अष्टशालिस्त्तासर्वेदेवदेवान्महेश्वरात् इहामुत्रहि
तार्थायवदंतिपरमंपदं सर्वमेवमयोक्तस्तेकालस्तुयुगसंज्ञितः कृतंत्रेताद्वापरंचयुगादिकलि

नासह परिवर्तमानैर्लैरेवं ग्रं मम माणे प्रचक्रुवन् देवतास्ततो द्विग्नाः कालस्य वशमागताः तथा कृवं
तिनेत्मानं संस्थाप्य चिन्तमात्मना तदा तेवागयनाभूत्वाम्रादोमन्वंतरस्यवै ऋषयश्चैव देवाश्चैव महा
तपाः समाधाय मनस्तीव्रं सहस्रं परिवत्सरान् प्रपन्ना स्म महादेवं भीताकालस्य वै तदा सूर्यं हि।
कास्येदेवशाश्वतं मूर्तिश्चत्तु मुखः कोस्य विद्वान्महादेवश्चागाधस्य महेश्वरः अथ दृष्ट्वा महादेवस्त
तु कालं चतुर्मुखं नमेतस्यै इति प्राह कावः कामः प्रदीयतां तत्करिष्याम्यहं सर्वं नतृप्तायं परिश्रमः
उवाच देवो भगवान्स्वयं कालः हुङ्कर्जयुः यदेतस्य मुखं श्वेतं चतुर्जिह्वं हि लक्ष्यते यत्कृतयुगेना
मतस्य कालस्य वै मुखं असौ देवो सरश्रेष्ठो ब्रह्मा वै वस्वतो मुखः यदेतद्रक्तवर्णाभं तनीयं वः स्म
तेमया त्रिजिह्वं लेलिहानं वपतत्त्रेता युगं हि जाः अत्र यज्ञप्रवृत्तिस्तु जायते हि महेश्वरात् ततोद्या
दृश्यते यज्ञाख्लि सोम्निहालयोग्मयः इष्टाचैवाग्रयो विष्णाः कालजिह्वाप्रवर्तते यदेतद्धैमुखं भीमं
द्विजिह्वं रक्तपिंगलं द्विपादोत्र भविष्यामि द्वापरं नामतः प्रभो यदेतत्तु कृष्णवर्णाभं तुरीयं रक्तलोचनं
एकजिह्वं प्रमुख्यामं लेलिहानं पुनः पुनः ततः कलियुगं घोरं सर्वलोकभयंकरं कल्पस्यतु मुखं

ब्रपु·
१०४

सेतच्चतुर्थं नाम भीषणं नसत्वेनापितुर्वाणां भस्मिन्नवर्तते युगे कालग्रस्ताः प्रजाश्चापि युगे तस्मिन्न विष्याति
ब्रह्मा कृते युगे पूज्यस्त्रेतायां यज्ञ उच्यते द्वापरे पूज्यते विष्णुरहं पूज्यश्चतुर्थके ब्रह्मा विष्णुश्च यज्ञश्च कालस्यै
व कलाह्वयः सर्वेषु च हि कालेषु चतुर्ष्वेव निर्मलेश्वरः अहं न योजनेनाप्यः कालः कालप्रवर्तकः युगा
कर्त्ता तथा चैव परं परायणम् तस्मात्कलियुगं प्राप्य लोकानां हितकारणात् अभयार्थं च देवानां उ
भयोर्लोकयोरपि तदा हं पूज्यश्च पूज्यश्च भविष्यामि सत्ययोत्तमाः तस्माद्भयं न कार्यं च कलिं प्राप्य महोज
सः एवमुक्त्वा ततः सर्वा देवता ऋषिभिः सह प्रणम्य शिरसा देवं पुनरूचुर्जगत्पतिं देवर्षय ऊचुः म
हातेजा महाकायो महावीर्यो महाकृतिः भीषणः सर्वभूतानां कथं कालश्चतुर्मुखः महादेव उवाच
एष कालश्चतुर्मूर्त्तिश्चतुर्दंष्ट्रश्चतुर्मुखः लोकसंरक्षणार्थाय प्रतिक्रामति सर्वशः नासाध्यं विद्यते
किंचित्सर्वस्मिन्सचराचरे कालस्सृजति भूतानि पुनः संहरति क्रमात् सर्वे कालस्य वशगा न कालः कलय
ते बलात् विक्रमस्य यदान्यस्य सर्वे क्रामेकसप्ततिः तानि मन्वंतराणीह परिवृत्तयुगक्रमात् एकैकपदप
विक्रमस्य यदा नामेकसप्तति यदा कालः प्रक्रमते तदा मन्वंतरे त्वयः एवमुक्त्वा तु भगवान्देवर्षिपि

राम·
१०४

तदानवान् नमस्कामयत्नतैः सर्वैस्तत्रैवांतरधीयत एवं सकाले भगवान्देवर्षिपितृदानवाः पुनःपुनःसंह
रेते सृजंते च पुनःपुनः अतो मन्वंतरे चैव देवर्षिपितृदानवैः इज्यते भगवानीशो भयत्कालस्ततस्यैव त
स्मात्सर्वप्रयत्नेन कलौ कुर्यात्ततो द्विजाः प्रसन्नस्य महादेवं तस्य पुण्यफलं महत् तस्माद्देवदिवं गत्वा
अवनीर्थं च भूतले आषयश्चैव देवाश्च कलिं प्राप्य सुदारुणं तपश्चक्रे निभूयिष्ठं कृतं धर्मपरायणाः अव
तारान्कलिं प्राप्य करोति च पुनःपुनः एवं कालांतरे सर्वे यतीनां वै सहस्रशः वैवस्वतेंतरे तस्मिन्दे
वाश्च नर्वयसत्यपा देवाधिपौरवो राजा मरुश्चेक्ष्वाकुवंशजः महायोगबलोपेताः कालांतरमुपासते
क्षीणे कलियुगे तस्मिन्नैष्ये त्रेतायुगे कृते सप्तर्षिभिश्च वर्णाई भाव्ये त्रेतायुगे पुनः गोत्राणां क्षत्रियाणां
च भविष्याः प्रकीर्तिताः द्वापरांते प्रविष्टे ते क्षत्रियाः ऋषिभिः सह कृते त्रेतायुगे चैव तथा क्षीणे च द्वा
परे वृत्तस्त्रत्रस्य चोक्तेदा बीजार्थ्यो यकलौ स्मृताः एवमेतेषु सर्वेषु युगेषु क्रमशस्तथा सप्तर्षिभिस्त
था सार्धं संतानार्थं युगेयुगे एवं क्षत्रस्य चोक्तेदः संबंधो द्विजैः सह मन्वंतराणां समानां संतानाश्च
श्रुतिस्मृतिः परस्परं युगानां च ब्रह्मक्षत्रस्य चोद्भवं यथावैप्रकृतिस्तेभ्यः प्रवृत्तानां यथाहयं जामद

ग्रेन रामेण क्षत्रे निरवशेषिते क्रियंते कुघ्रहा सर्वाः क्षत्रियैर्वसुधाधिपैः दिवंगतान् हं तुभ्यं कीर्त्तयिष्ये निबोधत
ऐडमिक्ष्वाकुवंशस्य प्रकृतिं परिचक्षते राजानः श्रेणिबंधास्तु तथान्ये क्षत्रिया भुवि ऐडवंशोपसंभूतास्त
था चैक्ष्वाकवो नृपाः तेष्वेकशतं पूर्णं कुलानामभिषेचितम् तावदेव तु भोजानां विस्तरो द्विगुणस्मृतः
भोजं तु त्रिशतं क्षत्रं चतुर्द्धा नृपपादिशं तेष्वतीतास्तु नामानो ब्रवतस्तान्निबोधत शतं वै प्रतिविंध्या।
नां हैहयानां तथा शतं धार्त्तराष्ट्राश्चैकशतं अशीतिर्जनमेजया शतं वै ब्रह्मदत्तानां कुलानां वीर्य्यण
शतं ततः शतं तु पौलानां शतं काशिकुशादयः तथापरे सहस्रं तु ये तीताः शशविंदवः ईजानाश्च
श्वमेधैस्ते सर्वे नियुतदक्षिणैः एवं राजर्षयोतीताः शतशोथ सहस्रशः मनोर्वैवस्वतस्यैव वर्त्तमा
ने तरे शुभे पुनरुक्तबहुत्वाच्च न शक्यं विस्तरेण तु वक्तुं राजर्षयः कृत्स्नाः येतीतास्ते युगैः सह एतेय
याति वंशस्य वसुधेवंशवर्द्धनाः कीर्त्तिताः प्रतिमंतस्ते ये लोकान्धारयंति वै लभते च वरान्पंच दुर्ल
भान्स्वस्तलौकिकान् आयुः पुत्राधनं कीर्त्तिरैश्वर्यं भूरि एव च धारणाच्छ्रवणाच्चैव पंचवर्गस्य धीमतां
यथोक्ताल्लौकिकाश्चैव ब्रह्मलोकं व्रजंति वै चतुर्ज्ञार्याद्रुसहस्राणि वर्षाणां च कृतं युगं तस्यतावा।

कृतीसैवं संध्यांशाश्च तथाविधः कृतवैत्रकृयापादश्चतुः साहस्रउच्यते तस्माच्च त्रिशतं संध्यासंध्यांशा
श्चतथाविधः त्रेतात्रीणिसहस्राणिसंख्यमुनिभिः सह तस्मात्त्रिशती संध्यासंध्यांशाः त्रिशतःस्मृ
तः अनुयुगपादस्ततासीसाहस्रसंख्यया द्वापरेद्वे सहस्रेतुवर्षाणिसंप्रकीर्त्तितं तस्यापिद्विशती
संध्यासंध्यांशोद्विशतस्तथा उपाद्यानन्तिनीयस्तद्वापरपादउच्यते कलिः वर्षसहस्रंतुप्राक्तः सं
ख्याविदोजनाः तस्यापिशतिकासंध्यासंध्यांशाः शतमेवच सहारपादः सस्मातचतुर्थैवकलिं
युगं ससंध्यानिसहांशानिचत्वारितुयुगानिवै एतद्वादशसाहस्रं चतुर्युगमितिस्मृतं एवंपादैः
सहस्राणिश्लोकाणांपंचपंचच संध्यासंध्यांशकैरेवद्वसहस्रेतथापरे एवंद्वादशसाहस्रंपुराणं
दश्चतुष्पा कवयोविदुः यथावेदश्चतुष्पादंतथायुगं यथायुगंचतुष्पादंविधात्राविहितंस्वयं चतुष्पादंपुराणं
तुब्रह्मणाविहितंपुरा ॥ इतिश्रीमहापुराणेवायुप्रोक्ते ॥ सूतउवाच मन्वंतरेषुसर्वेषुअतीताना
गतेष्विह तुल्याभिमानिनः सर्वेजायंतेनामरूपतः देवाह्यष्टविधायेचतस्मिन्मन्वंतरेधिपाः ऋषय
योमनवश्चैवसर्वेतुल्याभिमानिनः महर्षिसर्गप्रोक्तोवैवंशाः स्वायंभुवस्यतु विस्तरेणानुपूर्व्वा।

श्चकीर्त्यमानंनिबोधत मनोस्वायंभुवःस्यासन्दशपुत्रास्तुतत्समाः यैरियंपृथिवीसर्वासप्तद्वीपासप
त्तना ससमुद्राकरवतीप्रतिवर्षंनिवेशिता स्वायंभुवेंतरेपूर्वमाद्येत्रेतायुगेतदा प्रियव्रतस्यपुत्रैस्तैः
पौत्रैःस्वायंभुवस्यतु प्रजासर्गेणयोगेनतैरियंविनिवेशिता प्रियव्रतात्प्रजावंतोवीरात्कन्याव्य
जायत कन्यासातुमहाभागाकर्दमस्यप्रजापतेः कन्येद्वेदशपुत्राश्च सम्राट्कुक्षिश्चतेशुभे त
योर्वैभ्रातरःशूराःप्रजापतिसमादश अग्नीध्रश्चाग्निबाहुश्चमेधामेधातिथिर्विभुः ज्योतिष्मा
न्द्युतिमान्हव्यःसवनःपुत्रएवच प्रियव्रतोभिषिच्यतान्सप्तसप्तसुपार्थिवान् द्वीपेषुतेषु
धर्मेणद्वीपांस्तांश्चनिबोधत जंबूद्वीपेश्वरंचक्रेग्नीध्रंसमहाबलं प्लक्षद्वीपेश्वरश्चापितेन
मेधातिथिस्ततः शाल्मलौतुवपुष्मंतंराजानमभिषिक्तवान् ज्योतिष्मंतंकुशद्वीपेराजानं
कृतवान्प्रभुः पुष्करेसवनस्यापिमहावीर्यस्ततोभवत् द्युतिमंतंचराजानंक्रौंचद्वीपसमादिशत्
शाकद्वीपेश्वरंचापिहव्यंचक्रेप्रियव्रतः पुष्कराधिपतिंचापिसवनंकृतवान्प्रभुः धातकीश्चैव
द्वावेतौपुत्रौपुत्रवतांवरौ महावीतस्मृतंवर्षंतस्यनाम्नामहात्मनः नाम्नातुधातकेश्चापिधात

कौंचंडउच्यते रुद्रोव्यजनयत्पुत्रान् शाकद्वीपेश्वरात्प्रभुः जलदंचकुमारंच सुकुमारं मणीचकं
वसुमोदंसमौदाकं सप्तमंचमहाद्रुमं जलदंजलदस्यापवर्षंप्रथमंउच्यते कुमारस्यचकौमारंद्विती
यंपरिकीर्त्तितं सुमारंचतृतीयंतु सुमारंतृतीयकं मणीकस्यचतुर्थंमणीचकमिहोच्यते वसुमोद
स्यवैवर्षंपंचमंवसुमोदकं मोदकस्यतुमोदाकंवर्षंषष्ठंप्रकीर्त्तितं महाद्रुमस्यनाम्नातुसप्तमंतुम
हाद्रुमं एषांतुनाभिस्तानिसप्तवर्षाणितत्रवै क्रौंचद्वीपेश्वरस्यापिपुत्राद्युतिमतस्तुवै तेषांस्ताना
निदेश्याःक्रौंचद्वीपाश्रयाःशुभाः उत्सस्योष्णस्तोदेशःपीवरस्यापिपीवरः अंधकारकदेशस्तु।
अंधकारस्यकीर्त्यते मुनेस्तुमुनिदेशोवेदुंदुभिस्ततः एतेजनपदासप्तक्रौंचद्वीपेतुभास्कराः
ज्योतिष्मतःकुशद्वीपेसप्तैतेसुमहौजसः उद्भिदोवेणुवांश्चैववैरथोलवणोधृतिः षष्ठःप्रभाक
रश्चैवसप्तमःकपिलःस्मृतः उद्भिदंप्रथमंवर्षंद्वितीयंवेणुमंडलं तृतीयंस्वैरथाकारंचतुर्थंलवणंस्मृतं
पंचमंधृतिमद्वर्षंषष्ठंवर्षंप्रभाकरं सप्तमंकपिनामकपिलस्यप्रकीर्त्तितं तेषांद्वीपाःकुशद्वीपेतस्यना
मानपर्वत आश्रमाचारयुक्ताभिःप्रजाभिःसमलंकृताः शाल्मलस्येश्वराःसप्तपुत्रास्तेतुवपुष्मतः

श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा वैद्युतो मानसश्चैव सुप्रभः सप्तमस्तथा श्वेतस्य श्वेतदेशस्तु रो
हितस्य च रोहितः जीमूतस्य च जीमूतो हरितस्य च हारितः वैद्युतो वैद्युतस्यापि मानसस्यापि मानसः सु
प्रभः सुप्रभस्यापि सप्तैते देशपालकाः प्लक्षद्वीपे तु वक्ष्यामि जंबूद्वीपादनंतरं सप्त मेधातिथेः पुत्राः प्ल
क्षद्वीपेश्वरा नृपाः ज्येष्ठः शांतभयस्तेषां सप्त वर्षाणि तानि वै तस्माच्छांतभयाच्चैव शिशिरस्तु सुखोद
यः आनंदश्च शिवश्चैव क्षेमकश्च ध्रुवस्तथा तानि तेषां सनामानि सप्त वर्षाणि भागशः निवेशितानि तैस्ता
नि पूर्वं स्वायंभुवेंतरे मेधातिथिसुतैस्तैस्तु प्लक्षद्वीपनिवासिभिः वर्णाश्रमाचारयुक्ताः प्लक्षद्वीपप्रजा
कृताः प्लक्षद्वीपादिकेष्वेव शाकद्वीपांतरेषु वै ज्ञेयः पंचसु धर्मोयं वर्णाश्रमविभागजः सुखमायुश्च रूपं
च बलं धर्मश्च नित्यशः पंचस्वेतेषु द्वीपेषु सर्वसाधारणं स्मृतं प्लक्षद्वीपपरिक्रांतो जंबूद्वीपं निबोधत
आग्नीध्रं ज्येष्ठदायादं कन्यापुत्रं महाबलं प्रियव्रतोभ्यषिंचत्तं जंबूद्वीपेश्वरं नृपं तस्य पुत्रा बभूवुः प्रजाप
तिसमा नव ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोनुजः हरिवर्षस्तृतीयस्तु चतुर्थोभूदिलावृतः र
म्यः स्यात्पंचमः पुत्रः हिरण्वान्षष्ठ उच्यते कुरुस्तु सप्तमस्तेषां भद्राश्वो ह्यष्टमस्मृतः नवमः केतुमा

ददौ किंपुरुषायच नैषधयत्स्मृतंवर्षं हरिवर्षायतद्ददौ मध्यमंयस्तमेरोस्तु सददौतदिलावृते नीलेतुयत्स्मृतंवर्षं र
लस्यतेषांदेशांनिबोधत नाभेस्तुदक्षिणंवर्षं हिमाह्वं तु पिता ददौ हेमःकूटं तु यद्वर्षं सम्याये ततः पिता
ददौ श्वेतं यदुत्तरंयस्मात्पित्रादत्तंहिरण्मये यदुत्तरंशृंगवतोवर्षंतत्कुरवेददौ वर्षमाल्यवतेचापिभ
द्राश्वायन्यवेदयत् गंधमादनंतुयद्वर्षंकेतुमालस्यन्यवेदयत् इत्येतानिमहांतीचनववर्षाणिभागशः
स्वग्रीप्रेलेभुसर्वेषुपुत्रास्तान्यभिषिच्यत ययावकर्मसधर्मात्मा ततस्तुतपसिस्थितः इत्येतैः सप्तभिः
कृत्स्नासप्तद्वीपानिवेशिता प्रियव्रतस्यपुत्रैस्तैः पौत्रैस्तस्यैतुवस्वत तेषांस्वभावतःसिद्धिस्सुखप्राया
ह्यायत्नतः विपर्ययोनतेषांसिजरामृत्युभयंनच धर्माधर्मौनतेषांस्तां नोत्तमाधममध्यमाः नतेष्वस्ति
युगावस्थाक्षेत्रेष्वेवतुसर्वशः नाभेर्हिवर्षंवस्तामि हिमाह्वेनत्रिबोधत नाभिस्त्वजनयत्पुत्रंमरुदेव्यां
महाद्युतिः ऋषभंपार्थिवश्रेष्ठंसर्वक्षत्रस्यपूर्वजं ऋषभाद्भरतोजज्ञेवीरःपुत्रशताग्रजः सोभिषि
च्याथऋषभःपुत्रंप्राव्राज्यमास्थितः हिमाह्वंदक्षिणंवर्षंतस्यनाम्नाविदुर्बुधाः भरतस्यात्मजोविद्वा
न्सुमतिर्नामधार्मिकः बभूवतस्मिंस्तद्राज्यंभरतःसन्न्ययोजयत् तेजसस्यात्मजेविद्वाप्रजापतिरमि
त्रजित् पुत्रःसकामितःश्लोकावेनराजाविवस्वतः तेजसस्यात्मजोविद्वानिंद्रद्युम्नइतिस्मृतः परमे

ष्टीसुतस्तस्यापि निधने तस्य शोभनः प्रतीहार इति तस्य नाम्ना जज्ञे तदन्वयात् प्रतिहर्त्तेति विख्यातो जज्ञे त
स्यापि धीमतः उन्नेता प्रतिहर्त्तुः सम्भवस्तस्य सुतः स्मृतः उद्गीथस्तस्य पुत्रोऽभूत् प्रस्तावस्तस्यापि तत्सुतः
प्रस्तावस्तु विभुः पुत्रः पृथुस्तस्य सुतो मतः पृथोश्चापि सुतो नक्तो नक्तस्यापि गयः सुतः गयस्य तु नरः
पुत्रो महत्स्यापि भौवनः भौवनस्य सुतस्त्वष्टा त्वष्टुर्विरजस्तस्य चात्मजः विरजस्य रजः पुत्रः शतजि
द्रजसो मतः तस्य पुत्रशतं त्वासीद्राजानः सर्व एव ते विश्वज्योतिप्रधाना ये तैरिमा वर्द्धिताः प्रजाः
तैरिदं भारतं वर्षं सप्तद्वीपमिहाऽङ्कितं तेषां वंशप्रसूतैस्तु भुक्तेयं भारती धरा कृतत्रेतादियुक्तानि युगा
ख्यानेकसप्ततिः येऽतीतास्ते युगे साई राजानस्ते तदन्वयाः स्वायंभुवेऽन्तरे पूर्वं शतशोऽथ सहस्रशः ए
षः स्वायंभुवः सर्गो येनेदं पूरितं जगत् ऋषिभिर्देवतैश्चापि पितृगंधर्वराक्षसैः यक्षभूतपिशाचैश्च
मनुष्यमृगपक्षिभिः तेषां सृष्टिरियं लोके युगैः सह विवर्त्तते ॥ इति श्री महापुराणे वंशानुकीर्त
नं ॥ ॥ ऋषय ऊचुः एवं प्रजासन्निवेशं श्रुत्वा वै शांशपायनः पप्रच्छ तत्पुनः सूतं पृथिव्यायामविस्तरैः कति द्वीपाः समुद्रा वा पर्वताश्च कति प्रभो किंयंति चैव वर्षाणि तेषु नद्यश्च काः स्मृताः

महाभूतप्रमाणंचलोकालोकौतथैवच पर्यायपरिमाणंचगतिश्चंद्रार्कयोस्तथा एतत्प्रब्रूहिनःस
र्वंविस्तरेणयथार्थतः सूतउवाच अतऊर्ध्वंप्रवक्ष्यामिपृथिव्यायामविस्तरं संख्यांचैवसमुद्राणां।
द्वीपानांचैवविस्तरं यावंतिचैववर्षाणितेषुनद्यश्चयास्मृताः महाभूतप्रमाणंचलोकालोकंतथैवच।
च पर्यायंपरिमाणंचगतिश्चंद्रार्कयोस्तथा द्वीपभेदसहस्राणिसप्तस्वंतर्गतानिवै नशक्यंतप्रमाणेन
वक्तुंवर्षशतैरपि सप्तद्वीपंतुवक्ष्यामिचंद्रादित्यौग्रहैःसह येषांमनुष्यास्तर्केणप्रमाणानिप्रचक्षते
अचिंत्याःखलुयेभावाननांस्तर्केणभावयेत् प्रकृतिभ्यःपरंयच्चतदचिंत्यंप्रभाष्यते नववर्षंप्रवक्ष्यामि।
जंबूद्वीपंयथातथा विस्तरान्मंडलाच्चैवयोजनैस्तन्निबोधत शतमेकंसहस्राणांयोजनानांप्रमाणतः
नानाजनपदाकीर्णैःपुरैश्चविविधैः शुभैः सिद्धचारणगंधर्वैःपर्वतैरुपशोभितं सर्वधातुनिबद्धैश्चशिला
जालसमुद्भवैः पर्वतप्रभवाभिश्चनदीभिःपर्वतैस्तथा जंबूद्वीपःपृथुःश्रीमान्सर्वतःपरिवारितः
नवभिश्चावृतःसर्वैर्भुवनैर्भूतभावनैः जंबूद्वीपस्यविस्तारात्समेनतुसमंततः प्रागायताःसुपर्वाणःष
डेववर्षपर्वताः अवगाढाह्युभयतःसमुद्रौपूर्वपश्चिमौ हिमप्रायश्चहिमवान्हेमकूटश्चहेमवान् त

ब्र॰पु॰
१०९

रुणादित्यवर्णाभो हैरिण्यो निषधः स्मृतः चातुर्वर्ण्यः समौवर्णो मेरुश्चोच्चतमः स्मृतः वृत्ताकृतिप्रमा
णश्च चतुरस्रः समुच्छ्रितः नानावर्णस्तु पार्श्वेषु प्रजापतिगुणान्वितः नाभिबंधनसंभूतो ब्रह्मणो व्यक्तज
न्मनः पूर्वतः श्वेतवर्णोसौ ब्राह्मणं तस्य तेन तत् पीतश्च दक्षिणेनासौ तेन वैश्यत्वमिष्यते भृंगपत्रनिभ
श्चासौ पश्चिमेन महाचलः तेनास्य शूद्रता हृष्टा मेरोर्नानार्थकारणात् पार्श्वमुत्तरतस्तस्य रक्तवर्णस्व
भावतः तेनास्य क्षत्रभावः स्यादिति वर्णाः प्रकीर्तिताः व्यक्तः स्वभावतः प्रोक्तो वर्णतः परिमाणतः
नीलश्च वैडूर्यमयः श्वेतश्चैव हिरण्मयः मयूरबर्हवर्णस्तु शातकौंभस्तु शृंगवान् एते पर्वतराजानः
सिद्धचारणसेविताः तेषामंतरविष्कंभो नवसाहस्र उच्यते मध्ये विलावृतं यस्तु महामेरोः समंततः
नवैव तु सहस्राणि विस्तीर्णः सर्वतस्तु सः मध्ये तस्य महामेरोर्निर्धूम इव पावकः वेद्यर्धं दक्षिणं मेरो
रुत्तरार्द्धं तथोत्तरं वर्षाणि यानि सप्तात्र तेषां ये वर्षपर्वताः द्वे द्वे सहस्रे विस्तीर्णा योजनानि समुच्छ्रया
त् जंबूद्वीपस्य विस्तारो तेषामायाम उच्यते योजनानां सहस्राणि शतं द्वे मध्यमौ गिरी नीलश्च निष
धश्चैव ताभ्यां हीनाश्च ये परे श्वेतश्च हेमकूटश्च हिमवान् शृंगवांश्च यः नवतिर्द्वावशीतिर्द्वौ सहस्राणि

राम॰
१०९

यत्तास्तते तेषांमध्येजनपदास्तानिवर्षाणिसप्तवै संयातविषमैस्तैस्तुपर्वतैराहृतानिच सप्ति।
तानिनदीभेदैरगम्यानिपरस्परं वसंतीतुभूतानिनानाजातीनिभागशः इदंहैमवतंवर्षंभारतं
नामविश्रुतं नैषधंहेमकूटंतुहरिवर्षंतदुच्यते हेमकूटंपरंतस्मान्नाम्नाकिंपुरुषंस्मृतम् हरि
वर्षात्परंचैवमेरोश्चतदिलावृतं इलावृतपरंनीलंरम्यकंनामविश्रुतं रम्यात्परात्तरंचैवतंविश्रु
तंतंहिरण्मयं हिरण्मयात्परंचापिशृंगसाह्वकुरुस्मृतं धनुःसंस्थेचविज्ञेयेद्वेवर्षेदक्षिणोत्तरे
दीर्घाणितत्रचत्वारिमध्यमंतदिलावृतम् अर्वाक्निषधस्याथवेद्यर्द्धंदक्षिणंस्मृतं परंनीलव
तोयच्चैववेद्यर्द्धंतुतदुत्तरं वेद्यर्द्धेदक्षिणेत्रीणिचोत्तरे ---- तयोर्मध्येतुविज्ञेयंमेरुमध्यमिला
वृतं दक्षिणेनतुनीलस्यनिषधस्योत्तरेणतु उदगायतोमहान्शैलोमाल्यवान्नामपर्वतः योजनानां
सहस्रंतुशतानीषधायतः आयामतश्चतुस्त्रिंशत्सहस्राणिप्रकीर्त्तितः तस्यप्रतीच्यांविज्ञेयःपर्व
तोगंधमादनः आयामोनैतिविस्तारोमाल्यवान्नामविस्तरः परिमंडलयोर्मध्येमेरुरुत्तमपर्वतः
चतुर्वर्णस्तुसौवर्णश्चतुरस्रःसमुच्छ्रितः अव्यक्ताधातवःसर्वासमुत्पन्नाजलाशयः अव्यक्ताद

ब्र.पु.
११०

थिवीपद्मं मेरुपर्वतकर्णिकं वतद्यंथंसमुत्पन्नं वक्रंपंचयत्नेणसहतत् ततः सर्वा समुत्पन्ना वृत्तयोद्वि
जसत्तमाः नैककल्पार्जितैः पुण्यैर्विविधैः प्राग्उपार्जितैः कृतात्माभिर्व्यनीतात्मा महात्मा पुरुषो
त्तमः महादेवो महायोगी जगज्येष्ठो महेश्वर सर्वलोकगतोनंतः अमूर्त्तित्वावजायत ततस्य प्राकृ
तामूर्त्तिमोस्तिमेदास्यसंभावा योगाचैवेश्वरस्वा च सर्वस्मा गतपवसः तन्निमित्तसमुत्पन्नं लोकप
द्मंसनातनं कल्पशेषस्यतस्यादौ कालस्यगतिरीदृशी तस्मिन्पद्मे समुत्पन्नो देवदेवचतुर्मुखः
प्रजापतिपतिर्ब्रह्मा ईशानो जगतप्रभुः तस्य बीजनिसर्गोहि पुष्करस्य यथार्थवत् कृत्स्नः प्रजानिसा
र्गेण विस्तरेणेह कथ्यते यदद्भुतं सर्वं कार्यं ततस्तन्नाभितो भवेत् पद्माकारात्समुत्पन्ना पृथिवी सव
नद्रुमा तदस्य लोकपद्मस्य विस्तरेण प्रकाशितं वर्णपमामे विभागेन क्रमशः शृणुत द्विजाः महा
द्वीपा श्रुतिख्याताश्चत्वारः पत्रसंस्थितः ततः कर्णिकसंस्थाभो मेरुर्नाम महाचलः नानावर्णसुरु
पार्श्वेषु पूर्वतश्चैव उच्यते पीतं तु दक्षिणेन तस्य विस्तरेण प्रकाशितं उत्तरं तस्य रक्तं वै स्वाभिवर्णसम
मन्वितं मेरोस्तु शोभते शुभ्रो राजवत्स तु धिष्ठितः तरुणादित्यवर्णाभो विधूमखपावकः चतु

राम
१·९०

ताशीतिसहस्रऊर्ध्वेण परिकीर्त्तितः प्रविष्टः षोडशाधस्ताद्विस्तृतस्तावदेव तु सर्वतोवस्थितत्वात्तु द्वात्रिं
शान्मूर्ध्नि विस्तृतः विस्ताराद्विगुणस्तस्य परिणाहः समन्ततः मंडलेन प्रमाणेन त्र्यस्रेणैव तु दर्शिष्यते
चत्वारिंशत्सहस्राणि योजनानां समन्ततः अष्टाभिरधिकानस्य त्र्यस्रे समानेन प्रकीर्त्तितं चतुरस्रेण
मानेन परिणाहः समन्ततः चतुःषष्टिसहस्राणि योजनानां विधीयते स पर्वतो महान् दिव्यो दिव्यौष
धिसमन्वितः भुवनैरावृतः सर्वो जातरूपमयैः शुभैः तत्र देवगणाः सर्वे गंधर्वोरगराक्षसाः शैलरा
जे प्रदृश्यन्ते शुभाश्चाप्सरसां गणाः स तु मेरुः परिवृतो भुवनैर्भूतभावनैः चत्वारो यस्य देशा वै नाना
पार्श्वेष्वधिष्ठिताः भद्राश्वो भरतश्चैव केतुमालश्च पश्चिमः उत्तराः कुरवश्चैव कृतपुण्यप्रतिश्रयाः कर्णिका
तस्य पद्मस्य समंततात्परिमंडलं योजनानां सहस्राणि नवतिः षट्प्रकीर्त्तिता चत्वारश्चाप्यशीतिं च
त्रंतरोत्तरधिष्ठिताः त्रिंशतं च सहस्राणि योजनाग्रप्रमाणतः तस्य केसरजालानि विस्तीर्णानि समे
ततः सहस्राण्यपि षष्टिं मार्यस्य शीतिः प्रथुलायता चत्वारि तस्य पत्राणि योजनानां चतुर्दश तत्र यानि ते
मयाः सर्वे कर्णिके त्वभिप्रतिष्ठिताः तावत्प्रमानाम काग्रा समासेन निबोधत शतानि मे नेमे ने त्रिः सह

॥ ११
२२३

ब्र॰पु॰
१११

स्वाहिमवर्षिभिर्वृतः अत्रहाश्रिमेनं सावर्णिश्चतुरस्रं तु भास्वरिः वर्षीयणि तु समास्वर्णं शरावत्वेचगालवः
ऊर्ध्वेणिः कृतेगार्ग्यः कौहकिः परिमंडलं यत्र यस्यास्ति यत्याश्चै पर्वताधिपते स्थिः तत्र देवाः सुवे
दासौ वृतैर्नवेदकत्वशः मणिरत्नमयं चित्रं नानावर्णप्रभास्वरं अनेकवर्णनिवयं सौवर्णं मरु
णाप्रभं कान्तसहस्रपत्राणि सहस्रोदककेदरं सहस्रशतयत्रं तं विद्धि मेरुं नगोत्तमं मणिरत्नार्पित
स्तंभैः मणिचित्रितवेदिकैः सुवर्णमणिचित्राङ्गैतथा विद्रुमतोरणैः विमानयानैश्चा मद्विशतेः
(एवं तं विद्धि मेरुं नगोत्तमं मणिरत्नार्पितस्तंभैः मणिचित्रितवेदिकैः सुवर्णमणि) संख्यं दिवौ
कसां प्रभादीपितपर्यंतो मेरुः पर्वणि पर्वणि तस्य सर्वसहस्राणि नानाश्रयविभूषिता सर्वदेव
निकायानि संनिविष्टान्यनेकशः तमाव सन्त्वोर्ह्दतले देवदेवचतुर्मुखः ब्रह्माब्रह्मविदांश्रेष्ठोवरि
ष्ठो दिवौकसां महाभुवनसंपूर्णः सर्वकामगुणान्वितः महापुरुषसाहस्रैर्दिव्यानेकसमाकुलं
तत्र ब्रह्मसभारम्याब्रह्मर्षिगणसेविता नाम्नामनोवतीनाम सर्वलोकेषु विश्रुता तत्र शानसुरदेव
समसहस्रादित्यवर्चस महाविसंस्थ - - स्य - हिमावर्त्ततेसदा तत्र सर्षिगणदेवाश्चतत्वेत्राने

राम॰
१११

जसां राशिर्देवानां तत्र कोत्र्यंत तत्रास्य स्त्रीयति श्रीमान् सहस्राक्षः पुरंदरः उपास्यमानस्त्रिदशैर्महायोगैः सुर
र्षिभिः तत्र लोकपतेस्थानमादित्यसमवर्चसः महेंद्रस्य महाराजः सर्वसिद्धैर्नमस्कृतं तमिंद्रलोकं लोकस्य रु
ध्या परमया युतं दीप्यते त्वमरश्रेष्ठैस्त्रिदिशैर्नित्यसेवितं द्वितीयेप्यंतरतटे वैदिशायां पूर्वदक्षिणे नानाधातुश
तैश्चित्रैः स्तरस्यपतितेजसे नैकरत्नार्पिततलमनेकसंभसंयुतं शांबूनदकृतोपानैर्नानारत्नसुवेदिकं कूप
गारैर्विनिक्षिप्तमनेकैर्भवनोत्तमैः महाविमानैः पूर्यितं भास्वरं जाततेजा तवेदसं माहीतेजोवती नाम कृता
ग्नेस्य महासभा साह्यान तत्र सुरश्रेष्ठः सर्वदेवमुखोऽनलः शिखाशन सहस्रांचो ज्वालामाली विभावसुः ह्य
तेहूयते चैव तत्र सर्षिगणैः सुरैः अधिदैवकृते विप्रैर्विशेषः सततुपव्यते सविभागं च तत्र स्य एक एव न
संशयः भोगांतरमनुप्राप्य एकतेजो विभुस्सतः प्रथमस्त्वे चरित्युतस्याच कार्याकारणमिच्छितां तमक्षं लोक
लोकैस्सलद्वीर्यैस्सत्यराक्रमैः महात्मभिर्महासिद्धैर्महाभागैर्नमस्कृते तृतीयेप्यंतरपटे एवमेव महास
भा वैवस्वतस्य विख्याता लोके ख्यातस्य सपसा तथा च तस्यपी दिग्नागैर्नैरुताधिपतिसभा नाम्ना कृष्णांगा
नाम विरूपाक्षस्य धीमतः पंचमोप्यंतरतटे एवमेव महासभा वैवस्वतस्य विख्याता नाम्ना शुभवती स

भा उदकाधिपतेः ख्यातावरुणस्य महात्मनः परोत्तरे तथा देशे षष्ठेंतरतटे शिवे वायोर्गंधवती नाम स
भा सर्वगुणोत्तरा सप्तमेभ्यंतरतटे नक्षत्राधिपतेः सभा नाम्ना महोदयोदयो नाम शुद्धवैडूर्यवेदिका तु
थाष्टमेंतरतटे ईशानस्य महात्मनः यशोवती नाम सभा तप्तकांचनसप्रभा महाविमाना न्येतानि दि
व्यानि ह्यष्टाभिर्हि अष्टानां देवमुख्यानामिंद्रादीनां महात्मनां ऋषिभिर्देवगंधर्वैरप्सरोभिर्महो
रगैः सेवितानि महाभागैस्तपस्यानगतैः सदा नाकपृष्ठं स्वर्गमिति त्रिविभिः परिपठ्यते वेदे वेदांगवि
द्भिर्हि सर्वैः पर्यायवाचकैः तदेवं सर्वदेवानामधिवासकृतात्मनां देवलोकागिरौ तस्मिन्सर्वैः कीर्ति
षु गीयते नियमैर्यमैर्विविधैर्वहुभिर्नियतात्मभिः पुण्यैरन्यैश्च विविधैर्नेकजातिशतार्चितैः प्रा
प्नोति देवलोकं तं स स्वर्ग इति पठ्यते ॥ इति श्रीमहापुराणे वायुप्रोक्ते ॥ सूत उवाच ॥ यत्तदेकस्मिं
का मूलमिति वै सम्यक्कीर्तितं तं योजनसहस्राणि सप्तति नामधस्मृतः चत्वारिंशत पश्चाष्टौ च सहस्रा
णि पत्रमंडलं शैलराजानामंतरस्य मेरुमूलमिति श्रुतिः तेषां गिरिसहस्राणामनेकेषु महोछ्रिताः
दिक्षु सर्वासु पर्यंते मर्यादापर्वतास्मृताः निकुंजकंदरनदीगुहानिर्झरशोभिता वहुप्रासादकट

केसरैश्च कुसुमोज्वलैः नितंबपुष्पसालंबैः सानुभिर्धातुमंडितैः शोभितागिरयः सर्वे पुष्पैरत्न।
समर्पितैः विहंगसंघसंघुष्टैः कुंजैरैरवपमैरपि सिंहशार्दूलसरभैर्नैकैश्चामरवारणैः नानावर्ण
कृतिधरैः सविता विविधैर्नगैः समवारुविक्तशोभामेवैकं दशपर्वतो बाह्याभ्यंतरयोपेतु त्रिवारुसस
मास्मृताः जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतो तौ दक्षिणोत्तरायामावानीलनिषधायतौ कैला
शो हिमवांश्चैव दक्षिणोत्तरपर्वतौ पूर्वपश्चायतावेतौ वर्त्सवांतर्व्यवस्थितौ योसौ मेरुर्द्विजश्रेष्ठ।
प्रांशुः कनकपर्वतः विष्कंभं तस्य वक्ष्यामि तन्मे निगदतः शृणु महापादास्तु चत्वारो मेरोरथ च तु
र्दिशं यविष्टब्धा मेचलनि समहीपवतीमही दशयोजनसाहस्रस्वायामसेषुमध्यने देवगंधर्वचा।
रिता नानारत्नविभूषिता नैकनिर्झरवप्राढ्या रम्यकेदारनिर्मिता नितंबपुष्पकालंबैः शोभिता
श्चित्रतानव मनःशिलादरिभिश्च हरितालतलैस्तथा सुवर्णमणिचित्राभिर्गुहाभिश्च समंत
तः श्रुङ्गैर्हिंगुलकप्रख्यैः काननैर्धातुमंडितैः वरकांचनचित्रैश्च प्रवालैः समलंकृताः सुचिराः
शातपर्वाणः सिद्धवासाश्च दान्विताः महाविमानैश्च महद्भिः समंतात्परिदीपिताः पूर्वेण मंदरो

नामदक्षिणेगंधमादनः विपुलःपश्चिमेपार्श्वेसुपार्श्वश्चोत्तरेस्मृताः तेषांसरस्सश्रृंगेषुवज्रवैडूर्य
वेदिकाः शाखासहस्रकलिलाःसुमूलाःसुप्रतिष्ठिताः स्निग्धैर्निलैःघनैःपर्णैःसंछिन्नविविधाःश्रि
याः अनेकयोजनायेधासदापुष्पफलोपगाः महागंधर्वसेव्याश्चसेविताःसिद्धचारणसेविताः मु
हावृक्षाःसमुत्पन्नाश्चत्वारोद्वीपकेतव मंदरस्यगिरेःशृंगेमहावृक्ष [illegible] प्रालंबशाखाशिख
रःकदंबश्चैवपादपः महाकुंभप्रमाणैस्तुपुष्पैर्विकचकेसरैः महागंधैर्मनोज्ञैश्चशोभितःस
र्वकालजैः सहस्रमधिकंसोऽथगंधेनापूरयन्दिशः योजनानांसमंताद्धिमंदमारुतवीजितः वर
केतुरिवप्रख्यातोभद्राश्वोनामयेद्विजाः यत्रसाक्षाद्धृषीकेशःसिद्धसंघैर्महीयते यस्यकुंदकदंबा
स्तत्त्वाश्वेतरूपोहरिः प्राप्तवानमरश्रेष्ठसततंसत्कृतःपुरा तेनचालोकितंसर्वंद्वीपेहिपदनाय
काः यस्यनाम्नासमाख्यातोभद्राश्वोनामनामतः दक्षिणस्यापिशैलस्यशिखरेदेवसेविते जं
बूःसदापुष्पफलासदामाल्योपशोभिता महामूलैर्महासिद्धस्निग्धवर्णैर्विभूषिता नैकैःसदा
पुष्पफलैः शाखाभिश्चोपशोभिता तस्यास्त्वतिप्रमाणानिस्वादूनिचमहान्तिच फलान्यमृत

कल्पानि पतंति गिरिमूर्द्धनि तस्माद्गिरिवरप्रस्थात्तेन प्रसंस्रवाहिनि नदी जंबूनदी नाम प्रवृत्ता
मधुवाहिनि तत्र जांबूनदं नाम सुवर्णं जलनं प्रभं देवालंकारमतुलं जायते पापनाशनं देवदा
नवगंधर्वा यक्षराक्षसपन्नगाः तत्पिबंतमृतः पद्मं मधुसंभवं सुसमं सकेतुर्दक्षिणो द्वीपे जंबूलो
केषु विश्रुता यस्या नाम्ना स विख्यातो जंबूद्वीप सनातनः विपुलस्यापि शैलस्य पश्चिमस्य महा
त्मनः जातस्शृंगेति सुमहानश्वत्थश्चैव पादपः विलंबिवरमालाठ्य सुवर्णमणिवेदिकः महो
च्छ्रस्कंधविटपो नैकसत्वगुणालयः कुंभप्रमाणैः स्वस्वादैः फलैः सर्वर्तुकैः शुभैः सकेतुः केतुमाला
नां देवगंधर्वसेविताः केतुमालेति यस्यात स्य नाम्ना प्रकीर्त्तितं तन्निबोधत विप्रेंद्रा निरुक्तेनाम कर्म
तः क्षीरोदमथने वृत्ते दैत्यपक्षे पराजिते महासमरसंमर्दे वृक्षक्षोभविमर्दिता सहसाहेणविहि
ता तस्य सेधे समासक्ता हाश्वत्थस्य वनस्पतेः सा तेवेव महागंधा स्रग्माना सार्वकामिकी शुभेते समा
हाभागा विविधैः सिद्धचारणैः तस्य केतोः सदा माना देवदत्ता विराजते पवनेनरिता दिव्यं वाति गंध
मनोरमं नाभ्यानामाकिनो द्वीपः पश्चिमे वरुविस्तरः केतुमाल इति ख्यातो देवो वेहच सर्वशः

व्रु॰
११४

स्वपांतरेचापिस्मृंगेजातंमहाद्रुमं न्यग्रोधोविपुलस्कंधो नैकयोजनमंडलः मालदामकलैर्युक्तश्चिवि
धैर्गंधशालिभिः शाखाविलंबीस्तुश्रुभेसिद्धचारणसेवितः प्रवालकुंभसदृशै मधुप्रस्रवफलैःसद
सत्फलैस्तरञ्ज्ञुरुणान्तुकेनतुवृक्षप्रकाशते सनत्कुमारावरजामानसाःब्रह्मणःसुताः सप्ततत्रमहा
भागाकुरवोनामविश्रुताः तत्रतेशाश्वतस्थानैः सत्वस्थैःपुण्यकीर्तिभिः अव्ययंहेमपरमंलोकं
प्राप्तंस्थानतनं तेषांनामानिकीर्तितोद्वीपः सप्तानांवैमहात्मनांदिविचैरुचविख्याताउत्तराःकुरवः
सदा ॥ इतिश्रीमहापुराणेवायुप्रोक्ते ॥ सूतउवाच तेषांचतत्रसौवक्ष्यामिश्रौलैंद्राणंयथाक्र
मं अनुबंधानिरम्याणिसर्वकालर्तुकानिच सारिकाभिर्मयूरैश्चचकोरैश्चमदोत्कटैः पुष्टैश्चभृंग
राजैश्चचित्रकैश्चसमंततः जीवंजीवकनादैश्चहंसकानांचनादितैः सुग्रीवकांचनरवैःकलि
विकरुतैस्तथा कूजितानरशावैश्चसरम्याणिचसर्वशः मदोत्कटैर्मधुकरैभ्रमरैश्चसहालसैः
उपगीतवनांतानिकिंनरैश्चघघचिघचित पुष्पवृष्टिंविसंचंतिमंदमारुतकंपिताः तरवोयत्र
दृश्यंतेचारुपल्लवशोभिता लवकैर्मंजरीभिश्चतान्येकिसलयैस्तथा मंदवातवशाद्दोलैर्दी

राम॰
११४

लाभिर्युतानिच नानाधातुविचित्रैश्चकाननैश्चैश्शिलातलैः सह्यैश्चचिद्विजश्रेष्ठाविन्यस्तैःशोभितानिच
देवदानवगंधर्वैर्यक्षराक्षसपन्नगैः सिद्धाप्सरोगणैश्चैवसेवितानिततस्ततः मनोहराणिचत्वारि
देवाक्रिडनकान्यथा चतुर्दिक्षुमुदाराणिनामाभ्यणुतनानिमे पूर्वंचैत्ररथंनाम दक्षिणंनंद
नंदनं विभ्राजंपश्चिमंविद्यादुत्तरंसावितुर्वनं महावनेषुचैतेषुनिविष्टानियथाक्रमं अनुबंधा
निरम्याणिविहगैःकूजितानिच रत्नैर्विमलैर्मतीर्यानिमहाउप्यतानिच महानागाधिवासी
निसेवितानिमहात्मभिः सदुसामलतोयानिशिवानिविमुखानिच सिद्धदेवासुरवरैरूपसष्टे
जलानिच कुवप्रमाणैर्विकरैर्महागंधैर्मनोहरैः पुंडरीकैर्महाव्यत्रैरुत्पलैःशोभितानिच म
हासरांसिचत्वारितानिवक्ष्यामिनामतः अरुणोदंसरःपूर्वंदक्षिणंमानसंस्मृतं शीतोदंपश्चि
मंसरोमहाभद्रंतथोत्तरं अरुणोदयंचपूर्वेणयेचशैलातान्निबोधतः ताङ्कीर्त्यमानान्तत्वे
नस्मृणुध्वविस्तरान्मम शीतांतश्चकुमंजश्चकुरीरश्चाचलोत्तमः विकंकोमणिशैलश्चवृषभश्च
श्चाचलोत्तमः महाशीलाप्यरुचकः सविडमंदरस्तथा वेणुमांश्चसमेघश्चनिषधोदेवपर्व
तः

इत्येतेपर्वतवर्वतवराश्चान्येचगिरयस्तथा पूर्वेणमंदरस्यैवसिद्धवासाउदाहृताः सरसोमानसस्येहद
क्षिणेयेमहाचलाः येकीर्त्तितामयातेवैनामतस्तान्निबोधत शैलस्त्रिशिखरश्चापिशिशिरश्चा
चलोत्तमः कलिंगश्चपतंगश्चरुचकश्चैवस्थसानुमान् नाम्नाभ्रसाविशाखश्चतथाश्वेतोदरोगि
रिः समूलोविषधारश्चरत्नधारश्चपर्वतः एकशृंगोमहामूलोगजशैलः पिशाचकः पंचशै
लासोहीमवांश्चाचलोत्तमः इत्येतेदेवचरितात्कटापर्वतोत्तमाः दिग्भागेदक्षिणेप्रोक्तामेरो
रमरवर्चसः अपरेणसितोदस्यसरसोद्विजसत्तमाः उक्तामायेमहाशैलातांश्चवक्ष्येयथाक्र
मं सुवक्षाशिखिशैलश्चकालोवैडूर्यपर्वतः कपिलःपिंजरोरुद्रउत्तरणाघिश्रीमतः येमया
पर्वताप्रोक्तानात्वदिध्येयथाक्रमं शंकूटोमहाशैलोवृषभोहंसपर्वतः नागश्चकपिलश्चैवइं
द्रशैलश्चसानुमान नीलःकनकशृंगश्चशतशृंगश्चपर्वतः पुष्पकोमेघशैलश्चविराजश्चाच
लोत्तमः जारुधिश्चैवशैलेंद्रइत्येतेउत्तरास्मृताः एतेषांशैलमुख्यानामंतरेषुयथाक्रमं स्था
लास्थानरंध्राण्यथश्चसरांसिचनिबोधत ॥ ॥ इतिश्रीमहापुराणेवायुप्रोक्तेभुवनविन्यासोना

म॥ सूतउवाच ॥ शीतांतस्याचलेंद्रस्य कुमंजस्यांतरेण तु द्रोण्यो विहगसंघुष्टा नानासत्वनिषे
विता: त्रियोजनशतायामा विस्तीर्णा शतयोजना: सरसामलयानीयंरम्यं तत्र सरोवरं द्रोण्याचा
यप्रमाणैस्तु पुंडरीकै: सुगंधिभि: सहस्रशतपत्रैर्हि महापद्मैरलंकृतं महोरगैरध्युषितं महा
भोगैर्दुरासदै: देवदानवगंधर्वैरुपस्पृष्टजलं शुभं पुण्यं तच्छ्रीसरो नाम प्रकाशं दिवि चेह च प्रस
न्नजलसंपूर्णं शरण्यं सर्वदेहिनां तत्रैकं महापद्मं मध्ये पद्मवनस्य तु कोटीपत्रप्रचारं तत्तरुणा
दित्यवर्चसं नित्यं व्याकोशमजरं चांचल्याच्चातिमंडलं चारुकेसरजालाढ्यं मत्तषट्पदनादि
तं तस्मिन्पद्मे भगवती साक्षाच्छ्रीर्नित्यमेव हि लक्ष्म्या: पद्मं तदावासं मूर्तिमत्या न संशय: सरस
स्तु पूर्वस्मिन्तीरे सिद्धनिषेविते सदापुष्पफलं रम्यं तत्र बिल्ववनं महत् शतयोजनविस्तीर्णं
त्रियोजनशतायतं अर्द्धक्रोशप्रांशुशिखरैर्महावृक्षै: सहस्रश: शाखासहस्रकलिलैर्महास्कं
धै: समाकुलं फलै: सुवर्णसंकाशैर्हरितै: पांडुरैस्तथा अमृतस्वादुसदृशैर्भेरीमात्रै: सुगंधि
भि: शीर्यमाणै: पतद्भिश्च कीर्णभूमिरनंतरा नाम्ना तच्छ्रीवनं नाम सर्वलोकाभिविश्रुतम् गंध।

ब्र॰पु॰
११६

वैः किंनरैर्यक्षैर्महानागैश्च सेवितं सिद्धैश्चैव समाकीर्णं नित्यं बिल्वभक्षाशिभिः विविधैर्भूतसंघैश्च
नित्यमेव निषेवितं तस्मिन्वने भगवति साक्षाच्छ्रीनित्यमेव हि देवीं संनिहिता तत्र सिद्धसंघैर्नमस्कृ
ता विकंकस्याचलेंद्रस्य मणिशैलस्य चांतरे शतयोजनविस्तीर्णं हि योजनशतायतं विपुलं
चंपकवनं सिद्धचारणसेवितं पुष्पलक्ष्म्यावृतं भाति ज्वलितमिव नित्यदा अर्द्धक्रोशोच्चशिखरैः
महास्कंधैः पलाशिभिः प्रफुल्लशाखाशिखरैः पिंजरं भाति तद्वनं द्विबाहुपरिणाहैस्तैस्त्रिह
स्तायामविस्तरैः मनःशिलाचूर्णनिभैः पांडुकेसरशालिभिः पुष्पैर्मनोहरैर्व्याप्तं व्याकोशैः
गंधशालिभिः विराजते वनं सर्वं मत्तभ्रमरनादितं तद्वनं दानवैर्दैत्यैर्गंधर्वैर्यक्षराक्षसैः किं
नरैरप्सरोभिश्च महानागैश्च सेवितं तत्राश्रमं भगवतः कश्यपस्य प्रजापतेः सिद्धसाध्यग
णाकीर्णं नानाकृतिविभूषितं महानीलकुमंजाभ्यामंतरे च चलावप्य महानद्याः सुखायास्तु
तीरे सिद्धनिषेवितं पंचाशद्योजनायामं त्रिंशद्योजनविस्तरं रम्यं तालवनं तद्धि अर्द्धक्रोशोच्चम
स्तकं महामूलैर्महासारैः स्थिरैरविरलैः शुभैः समुदंजननं स्यानैः परिवृत्तैर्महाफलैः म

राम॰
११६

हृगंधरसोपेतैरुपेतं सिद्धसेवितं माहेंद्रस्य हि पुंड्रस्य तत्रावास उदाहृतः ऐरावतस्य भद्रस्य सर्व
लोकेषु विश्रुतः वेणुमंतस्य शैलस्य स्व मेघस्यांतरेण च सहस्रयोजनायामं विस्तीर्णं शतयो
जनं वृक्षगुल्मलतागुल्मैः सर्ववीरुद्भिर्विवर्जितं दर्वीप्रस्तारमेवाथ सर्वसत्त्वविवर्जितं तथा नि
षधशैलस्य देवशैलस्य चांतरे सहस्रयोजनायामः शतयोजनविस्तृतः सर्वो ह्येकशिलाभूमि
वृक्षवीरुधवर्जिता व्याप्तता पादमात्रेण शुद्धोदकेन समंततः इत्येतन्महांतरद्रोण्यो नानाकाराः
प्रकीर्तिताः मेरोः पूर्वेण विप्रेंद्रा यथावदनुपूर्वशः इति श्रीमहापुराणे वायुप्रोक्ते ॥ सू
त उवाच ॥ अतः परं प्रवक्ष्यामि दक्षिणां दिशिमाश्रिताः योद्रोण्यः सिद्धचरिताः शृणुतास
नुपूर्वशः शिशिरस्याचलेंद्रस्य पतंगस्यांतरेण च शुक्लभूमिप्रियापुत्रकं लतालिंगितपादपं
पृथुद्वेयोच्चशिखरैः पादपैरुपशोभितं उदुंबरवनं रम्यं पक्षिसंघनिषेवितं पक्वैर्विद्रुमसंका
शैर्मधुपर्कैर्मनोरमैः ज्वलितेनैव वनं भाति महाकुंभोपमैः फलैः यत्र हृष्टाः स गंधर्वा किंनरा
उरगालयाः विद्याधराश्च मुदिता उपजीवंति नित्यशः प्रसन्नस्वादुसलिलाः स्रवंत्यो वहुकाः

सरसामलतोयास्ताः सर्वासिच समंततः तत्राश्रमो भगवतः कर्दमस्य प्रजापतेः सेव्यं सुरगणा
कीर्णं सर्वतासुविचित्रकानने समंताद्योजनशतं तद्वनं परिमंडले ताम्रवर्णस्य शैलस्य पतंगस्या
न्तरेणतु शतयोजनविस्तीर्णं हि द्वियोजनशतायतं तरुणादित्यसंकाशैः पुंडरीकैः समंततः सह
स्रपत्रैर्विकचैर्महापद्मैरलंकृतं तथाचमरसंलीनैः शतपत्रैः सुगंधिभिः सुफुल्लैः शोभितं ज
जलैः रक्तनीलैर्महोत्पलैः सरोवरं महापुण्यं देवदानवसेवितं मत्तैर्योरध्यकषितं नीलजाल
विभूषितं तस्य मध्ये जनपदो ह्यायतः शतयोजनः त्रिंशद्योजनविस्तीर्णो रत्नधातुविभूषि
तः तस्योपरि महारथ्याः प्रांशुप्राकारतोरणाः नरनारीगणाकीर्णाः स्फीतविभवविस्तरैः व
लभीकूटनिर्यूहैर्मणिभक्तिविचित्रितैः रत्नचित्रार्पिततलैस्तम्भचित्रोत्तरच्छदैः महाभवनमा
लाभिर्महाप्रांशुभिरुन्नतैः विद्याधरपुरं तत्र शोभते भ्राजमद्भुतं विद्याधरपतिस्तत्र पुलोमा
नाम विश्रुतः चित्रवेषधरः स्रग्वी महेन्द्रसदृशाकृतिः दीप्तानां चित्रवेषाणां सूर्यप्रतिमतेजसा
सां विद्याधरसहस्राणामनेकेषां महाराजराट् विश्वावसोश्चाचलेन्द्रस्य पतंगस्यान्तरेणच सरसा

स्ताम्रवर्ण्णैः स्रवद्भिर्वनीरैपरिष्कृतं पंचेभुक्तेपर्ण्णैर्विहंगसंघाश्रवर्णैः शोभितं सर्वकामफलैस्तत्र स्फीतं तंवा
म्रवर्णं महत् फलैः कनकसंकाशैः महास्वादैः सुगंधिभिः महाकुंभप्रमाणैश्च तत्र स्थावै समंत
तः गंधर्वाः किंनरा यक्षा नागा विद्याधरालयाः पिबंत्याम्ररसं तत्र सुस्वादुममृतोपमं तत्राम्ररस
पीतानां मुदितानां महात्मनां श्रूयंते सुमहृष्टानां नादास्तस्मिन्महावने समस्तस्याचलेंद्रस्य
वसुधारस्य चांतरे समासुरभिः स्त्रीप्यौ विहंगैरुपशोभिता त्रिंशद्योजनविस्तीर्णा पंचाशद्योज
नायुता तत्र विल्वस्थली विप्रा मृद्धा नाम्ना: फलद्रुमाः सुस्वादैर्विद्रुमनिभैः फलैर्विल्वैर्महा
पमैः शीर्यमाणैर्विशीर्णैश्च प्रक्लेन्नतलमृत्तिकाः तांस्थलीमुपजीवंति यक्षगंधर्वकिंनराः सि
द्धा नागाश्च बहुशो नित्यं विल्वफलाशिनः अंतरे वसुधारस्य रत्नधारस्य चांतरे त्रिंशद्योजनविं
स्तीर्णं समायतं शतयोजनं सुगंधकिंशुकवनं नित्यपुष्पितपादपं पुष्पलक्ष्मावृतं भाति प्रदीप्त
मिव सर्वतः यस्य गंधेन दिव्येन वासितं परिमंडलं समप्रयोजनशतं काननानि समंततः तस्मि
न्द्रुचारणगणैः रप्सरोभिश्च शोभितं रम्यते त्किंशुकवनं जलाशयविभूषितम् तत्रादित्यस्य

वसंत्यत्र देवं स्कंदी नमायाननं महत् मासे मासे वतुरश्चित्तत्र सूर्यः प्रजापतिः तत्र कालस्य कर्तारं सहस्रांशुं सहस्रो
त्तमं सिद्धसंघान संस्थितिं सर्वलोकेन महत्तां पंचकूटस्य शैलस्य कैलाशस्यांतरेण तु षष्ठिशतयोजनी।
यामं विस्तीर्णं शतयोजनां ह्रदं समेत्य रत्नाढ्यं सर्वतो हेमपांडुरं उध्मारं सर्वसत्वानां उर्मिमालां महर्द्धिमत्
इत्येतत्तास्वतरद्रोणं दक्षिणं परिकीर्तितः यथा पूर्वमखिलं सिद्धसंघनिषेवितः पश्चिमायां दिशि
तथा यंतरद्रोण्यप विस्तराः तान्वर्णयिष्यमानांस्तु त्वं शृणुते मानं द्विजोत्तमाः अनंतशालगिरोर्नतस्मिन्सर्वर्षि
शाखिशैलयोः समंतात् योजनशतं एकभूमिशिलातलं नित्यं तं महाघोरं कस्य शैलो महर्द्धिमत् अगा।
ध्य सर्वसत्वानां ईश्वराणां सदाकृतं अतिधनस्य च सदा ज्वालामालीविभावसुः ज्वलत्येव सदा देवः
य अध्युत्तत्वकृतां शान अधिदेवकृतेयो सावग्नेर्भागो विधीयते सततं अज्वलनेन नित्यं लोकसंवर्तको नलः अं
तरे शैलवरयोर्देवापि जयदो ग्रभाः मातुलिंगस्थलीतत्र हा यामा दशयोजना मधुव्यंजन संस्थाने
सरसैकनुकप्रभैः फलैः परिणतैः सर्वा शोभिता सा महास्थली तत्राश्रमं महाउग्रं सिद्धसंघनिषेवि
तं बृहस्पतेः प्रपुण्यं दिव्यं सर्वकामगुणैर्युतं तथैव शैलवरयोः कुमुदांजनयोरपि अंतरे केसरद्रोण्यं वै।

कायामयोजना द्विबाहुपरिणाहैस्तस्मिन्यस्मायतनविस्तृतैः चंद्रांशुवर्णैर्व्याकोशैर्मनःप्रसादनादिभिः म
धुसर्पिरसैः एकैर्महागंधैर्मनोहरैः शावलैस्तत्रवनैर्भासितं समैः सर्वकालजैः तत्रविस्तोत्सरगुरोद्दीप्त
मायतनं महत् प्रकाशं सर्वलोकेषु सर्वलोकनमस्कृतं सूतरे शोत्तरयोः हंसपांडुरयोरपि त्रिंशद्यो
जनविस्तीर्णं तत्वत्वायतनयोजनं श्लक्ष्णमेकशिलं देशं वृक्षवीरुधवर्जितं मृत्वपादप्रचारं च निम्नोन्नत
विवर्जितं मध्ये तस्य सरसस्य मरणस्थलपद्मिनी सहस्रचक्रव्याकोशैः कृतामावेरलंकृता; पुंडरी
कैर्महापद्मैः रुचिरैर्गंधशालिभिः शतपत्रैश्च विकचैरुत्पलैर्नीलपत्रपैः मदोत्कटैर्मधुकरैश्चामरै
श्रमवोत्कटैः मंडुगजद्दकं दानां किंनराणां घर्निस्वनैः उपगीतपद्मशोभाढ्या विस्तीर्णा स्थलपद्मिनी य
त्र गंधर्वचरिता सिद्धचारणसेविता मध्ये तस्याः पद्मिन्याः पंचयोजनमंडलः निग्रोधो विपुलस्कंधोऽस
नेकारोहमंडितः तत्र च चंद्रप्रभवः श्रीमान्सूर्याग्निचंद्रनिभाननः सहस्रवदनो देवा नीलवासाः सहस्रारि
हा पद्ममालाधरस्सर्वे महाभागोऽपराजितः इज्यते यक्षगंधर्वैर्विद्याधरगणैस्तथा तस्मिन्नायतने सा
क्षादनादिनिधनो हरिः पद्मोपहारैर्विविधैरीज्यते सिद्धचारणैः तदनंतसदो नाम सर्वलोकेषु वि

ब्रपु॰ ११९

कृतं पद्ममालावलंबाभिर्मालाभिरुपशोभितं तस्यासहस्रशिखरेऊमुदसांतरेणच पंचाशद्योजनना
यामं त्रिंशद्योजनविस्तरं इभुदेषाचशिखरं नानाविहगसेवितं महागंधैर्महास्वादैर्गजदेहनिभैः शुभैः
मधुस्रवैर्महावृक्षैरुपेतं तत्समंततः तत्राश्रमं महापुण्यं देवर्षिगणसेवितं शुक्रस्यप्रथितं तत्र भास्वरं
पुण्यकर्मणः शंकूटस्य शैलस्य वृषभस्यांतरेणच पटूषकस्थलीरम्यासेनकायतयोजना विस्ता
प्रमाणैर्काकोलैर्महास्वादैः सुगंधिभिः फलैः प्रक्लिन्नपतैर्भूमीपुरुषैर्वृंतविच्छन्नैः तां स्थलीमुपजीवं
ति किंनरोरगाः साधवः पटूषकरसोन्मत्ताभानाघासत्रचारणाः कपिंजलस्य शैलस्य नागशैलस्य
चांतरे द्वियोजनशतायामा विस्तीर्णा शतयोजना स्थलीमनोरमा साहिनानोवनविभूषिता नानापु
ष्पफलोपेता नाकिंनरोरगसेविता द्राक्षावनानि रम्याणि तथा नागवनानि च असीतितिलकानां च कदलीनां
वनानि च खर्जूरवनषंडानि नीलाशोकवनानि च दाडिमानां च खाहूनामक्षोटजंबवनानि च केदरीणां च
खाहूनांवनखंडानि सर्वशः खाहसीतांबुपूर्णानि नदीभिः शोभितानि च तथा पुष्पकशैलस्य महामे
घस्य चांतरे द्विशतियोजनविस्तीर्णा सा तो भूमिः शतमायता समायाणितलप्रख्या कठिना पांडुराघना ह

राम॰ ११९

तृगुल्मलतागुल्मैस्तृणौघ्यापि विवर्जिता वर्जिता विविधैः सत्वैर्नित्यमस्मिरा म्रया साकाननस्थलीनामहा
कृणा रोमहर्षणा महासरांसि चतस्याम स्याबृहत्सालपूवच महावनानि सर्वाणि कानानि मानि सर्वशः सर
सां च वनानां च स्थलीनां च प्रजायते: क्षुद्राणां सरसां चैव संख्यानं त्र न विद्यते दशद्वादशसाहस्राविंशति
शच्च योजना स्थल्याद्रोणपञ्च विख्याता सरांसि च वनानि च केचित् क्रंतिमहाघोरा शतामापर्वतोक्त्वयः स
र्यांशुजा सैरस्स्थानितिसीना दुरासदा तथा स्थानलतस्थानि सरांसि हि द्विजसत्तमाः शैलकुस्तरस्थाना
सहस्राणि शतानि च॥ ॥ इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासे॥ सूत उवाच भूतः परं प्रवक्ष्या
मि यस्मिन् यस्मिन् शिलाचये ये संति विष्णो देवानां विविधा गृहगोत्तमः तत्र यो सौ महाशैलः शीतांता
नेववित्सरः नैकधातुशतैश्चित्रैर्नेकरत्नाकराकरः तिनवैः पुष्पमालैर्वनैकसत्वगुणालयः महाहेमणि
चित्राभिर्हेमवंशाप्रलेकृतः तितवैर्गयदोङ्गीतप्रवालैर्हेमचित्रकैः तटेः कुसुमसंकीर्णमनभ्रमरनादितैः
लतानां त्रिभिर्मद्भिश्चित्रैर्हृद्गुलार्चितैः सानुभीरत्नचित्रैश्च प्रस्थानैश्च विभूषितैः विमलस्वादुपानीय
नैकप्रस्रवणायुतः निकुंजैः कुसुमाकीर्णैरनेकैश्च विभूषितः यक्षगंधर्वचरितैरनेकैः कंदरोदरैः शोभि

नक्षस्त्वासेव्येश्चित्रगात्रनसंकटे: नानासत्वगणाकीर्णेसुपानीयसुखाश्रये: नानापुष्पलतोयेतैपा
दपै: समलंकृत: तस्मिन्गुहाछायाकीर्णेसुक्षेत्रेकोदरकंदरे क्रीडावनंमहेंद्रस्यसर्वकालसुखोर्जितं तत्र
तद्देवराजस्यपारिजातवनंमहत् प्रकाशंत्रिषुलोकेषुगीयतेपुण्यतिनिश्चयात् तरुणादित्यसंकाशै
र्महागंधैर्मनोहरै: पुष्पैर्भाविनगाश्रेष्ठसदीप्तः सर्वदेशत: समग्रवान्नुत्थानेगंधमनिलोववौ पारिजा
तकपुष्पाणांमहेंद्रवननिर्गता: वैडूर्यनालै: कमलै: सौवर्णैरुपशोभिते: सर्वगंधवलोयैनेमत्तषट्प
दनादितै: व्याकोशैर्विकचैश्चापिशतपत्रैर्मनोहरै: सपंकजैर्महापत्रै: व्याप्यस्तत्रविभूषिता: वि
रेजुरंतरवुस्था: सौवर्णमणिभूषिता: विरेजुरंतरंवुस्था: सौवर्णमणिभूषिता: परिस्पंदद्भ्याणातिर्य
मीनस्य्यासरसस्तथा: कूर्मेश्चानेकसंस्थानैर्हंसमद्गुपरिप्लुतै: चंचूर्यमाणसलिलेर्भातिचित्रेसमंतत:
नानावर्णैश्चपुष्पाढ्यैर्नानारत्नतनूरुहै: स्ववर्णपुष्पैश्चानेकैर्मणिकुंडैर्द्विजातिभि: वल्गुस्वरै: समं
ततै: संपतद्भि: समंतत: शुशुभेतद्धनेरम्यसरश्चाद्गस्यधीमत: मत्तभ्रमरसनादैर्विहगानांचकूजि
तै: नित्यमानंदितवनंतस्याक्रीडावनंमहत् सुवर्णपार्श्वेचनगोमणिभक्तिपुरस्कृते: मणिशृंगके

णापत्रैपतद्भिश्च समंततः प्रासादमुख्यैश्च चित्रांगैर्नानारत्नविभूषितैः नानावर्णप्रकारैश्च सत्वैरन्यैः स
माकुलं स्रवंति पुष्पवर्षं च तत्र वातेरिता द्रुमाः पारिजातकपुष्पाणां मंदमारुतकंपिताः छायनास
ननिर्यूहैः स्वालीर्णैः रत्नभूषितैः विहारभूमयस्तत्र द्विजाश्च क्रवनेषु भाः नच शीतो न चाप्युष्णो रविस्तत्र
सुमः सदा नित्यमुन्मादजननो मधुमाधवसंभवः भाति चाप्यनलस्तत्र नानापुष्पाधिवासितः नित्य
संगसुखोद्रादिश्रमक्लमविनाशनः तस्मिन्विडवने शुभ्रे देवदानवपन्नगाः यक्षराक्षसगुह्याश्च गंध
र्वाश्चामितौजसः विद्याधराश्च सिद्धाश्च किंनराश्च मुदायुताः तथाप्सरोगणाश्चैव नित्यं क्रीडापराय
णाः तस्य पर्वतराजस्य पूर्वपार्श्वे महाचितेः क्रूस्वंजशैलराजानेकनत्तरकंदरे तस्य धातुविचित्रेषु
कूटेषु बहुविस्तराः श्रेष्ठा पुर्यो हिरण्याक्षदानवानां महात्मनां वज्रके पर्वते चापि अनेकशिखरोद्रेः
उदीर्णा राक्षसावासा नरनारीसमाकुला नीलका नामते घोरा राक्षसा कामरूपिणः तत्र ते निवसंति
महाबलपराक्रमाः महानीलेपि शैलेंद्रे पुराणि दश पंच च हयाननानां विख्याताः किंनराणां महा
त्मनां देवसेनो महाबाहुर्लामज्ञावयस्तपा तत्र किंनरराजानो दश पंच च गर्विताः स्वबलसिद्धयाश्चा

प्रायेणानानावर्णैस्समाकुलैः विलप्रवेशैर्नगरैः शैलेंद्रः सोभ्यलंकृतः अतिदारुणदृष्टिविषाः सुग्निकोपाद्
रासदा महोरगशतानां तत्रस्ववर्णैस्ववशवर्तिनः हेतनागोपि महाशैले दैत्यावासा सरसा(?) हर्म्यप्रासादक
लिलाश्चाप्यप्राकारतोरणाः वेणुमते महाशैले विद्याधरपुरत्रयं त्रिंशद्योजनविस्तीर्णं चाशद्योज
नायतं उलूको रोमशश्चैव महानेत्रश्च वीर्यवान् विद्याधरवरास्तत्र शक्रतुल्यपराक्रमाः वैकंके शै
लशिखरे हैमनः कंदरनिर्भरे महोच्चश्रृंगे रुचिरे रत्नधातुविचित्रिते तत्रास्ते गारुडिर्नित्यं उरगारिः दुरास
दः महावायुजवश्चैव हंसग्रीवो नाम वीर्यवान् महाप्रमाणैर्विक्रान्तैर्महाबलपराक्रमैः सशैलो ह्यावृतः
सर्वपक्षिभिः पन्नगारिभिः करंजनिरतो नित्यं साक्षाद्भूतपतिः प्रभुः वृषभांको महादेवः शंकरो योगि
नां प्रभुः नानावेषधरैर्भूतैः प्रमथैश्च दुरासदैः करंजेमा वृषसर्वैः सर्वकौशासमंततः बहुधारेव सुमता
वल्लतामनिर्तोजसां अष्टावायतनान्याहु पूजितानि महात्मनां रत्नधारे गिरिवरे सपूर्वीणां महात्मना
समाश्रमाणि पुण्यानि सिद्धवाससुतानि च महाप्रजायतेस्यानेहमश्रृंगोनगोत्तमे चतुर्वक्रस्य देवस्य
सर्वभूतनमस्कृते राजशैलेश्रुगावतिनाना भूतगणाहताः रुद्राप्रमुदितानित्यं सर्वभूतनमस्कृता स

मेघधातुविचित्रांगे मेघेन्द्रे शैलसन्निभे नैकोदरदरीवप्रनिकुंजैश्चोपशोभिते आदित्यानां वसूनां च रुद्रा
णां चामितौजसां तत्रायतनविन्यासा रम्याश्चैवाश्विनोरपि स्थानानि सिद्धैर्देवानां स्थापितानि जगतोमे
अश्वीत्यामरपुण्यानि महाप्राकारतोरणा सिद्धायतनानामगंधर्वपुरमालिनः येषामधिपतिर्देवो
राजराजः कपिंजलः अनलेपावसावासाः पंचकूटे पिदानवाः ऊर्जितादेवरिपवो महाबलपराक्रमाः
शतशृंगे पुरशतं यक्षाणाममितौजसां ताम्राभे काद्रवेयस्य तक्षकस्य पुत्रोत्तमं विशाखे पर्वतश्रेष्ठे
कवप्रवप्रदरीशुभे गुहानिरतवासस्य गुहस्यायतनं महत् श्वेतोदरे महाशैले महाभवनमंडिते
सुवर्णचूडपुत्रस्य नाभस्य महात्मनः पिशाचके गिरिवरे हर्म्यप्रासादमंडिते यक्षगंधर्वचरितं कुबे
रभवनं महत् हरिकूटे हरिर्देवः सर्वभूतनमस्कृतः प्रभावान्तस्य शैलास्तो महानाभः सकाशते कु
मुदे किन्नरावासा अंजने च महोरगाः कृष्णे गंधर्वनगरा महाभवनमालिनः सहस्रशिखरे शैले दै
त्यानामुग्रकर्मणां पुराणि सप्तदीप्तानां सहस्रे हेममालिनां मुकुटे पन्नगावासा अनेकाः पर्वतोत्तमाः
पुष्पके वै मुनिगणा नित्यमेव मुदा युताः वैवस्वतस्य सोमस्य वायोर्नागाधिपस्य च सप्तवे पर्वतवरे च।

त्वार्य्यायतनानि च गंधर्वैः किंनरैर्यक्षैर्नागैर्विद्याधरोत्तमैः सिद्धैरिति तेषु स्थानेषु नित्यमिज्यः प्रपूज्यते ॥
इति श्रीमहापुराणे वायुप्रोक्ते ॥ सूत उवाच ॥ मर्यादापर्वतेष्वभ्रे देवकूटे निबोधत विस्तीर्णे शिखरे
तस्य कूटे गिरिवरस्य ह समंताद्योजनशतं महाभवनमंडितं जन्महेतुः सुपर्णस्य वैनतेयस्य धीमतः नै
कैर्मेरुपक्षिणागोपारुडे धार्मविक्रमैः संप्रसविवीर्यः तपन्ने दमनेकरत्नादिभिः पक्षिराजस्य भवनं प्रथ
मं तन्महात्मनः महावायुप्रवेगस्य शाल्मलिद्वीपवासिनः तस्यैव चापरं मध्ये इस्व कूटेषु च महाद्रिषु
दक्षिणेषु विचित्रेषु रत्नस्वपि तु शोभितः संध्याभ्रुलासमहिताः रुक्मप्राकारतोरणा महाभवनमा
लाभिः शोभिता वै वनिर्मिताः त्रिशयोजनविस्तीर्णाश्चत्वारिंशतमायताः सतगंधर्वनागानां नरनारी
समाकुलाः स्वाग्रेषा नाम गंधर्वा महाबलपराक्रमाः क्रव्वेराजु चरादीमालेयांतेभवतोत्तमाः त
स्यैवोत्तरकूटेषु भवनस्य महागिरेः हर्म्यप्रासादहर्म्यं च उद्यानवनशोभितो पुरमासीद्विचित्रैः सुर्सकटा
प्राकारतोरणं वादित्रघातनिर्घोषि तानिंदितवनांतरं पुष्पसहस्रमभिज्ञाणां त्रिशयोजनमंडलं नगा
रेसिद्धकेयानां महर्षीणां देवविद्विषां सिद्धदेवर्षिचरितं देवकूटे निबोधत द्वितीये द्विजशार्दूलाः म

यो दायर्वते शुभे महाभवनमालाभिर्नानावर्णाभिरावृतं सुवर्णमणिचित्राभिरनेकाभिरलंकृतं
विशालरथ्यं दुर्धर्षं नित्यं प्रमुदितं शिवं नरनारीगणाकीर्णं शुभप्राकारतोरणं षष्टियोजनविस्तीर्णं
शतयोजनमायतं नगरं कालिकेयानां महासुराणां दुरासदं वेदकूटतटे रम्ये संनिविष्टं सुदुर्जयं महा
प्रचयसंकाशं सहनामं नाम विश्रुतं तस्यैव दक्षिणे कूटे विंशयोजनविस्तरं द्विषष्टियोजनायामं हेम
प्राकारतोरणं कूष्माण्डवलयानां च वासः कामरूपिणां डोळुचान्तां प्रमुदितं याक्षसानां महाउ
पे मध्यमे महाकूटे देवकूटस्य वै गिरेः सुवर्णमणिपाषाणैश्शिवे सुरतरैः शुभैः शातकौम्भनसरसा
कैरनेकाशेषसमाकुला स्निग्धपर्णं महामूलमनेकस्कंधवाहनं रम्यं सुविरं क्रायं दशयोजनमंडलं
तत्र भूतवटं नाम नानाभूतगणालयं महादेवस्य प्रथितं त्रिनेत्रस्य महात्मनः दीप्तमायतनं तत्र स
र्वलोकेषु विश्रुतं वराहमजसंहृष्टैः प्राहूरभावनैः ग्रधोलूकमुखैश्चैव मेषोष्ट्राजमहामुखैः कदवै
र्विकटैः स्थूलैर्लंबकेशतनूरुहैः नानावर्णाकृतिधरैर्नानासंस्थानसंस्थितैः दीप्तैरनेकैरुग्रास्यै
र्भूतैरुग्रपराक्रमैः अभ्यूह्य मभवनित्यं महापारिषदैरलं तत्र भूतपतेर्भूतानित्यं पूजां प्रयुंजते

ब्रपु०
१२३

जह्नुरैः शंखपटलैर्गिरीडिंडिमगोमुखैः रणितालसितोद्गीतैर्नित्यं वल्गितगर्जितैः विस्फूर्जितस्तैस्तत्र
पूजाप्रयुक्ता गणेश्वराः प्रीताः पुरारिप्रमथास्तत्र क्रीडापराः सदा सिद्धदेवर्षिगंधर्वयक्षनागोरगैः पूजितः
स्थानेतस्मिन्महादेवः साक्षाल्लोकशिवः शिवः इति श्रीमहापुराणे वायुप्रोक्ते अनुषंगपादे ॥
सूत उवाच ॥ अविभक्तो चारुशिखरे यत्रतेजः स्ववर्चसं कैलासं देवभक्तानामालयं सकुनात्मनो
तस्य कूटतटे रम्ये मध्यमे कुंदसंनिभे योजनानां शतान्यायामे पदाशाश्चनयायते सर्वस्मिन्मणिचित्रा
भिरनेकाभिरनंतरं महाभवनमालाभिर्भूषितं नैकधिस्तरं धनाध्यक्षस्य देवस्य कुबेरस्य महा
त्मनः नगरं तद्वनाढ्यमृद्धियुक्तं सदा शुभं तस्य मध्ये सभा रम्या नानाकारकमंडिता विपुला
नामविख्याता विपुलस्तंभतोरणा तत्रैतत्पुष्पकं नाम नानारत्नविभूषितं वाहनं यक्षराजस्य।
कुबेरस्य महात्मनः तत्रैकपिंगलो देवो महादेवसखः स्वयं वसति स्म सयक्षेंद्रः सर्वभूतनमस्कृतः
तत्राप्सरोगणायैश्च गंधर्वैः सिद्धचारणैः वसति स्म महात्मासौ कुबेरस्त्वमतंगमः तत्र पद्मा महापद्मा

एम०
१२३

श्चातथा सकरकच्छपौ कुमुदः शंखनीलश्च नंदनोतिधिसत्तमः ग्रहावेतत्त्यादिव्याधनेश्वा

स्य महात्मनः महानिधानास्तिष्ठंति सभायां रत्नसंचयाः तथैवाग्निप्रियादीनां देवानां साप्सरोगणैः तेषां कै

लाशशृंगावासो यत्र यक्षेश्वरप्रभुः तत्र मंदाकिनी नाम रम्या विपुलोदका स्वर्णमणिसोपाना नाना पु

ष्पोत्कटोत्कटाः जांबूनदमयैः पद्मैः गंधस्पर्शगुणान्वितैः नीलवैडूर्यपत्रैश्च गंधोपेतैर्महोत्पलैः तथा

कुमुदषंडैश्च महापद्मैरलंकृता यक्षगंधर्वनारीभिरप्सरोभिश्च शोभिताः देवदानवगंधर्वैर्यक्षराक्षस

पन्नगैः उपस्पृष्टजला रम्या वापी मंदाकिनी शुभा तथा कनकनंदा च नंदा च सरितां वरा एतैरेव गुणैर्युक्ता

नद्यो देवर्षिसेविता तस्यैव शैलराजस्य पूर्वे कूटे परिश्रुताः सहस्रयोजनायामामात्रिंशद्योजनविस्तराः

दश गंधर्वनगरा सम्यक्प्राकारयायुता महाभवनमालाभिरानकाभिर्विभूषिताः एवाऊपरिकेशायाश्चित्रा

सेनजरादय दशगंधर्वराजानो दीप्तवज्रपराक्रमाः तस्यैव दक्षिणे कूटे उमहेशप्रभे नानाधातुशतैश्चित्रे

सिद्धदेवर्षिसेविता अशीतियोजनायाम चत्वारिंशच्च विस्तरे एकैकं यक्षभवने महाभवनमालिने म

हायक्षत्ययाण्यत्रत्रिंशद्यानि मेघृएउम्हदाय परमर्ध्याच संयुक्तानि समंततः महामालिहनेत्राया

तया मणिवरादय उदीर्णयक्षराजानः तत्र त्रिंशान्महौजसः इत्यनेकाधिना यक्षावासश्चिग्रिसमचेतमः

येषामधिपतिर्देवः श्रीमान्वैश्रवणः प्रभुः तस्यैव दक्षिणे पार्श्वे हिमवत्यचलोत्तमे निकुंजनिर्झरगुहानेकसानु
मत्तटोत्तरे अस्तिवाद्धत्सिवैयावत्सर्वं यक्षायतनं जले किंनराणां पुरश्चानेनिविष्टैर्वैयाचित्रकचित नेकमृगाकुला
यस्य शैलराजस्य कुंजेषु नरनारीप्रमुदितै रुद्रपुष्पजनकुले द्रुमसुग्रीवसैन्या यामगदत्तपुरःसराः
तत्र राजश्चाननेवाहमानां बलशालिनां विवाहोयत्र रुद्रस्य महादेव्योमया सह तत्र पलासवतीचैव यत्र देवी
हात्मानोमुनयःशंसितव्रताः स्तुवंतेचमहादेवं यत्रयत्रयथाविधि ऋग्यजुःसामवेदेषुतथा
गीताद्युदात्तादिभिः ॐकारनमस्कारैर्युंजंतिसदाशिवं प्रवृत्तेज्योतिषाचक्रेमध्यमानेदिवा
करे देवतानियतात्मानमस्यंतिसंततं कथं ऋषभियमवृत्ताःप्राणशेषव्यवस्थिताः न
मसेनीलकंठायरक्षवाचसदागतिः तत्कृत्वाभाविनात्मानोमुनयःशंसितव्रताः वालिखि
ल्यानिविख्याताःयेनेगसहचारिणः अष्टाशीतिसहस्राणिमुनीनांमुहुरेनसाम तसमस्तकं

ब्र॰पु॰
१२८

तिवैवायुंवायुपर्णांबुभोजना: ऋषयऊचु:॥ नीलकंठेतियत्प्रोक्तंत्वयापवनसत्तम: पवनस्तुं
पवित्राणांपावनानांपावकनावर यद्दृयंश्रोतुमिच्छामस्तत्प्रसादात्प्रभंजना नीलतांयेनकंठस्य
कारणेनांविकापते श्रोतुमिच्छामहेसस्यक्तनवक्त्राद्विशेषत: यावद्वाच:प्रवर्त्तन्तेसर्वेस्तो
श्चाल्पेषरिता: वर्णसंस्थानगतेवायोर्हानिविधि:संप्रकीर्त्यते ज्ञानेपूर्वमपोन्साहास्त्वत्तोवायो:
प्रवर्त्तेते त्वयितिष्ठतमानेतुशेषावर्णप्रवृत्तय: तत्रवाचोनिवर्त्तन्तेदेहवंधाश्चदुर्लभा: त
त्रापितेस्तिसद्भाव:सर्वगस्त्वंसदानिल: नान्य:सर्वगतोदेवत्वदृतेस्तिसमीरण पूर्वैवजीव
लोकस्तेप्रत्यक्ष:सर्वतोनिल: चसैवाचस्पतिर्देवमनानायकमीश्वर सूचितंतुदेशस्पृकिं
कृताहृपविक्रिया श्रुत्वावाक्यंततस्तेषाम्ऋषीणांभावितात्मनां प्रत्युवाचमहातेजावायुर्लो
केनमस्कृत:॥वायुरुवाच॥ पुराकृतयुगेविप्रोवेदनिश्चयतत्पर: असिष्ठोनामधर्मात्मामान
सोवैप्रजापति: पप्रच्छकार्त्तिकेयंवैमयूरवरवाहनं उमामन:प्रहर्षणं वालकंठपुरस्कृपिणं
महिषासुरनारीणांनयनांजनतस्कर महासेनंमहात्मानंमेघस्तनितनिस्वनं क्रौंचजीवि

राम॰
१२८

तहर्मारंपार्वतीहृदिनंदनं वसिष्ठः एकेनभक्त्याकार्त्तिकेयंमहाबलं वसिष्ठउवाच॥ नमस्तेहरनंदा
यउमागर्भनमोस्तुते नमस्तेअग्निरूपायगंगागर्भनमोस्तुते नमस्तेशरगर्भायनमस्तेकृत्तिकासु
त नमोद्वादशनेत्रायषण्मुखायनमोस्तुते नमस्तेशक्तिहस्तायदिव्यघंटायताकिने एवंस्तुत्वा॥
महासेनेयएकशिखिवाहने परे तडश्वनेवयंप्रभुभत्स्वप्रोजनप्रभं तत्किमर्थंसमुत्पन्नंकंठेउंदे
दुसप्रभे एतदामायभक्त्यायदांतायवृहिस्प्रकृते कथांमंगलसंयुक्तांपवित्रांपापनाशिनी म
त्प्रियार्थंमहाभागवक्तुमर्हस्यशेषतः श्रुत्वावाक्यंततस्तस्यवसिष्ठस्यमहात्मनः प्रत्युवाचम
हातेजास्तारारिर्वलसूदनः शृणुष्ववदतांश्रेष्ठकथ्यमानंवचोमम उमोत्संगनिषण्णेनमयापूर्वं
यथाश्रुतं पार्वत्यासहसंवादःशिवस्यचमहात्मनः तदहंकीर्त्तयिष्यामित्वत्प्रियार्थंमहामुने कै
लाशशिखरेरम्येनानाधातुविचित्रिते तरुणादित्यसंकाशेसमचामीकरप्रभे वज्रस्फटिकसो
पानेचित्रपट्टशिलातले जंबूनदमयेदिव्येनानाधातुविचित्रिते नानाद्रुमलताकीर्णेचक्र
वाकोपशोभिते प्रीतवोद्गीतवकुलेधारासंपातनादिते तत्रक्रौंचमयूराणांनादेरुधुतकंदरे

व्यप्सरोगणसंकीर्णे किंनरैश्चोपशोभिते जीवंजीवंजीवकजातीनां विहंगैश्चोपकूजिते कोकिलाभ्रमरम
धुरैश्चारमासविते सारमेयनिनादाढ्ये मेघस्तनितस्वने विनायकभयोद्विग्नकुंजरे गुह्यकंदरे वीणा
वादित्रनिर्घोषैश्चेंद्रियमनोरमे: हिंदोलांदोलितसंप्राप्ते वनितासंघसेविते ध्वजैर्लंबितदोलानां गुहा।
नांनिनदाकुले सुरवमर्दलवादित्रैर्वल्गितास्फारितैस्तथा क्रीडारवविचाराणां निर्घोषैः पूर्णकंदरे
हासैः मंत्रासमनन्तैर्विकरालमुखैस्तथा दृढगंधैर्विचित्रैश्च प्रक्रीडितगणेश्वरैः वज्रस्फटिकसोपाने
श्चित्रपट्टशिलातले व्याघ्रसिंहमुखैश्चान्यैर्गजवाजिमुखैस्तथा विडालवदनैश्चान्यैः क्रोष्टुकाकारमूर्ति
भिः ह्रस्वदीर्घकृशैः स्थूलैर्लंबोदरमहोदरैः ह्रस्वजंघैश्च लंबोष्ठैस्तालजंघैस्तथापरैः गोकर्णैः खरकर्णैश्च
महाकर्णैः खरकर्णकैः बहुपादैर्महापादैरेकपादैरपादकैः एवंविधैर्महायोगीभूतैर्भूतपतिर्वृतः विश्व
कर्मकृतामणिरत्नभूषिते शिलातले हेममये मनोरमे सुखोपविष्टं मदनांगनाशनं प्रोवाच वाक्यं गि
रिराजपुत्री श्रीदेव्युवाच भगवन्भूतभव्येश गोवृषांकितशासन: त्वत्कृतं महादेव प्राजने बुद
संनिभं नात्यल्पं नातिसूक्ष्मं नीलांजनचयोपमम् किमिदं देवदीप्यं ते कंठे कामांगनाशन कारे

तः कारणं किं वा कंठे नीलच मीश्वरं एतत्सर्वं यथान्यायं ब्रूहि कौतूहलं हि मे श्रुत्वा वाक्यं ततस्तस्या
पार्वत्याः पार्वतीप्रियः कथां मंगलसंयुक्तां कथयामास शंकरं कथयामास शंकरः मथ्यमाने मते
पूर्वं क्षीरोदे दिरदानवैः अग्रे समुत्थितं तस्मिन्विषं कालानलप्रभं तं दृष्ट्वा सुरसंघाश्च दैत्याश्चैव वा
नने विषस्य वदनात्सर्वे गता लोकसंप्रत्यांतिकं दृष्ट्वा सुरगणान्भीतान् ब्रह्मोवाच महाद्युतिः किमर्थं
वै महाभागा भीता उद्विग्नचेतसः मया सृष्टं ग्रामणीमैश्वर्यं भवतां संप्रकल्पितं केनव्यावर्त्तितेश्वर्यां युयं
वै सुरसत्तमाः त्रैलोक्यस्येश्वराः यूयं सर्वे विगतज्वराः प्रजासर्गेन सोस्मीह यास्तां ग्रामे निवर्त्ता
येत् विमानगामिनः सर्वे सर्वे स्वके देशगामिनः अध्यात्मे वाधिभूते च अधिदैवे च नित्यशः प्रजाकर्मवि
पाकेन शंकाप्येवं प्रवर्त्तितं तत्किमर्थं भयोद्विग्नाः मृगासिंहाहीना इव किं दुःखं केन संतापं ऊनीवा
भयमागतं एतत्सर्वं यथान्यायं शीघ्रमाख्यातुमर्हथ श्रुत्वा वाक्यं ततस्तस्य ब्रह्मणो वै महात्मनः
ऊचुस्ते ऋषिभिः सार्द्धं सुरदैत्येंद्रदानवाः सुरासुरैर्मथ्यमाने ययेभक्षि महात्मभिः भुजंगभोगसंका
शं नीलजीमूतसंनिभं प्रादुर्भूतं विषं घोरं संवर्त्ताग्निसमप्रभम् कालमृत्युरिवोद्भूतं युगांतान्ता

दिव्यवर्चसं त्रैलोक्योत्सादसूर्याभं विस्फुरन्तं समन्ततः विषोल्बणोत्तिष्ठमानेन कालानलसमत्विषः
निर्दग्धो रक्तगौरांगः कृतं कृष्णो जनार्दनः दृष्ट्वा तं रक्तगौरांगं कृतं कृष्णं जनार्दनं भीताः सर्वे वयं देवा
स्त्वामेव शरणं गताः स्वराणामस्वराणां च प्रभुस्त्वा वाक्यं पितामहः प्रभुर्वाच महातेजा लोकानां हि
तकाम्यया शृण्वंतु देवताः सर्वे ऋषयश्च तपोधनाः यत्तदग्रे समुत्पन्नं मथ्यमाने महोदधौ विषं
कालानलप्रख्यं कालकूटेति विश्रुतं येन प्रादुर्भूतमात्रेण कृतं कृष्णो जनार्दनः तस्य विस्तारवेगाच्चापि
सर्वे वासवपुंगवाः नशक्नुवंति वेगं सोढुं वेगमथ्यात् शंकरात् इत्युक्त्वा पद्मगर्भाभः पद्मयोनिरयो
निजः ततस्तोत्रं समारेभे ब्रह्मा लोकपितामहः नमस्तुभ्यं पिनाकाख्य नमस्तेनेकचक्षुषे नमः
पिनाकहस्ताय वज्रहस्ताय वै नमः नमस्त्रैलोक्यनाथाय भूतानां पतये नमः नमः सुरारिहंत्राय
सोमसूर्याग्निसंनिभे ब्रह्मणे चैव रुद्राय विष्णवे चैव ते नमः सांख्याय चैव योगाय भूतग्रामाय वै
नमः मन्मथांगविनाशाय कालकालाय वै नमः रुद्राय वसुरेताय देवदेवाय रंहसे कपर्दिने क
वीराय शंकराय हराय च कपालिने विरूपाय शिवाय वरदाय च नमः कमलहस्ताय दिग्वासा

शिखिखंडिने लोकत्रयविधात्रे च इंद्राय वरुणाय च उग्राय चैव चोग्राय विप्रायानेकचक्षुषे रजसे
चैव सत्वाय नमस्ते व्यक्तयोनये नित्याय चैव नित्याय नित्यानित्याय चैव नमः व्यक्ताय चैवाव्यक्ताय व्य।
क्ताव्यक्ताय वै नमः चिंत्याय चैवाचिंत्याय चिंत्याचिंत्याय वै नमः भक्तानामार्त्तिनाशनाय प्रियनाराय
णाय च उमाप्रियाय शर्वाय नंदिवक्त्राकिताय च पक्षमासार्द्धमासाय नमः संवत्सराय च बहुरूपा
य मुंडाय दंडिने यविरूपिने नमः कपालहस्ताय दिग्वासाय शिखंडिने ध्वजिने रथिने चैव यतिने
ब्रह्मचारिणे ऋग्यजुःसामवेदाय पुरुषायेश्वराय च इत्येवमादिचरितैस्तुभ्यं देव नमोस्तु ते रु
द्र उवाच एवं स्तुत्वा ततो देवाः प्रणिपत्य पुरस्सराः ज्ञात्वा तु भक्तिं मम देवदेव गांगाजलास्फालि
तमूर्द्धमुक्तकेशः शृण्वन्नोति योगान्निशायाद्वितीयो नित्यस्तु तो व्यक्तमुपैति चंद्रः एवं भगवता।
पूर्वं ब्रह्मणा लोककर्तृणा स्तुतोहं विविधैः स्तोत्रैर्वेदवेदांगसंभवैः ततः प्रीतोस्म्यहं तस्मै ब्रह्मणे
महात्मने ततोहं प्रहस्य वाचा पितामहमथाब्रुवं भगवन्नु तत्र भव्येश लोकनाथ जगत्पते किंका
र्यं ते मया ब्रह्मन्कर्त्तव्यं वद सुव्रत श्रुत्वा वाक्यं ततो ब्रह्मा प्रत्युवाचांबुजेक्षणः भूतभव्यभव।

त्रंपु॰
१२२

त्रापश्चपतिंकारुणेश्वरः सुरासुरैर्मथ्यमानेयधोधावंभुजेहरणः भगवन्मेघसंकाशंनीलजीमू
तसंनिभ प्रादुर्भूतंविषंघोरंसंवर्ताग्निसमप्रभं कालमृत्युमिवोद्भूतंयुगांतादित्यवर्चसं त्रैलोक्यं।
त्सादृश्यंभवविस्फारतसमंततः अग्निसमुत्थिततस्मिन्विषकालानलप्रभं तद्दृष्ट्वावयंसर्वेभी
ताःसंभ्रांतचेतसः त्वंपिबस्वमहादेवलोकानांहितकाम्यया भवानग्र्यश्चतेलोकेभवान्नवव
रप्रभुः त्वामृतेन्योमहादेववेगंसोढुंनविद्यते नास्तिकश्चित्सुमान्शक्तस्त्रिषुलोकेषुविद्यते।
एवंतस्यवचःश्रुत्वाब्रह्मणःपरमेष्ठिनः बाढमित्येवतद्वाक्यंप्रतिगृह्यवरानने ततोहंयानुमा।
स्त्वोविषमंतकसंनिभं पिवतोमेमहाघोरंविषंसुरभयंकरं कंठःसमभवत्तूर्णंकृष्णोमेवरवर्णि
नि तंदृष्ट्वोत्पलपत्राभंकंठंसक्तमिवोरगं तक्षकंनागराजानंलेलिहानमिवस्थितं अथोवाचम
हातेजाब्रह्मालोकपितामहः सोभसेत्वंमहादेवकंठेनानेनसुव्रत ततस्तस्यवचःश्रुत्वामया।
गिरिवरात्मजे पशुपतिर्देवसंघानांदैत्यानांचवरानने महागंधर्वभूतानांपिशाचोरगराक्षसाः
उक्तुःअजलयोभूतासत्तमातंगगामिनि अहोबलवीर्यपराक्रमेलमहावसंयोगवलेनवेव अ

राम॰
१२२

होबलंवीर्यपराक्रमस्ते महाबलंयोगबलंतवैव अहो प्रभुत्वंतवदेवदेव गंगाजलासालितमुक्तके
शः त्वमेवविसृष्टमुराननत्वंत्वमेवमन्मथवरदत्वमेव त्वमेवभूतंभवितात्वमेवत्वमेवचादिनि
धनंत्वमेव त्वमेवसर्वस्यचराचरस्यलोकस्यकर्त्ताप्रलयेचगोप्ता इतीदमुक्त्वावचनंससोडाप्रगृह्य
सोमंप्रतिवंद्यमूर्ध्ना गताविमानैरमितिगृहस्ववौमहात्मनोमेरुसुपेत्यसर्वे इत्येतत्परमंपुण्यंगुह्य
पुण्यंपरंमहत् नीलकंठविषयःप्रोक्तंविस्तलोकेषुविश्रुतं सर्वपापहरंनवाप्रोक्तंकथापापप्रणाश
नी यस्तुधारयेन्नित्यमेनांब्रह्मभवांकथां तस्याहंसंप्रवक्ष्यामिफलंवैविपुलंमहत् विघ्नस्यवरा
रोहेस्थावरंजंगमंतथा गात्रप्राप्नुयस्तेषांप्रणिहितंतत्रप्रतिहन्यते शमयत्यनुभवोरंदुखंनं।
चापकर्षति स्त्रीषुवल्लभतांयातिसभायांपार्थिवस्यच विवादेजयमाप्नोतियुद्धेशूरत्वमेवच ग
छेतद्देममध्यानंगृहेभ्योनित्यसंपदः शरीरभेदेप्रवक्ष्यामिगतिस्तस्यवरानने हरिश्मश्रुर्नील
कंठःशशांकांकितमूर्द्धजः त्र्यक्षःत्रिशूलपाणिश्चवृषयानपिनाकधृक् नंदीतुस्यबलश्रीमान्
नंदीतुल्यपराक्रम विचरत्यखिलान्सर्वान्सर्वलोकान्ममाज्ञया नहन्यतेगतिस्तस्यत्रानिलस्य

बृ॰पु॰
१२८

यथांबरे मम तुल्यबलो भूत्वा तिष्ठत्याहूतसंप्लवं मम भक्त्या वरारोहे ये च शृण्वंति मानवाः तेषां
गतिं प्रवक्ष्यामि इह लोके परत्र च ब्राह्मणो वेदमाप्नोति क्षत्रियो जयते महीं वैश्यस्तु लभते ला
भं शूद्रः सुखमवाप्नुयात् व्याधितो मुच्यते रोगात् बद्धो मुच्येत बंधनात् गुर्विणी लभते पुत्रं इह
लोके परत्र च गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलं तत्फलं भवति श्रुत्वा विमोदिव्यामिमां

श्लोकं

कथां पादं वा यदि वाप्यर्द्धं श्लोकार्द्धमेव वा यस्तु धारयते नित्यं रुद्रलोकं स गच्छति इतिहासमे
नं गिरिराजपुत्री मयास्तुतेष्टेन तवांबुजेक्षणे निवेदितं पुण्यफलादियुक्तं मया च गीतं च तु ग
नेनेन कथामिमां पुण्यफलादियुक्तां निवेद्य देव्या शशिबद्धमूर्द्धजः वृषस्य पृष्ठेन सहो
मया प्रभुर्जगाम किञ्चिद्धि गुह्याद्गुह्यप्रियः क्रांतं मया पापहरं महापदं निवेद्य तेभ्यः प्रददौ प्र
भंजनः श्रुपीत्य सर्वं त्वपि त्वं सलक्षणं जगाम मध्यादिम्यधंयं प्रभंजना ः॥ इति श्रीमहापुराणे
वायुप्रोक्ते नीलकंठस्तवः समाप्तः ॥ ऋषय उवाच ॥ गणकर्मप्रभावेश्च कोधिको वदतां वर श्रो
तुमिच्छामहे सम्यगैश्वर्यं गुणविस्तरं ॥ सूत उवाच ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं

राम॰
१२८

महादेवस्य च माहात्म्यं विष्णोश्च महात्मनः पूर्वं त्रैलोक्यविजये विष्णुना समुदाहृतं बलिं ब्रह्म
महातेजास्त्रैलोक्याधिपतिः पुरा प्रनष्टेषु च देवेषु प्रनष्टे च शचीपतौ अथाजग्मुः प्रभुं द्रष्टुं
सर्वे देवाः सवासवाः यत्रास्ते विश्वरूपाश्चाक्षीरोदस्य समीपतः सिद्धा ब्रह्मर्षयो यक्षा गंधर्वा
अप्सरसां गणाः नागा देवर्षयश्चैव नद्यः सर्वे च पर्वताः अभिगम्य महात्मानं स्तुवंति पुरुषं हरिं
त्वं धाता त्वं च कर्त्ता च त्वं लोकान् सृजसि प्रभो त्वत्प्रसादाच्च कल्याणं प्राप्तं त्रैलोक्यमव्ययं असुरा
अजिताः सर्वे बलिर्बद्धश्च वै त्वया एवमुक्तः सुरैर्विष्णुः सिद्धैश्च परमर्षिभिः प्रत्युवाच ततो देव
सर्वांस्तान् पुरुषोत्तमः श्रूयतामभिधास्यामि कारणं हि सुरसत्तमाः यः स्रष्टा सर्वभूतानां कालः काल
नरः प्रभुः येनाहं ब्रह्मणा सार्द्धं सृष्टा लोकाश्च मायया तस्यैव च प्रसादेन आदौ सिद्धत्वमागतं पु
रा तमसि व्याकृते त्रैलोक्ये ग्रसिते मया उदरे स्थेषु भूतेषु लोकेहं शायितस्तदा सहस्रशीर्षो भूत्वा
च सहस्राक्षः सहस्रपात् शंखचक्रगदापाणिः शायितो विमलेंभसि एतस्मिन्नंतरे दूरात् पश्या
मि ह्यमितप्रभं शतसूर्यप्रतीकाशं ज्वलंतमिव तेजसा चतुर्वक्त्रं महायोगं पुरुषं कांचनप्रभं।

भं कस्माज्जिनधरं देवं कमंडलुविभूषितं निमेषांतरमात्रेण आगतो सौ पुरुषोत्तमः ततो मामब्रवी
द्ब्रह्मा सर्वलोकनमस्कृतः कुतस्त्वं को नो वा किं चेह तिष्ठसे वद मे विभो अहं कर्तास्मि लोकानां स्वयंभूर्वि
श्वतोमुखः एवमुक्तस्तदास्मै न ब्रह्मणाहमुवाच तं अहं कर्तावलोकानां संहर्ता च पुनः पुनः
एवं संभाषमाणाभ्यां परस्परजयैषिणां उत्तरां दिशि मास्थाय ज्वाला दृष्टावधिस्थिता ज्वालां
ततस्तां मालोक्य विस्मितौ च तदानघ तेन साचैव तेनाथ सर्वज्योतिः कृतं जलं वर्द्धमानां ततस्तावद्भ्रा
वत्सान्तपरमाद्भुते अभिदुद्रावतां ज्वालां ब्रह्मा चाहं च सत्वरौ दिवं जलं व्यविष्टभ्य तिष्ठते ज्वालम

ज्वालस्य

डलं तस्यैव मध्ये तु पश्यावविपुलप्रभं प्रादेशमात्रमव्यक्तं लिंगं परमदीप्तिवत् न च तत्कांचनं
मध्येन शैलं न विराजितं अनिर्देश्यमचिंत्यं च लक्ष्यालक्ष्यं पुनः पुनः महातिसमहाघोरं व
र्द्धमानं भृशं तदा ज्वालामालाप्यत दिव्यं सर्वभूतभयंकरं अस्य लिंगस्य योन्तं वेगाद्गच्छेन मंत्र।
कारणं घोररूपिणः नत्वर्थं भिंदंतिमिव रोदसी ततो मामब्रवीद्ब्रह्मा अधो गच्छ त्वतंद्रितः अ
तमस्य विज्ञानीमो लिंगस्य तु महात्मनः अहमूर्द्ध्वं गमिष्यामि यावदंतो स्य दृश्यते तदा तो

समयंकृत्वागतामूर्द्धमधस्त्वह ततोवर्षसहस्रंतत्वहंपुनरधोगतः नचपश्यामितस्यांतंभीतस्त्वा
हंनसंशयः तथाब्रह्माचश्रांतस्त्वन्चांतंनस्यपश्यति समागमोममासाईतत्रैवचमहाभसि ततो
विस्मयमापन्नौभीतौतस्यमहात्मनः मायया मोहितौतेननष्टौसाग्नेत्वयवस्थितौ ततोध्यानगतेन
त्रह्यस्वरंसर्वतोमुखं प्रभवंनिधनंचैवलोकानांप्रभुमव्ययं ब्रह्मांजलिपुटोभूत्वातस्मैसर्वाय
शूलिने महाभैरवनादायभीमरूपायदंष्ट्रिणे अव्यक्तायमहातायनमस्कारंप्रकुर्महे नमोस्तु
तेलोकसुरेशदेवनमोस्तुतेभूतपतेमहात्म नमोस्तुतेशाश्वतसिद्धयोनेनमोस्तुतेसर्वजगत्प्र
तिष्ठ परमेष्ठीपरंब्रह्मअक्षरंपरमंपदं ज्येष्ठस्त्वंवामदेवश्चरुद्रःस्कंदःशिवःप्रभुः त्वंयज्ञस्त्वं
वषट्कारस्त्वमोंकारपरंपदं स्वाहाकारोनमस्कारःसंस्कारःसर्वकर्मणां स्वधाकारश्चजप्यश्च
व्रतानिनियमास्तथा वेदालोकाश्चदेवाश्चभगवानेवसर्वशः आकाशस्यचशब्दस्त्वंभूतानां
प्रभवाव्ययं भूमेर्गंधोरसश्चापांतेजोरूपंमहेश्वर वायोस्पर्शश्चदेवेशवपुश्चंद्रमसस्तथा बुधो
ज्ञानंचदेवेशप्रकृतोबीजमेवच त्वंकर्त्तासर्वभूतानांकालोमृत्युर्यमोन्तकः त्वंधारयसिलोकांस्त्रि

वृ॰पु॰
१८०

त्वमेव स्रजसि प्रभो पूर्वेण वदनेन त्वं त्वमिंद्रत्वं प्रकाससे दक्षिणेन च वक्त्रेण लोकान्संक्षिपसि प्रभो
पश्चिमेन तु वक्त्रेण वरुणत्वं करोषि वै उत्तरेण तु वक्त्रेण सौम्यस्त्वं च व्यवस्थितः एकधा बहुधा देव लो
कानां प्रभवाव्ययः आदित्या वसवो रुद्रा मरुतश्च सहाश्विनः साध्यविद्याधरा नागाश्चारणाश्च तपो
धनः वालखिल्या महात्मानस्तपसिद्धाश्च सुव्रताः त्वत्तः प्रसूता देवेश ये चान्ये नियतव्रताः उ
माशीना शिनीवाली कुहूर्गायत्रिरेव च लक्ष्मीकीर्तिधृतिर्मेधा लज्जा क्षांतिर्वपुः स्वधा तुष्टिः पुष्टि
क्रिया चैव या देवी सरस्वती त्वत्तः प्रसूता देवेश संध्या रात्रिस्तथैव च सूर्यायुतानामयुतप्रभाव।
न नमोस्तु ते चंद्रसहस्रगोचर नमोस्तु ते पर्वतरूपधारिणे नमोस्तु ते त्रिपथलोकधारिणे नमोस्तु
ते वज्रपिनाकपाणये नमोस्तु ते षट्त्रिंशद्रूपधारिणे नमोस्तु ते विवसन चर्मचारिणे नमोस्तु ते सायक
चक्रपाणये नमोस्तु ते भस्मविभूषितांग नमोस्तु ते कामशरीरनाशन नमोस्तु ते देवहिरण्यवास
से नमोस्तु ते देवहिरण्यबाहवे नमोस्तु ते देवहिरण्यरूप नमोस्तु ते देवहिरण्यनाभ नमोस्तु ते देव
हिरण्यगर्भ नमोस्तु ते देवहिरण्यचीर नमोस्तु ते देवहिरण्यदायिने नमोस्तु ते देवहिरण्यमालि

नेनमोस्तुतेदेवहिरण्यबाहवे नमोस्तुतेदेवहिरण्यवर्म्मणे नमोस्तुतेसिंखनादनादनमोस्तुतेभैर
ववेगवेग नमोस्तुतेशंकरकंठकंठन नमोस्तुतेदिव्यसहस्रबाहा नमोस्तुतेवर्त्तवृवादनप्रिय एवं
संस्तूयमानस्तु एवं संस्तूयमानस्तु व्यक्तोभूत्वा महामतिः भातिदेवो महायोगी सूर्यकोटीसमप्रभः
अभिभाष्य महादेवो महादेवो महेश्वरः वक्त्रकोटीसहस्रेण ग्रसमानइवांबरं एकग्रीवः हमनत्त
रोनानाभूषणभूषितः नानारत्नविचित्रांगो नानामाल्यानुलेपनः पिनाकपाणिर्भगवा यहि
शांशनित्रिशूलधृक् दंडः कृष्णाजिनधारकपालीशूलरूपधृक् दंडकृष्णाजिनधरः कपालीवो
रूपधृक् व्यालयज्ञोपवीतीचसुराणामभयंकरः दुंदुभिस्वननिर्घोषपर्जन्यनिनदोयमः
मुक्तोहासस्तदातेननभसर्वमपूरयत् तेनशब्देनमहतावयंभीतामहात्मनः तदोवाचमहायो
गीप्रीतोहंवोकुरुध्व स्मरसत्तमौ पश्यतांचमहामायांभयंसर्वंप्रमुच्यतां युवांप्रसूतौगात्रेषुमम
पूर्वंसनातनौ अयंमद्दक्षिणोबाहुर्ब्रह्मालोकपितामहः वामोबाहुश्चमेविष्णुर्नित्यंयुद्धेष्ववर्जि
तः प्रीतोहंयुवयोःसम्यग्वरंदद्मियचेप्सिततनः प्रहृष्टमनसौप्रणतौपादयोःपुनः ऊचतुश्च

महात्मानौ पुनरेव तदा नद्यौ यदि प्रीतिः समुत्पन्ना यदि देयो वरश्च नौ भक्तिर्भवतु नौ नित्यं त्वयि देव म-
हेश्वर भगवानुवाच ॥ एवमस्तु महाभागौ सृजतां विविधाः प्रजाः एवमुक्त्वा स भगवांस्तत्रैवान्तरधीय-
त एवमेष मया प्रोक्तः प्रभावस्तस्य योगिनः तेन सिद्धमिदं सर्वं तन्मात्रावयं त्विह एतद्धि रूपं सत्त्वा-
नमव्यक्तं शिवसंज्ञितं अचिंत्यं तं महद्भूतं च पश्यंति ज्ञानचक्षुषः तस्मै देवाधिपत्याय नमस्का-
रं प्रयुंजत येन सूक्ष्ममचिंत्यं च पश्यंति ज्ञानचक्षुषः महादेव नमस्तेस्तु महेश्वर नमोस्तु ते सु-
रासुरवरश्रेष्ठ मनोहर नमोस्तु ते सूत उ एतच्छ्रुत्वा गणाः सर्वे सुराः सर्वे निवेशनं नमस्का-
रं प्रयुंजाना शंकराय महात्मने इमं स्तवं पठेद्यस्तु ईश्वरस्य महात्मनः कामांश्च लभते सर्वान्सर्वा-
येभ्यस्तु विमुच्यते सुरासुरवरश्रेष्ठ एतत्सर्वं सदा तेन विष्णुना प्रभविष्णुना महादेवप्रभावे-
न उक्तं ब्रह्म सनातनं एतद्वः सर्वमाख्यातं मया माहेश्वरं बलं इति श्रीमहापुराणे लिंगोद्भवस्त-
वः समाप्तः ॥ शांशपायन उवाच ॥ कथं त्वमावास्यां मासि मासि दिवं नृप ऐडः पुरूरवा ॥
सूत कथं चातर्पयत्पितॄन् सूत उवाच तस्याहं प्रवक्ष्यामि प्रभावं शांशपायन ऐडस्यादि-

त्वसंयोगं सोमस्य च महात्मनः अमांसारमयस्यंते दोपक्षयोः शुक्लकृष्णयोः ह्रासवृद्धी पितृमतः पित
स्याद्विनिर्णयाः सोमाच्चैवामृतप्राप्तिं पितृणां तर्पणं तथा कव्याग्निष्वात्तसोमानां पितॄणां चैव द
र्शनं यथा पुरूरवाश्चैडस्तर्पयामास वै पितॄन् एतत्सर्वं प्रवक्ष्यामि पर्वाणि च यथाक्रमं यदा तु चं
द्रसूर्यौ तौ नक्षत्रेण समागतौ अमावास्यां निवसत एकरात्रौ कमंडले संगच्छति तदा द्रष्टुं दिवा
करं निशाकरौ अमावास्याममावास्यां मातामहपितामहौ अभिवाद्य तदा तत्र कालावेक्षः प्रती।
क्षति प्रसिद्धमानात्सोमाच्च पितृपर्यंतं त्वरिश्रवात् ऐडः पुरूरवा विद्वान्मासि मासि ततस्तु वे उपा
स्ते पितृमंतं ते समो मं सदिवास्थिनः द्विलवं कुहुमात्रं तं ते उभे तु विचार्य सः शिनीवालीप्रमाणेन शि
नीवालीमुपासकः मकुमात्रां कलां चैव यो पास्ते च कुहूं पुनः सतदा भानुमत्येव काकलापेक्षिप्रप
श्यति सुधामृतं कुतः सोमात्प्रस्रवन्मासतृप्तये दशभिः पंचभिश्चैव स्वधामृतपरिस्रवैः कृष्णपक्षभु
दासीत्वाद्दशमानं तपांशुभिः सद्यः प्रक्षरता तेन सौम्येन मधुना च सः निर्वापेण पदत्तेन पितॄणां वि
धिनान्वयः सुधामृतेन राजेंद्रस्तर्पयामास वै पितॄन् सौम्यास्त्वर्हिषदः काव्याः नग्निष्वात्तास्तथैव च।

श्री

ब्र॰पु॰
१८२

ऋतुमग्निस्तु यः प्रोक्तः स तु संवत्सरो मतः जज्ञिरे ऋतवस्तस्मादृतुभ्यश्चार्त्तवास्तथा आर्त्तवा अर्द्धमा
साख्यास्ते पितरो ह्यब्दसूनवः ऋतुः पितामहा मासा ऋतवश्चैवाब्दसूनवः प्रपितामहास्तु वै देवाः से
मजाः सोमपास्तथा आज्यपास्तु स्मृता काव्या स्वयनापितृजोत्तयः काव्याश्चर्विषदश्चैव अग्निष्वा
त्तास्तु ते त्रिधा गृहस्थायेन यज्वानो ऋतुष्वर्तुषदो ध्रुवं गृहस्थाश्चाप्ययज्वान अग्निष्वात्तास्तथार्त्तवाः
अष्टकायतयः काव्याः पंचाब्दांस्तान्निबोधत एषां संवत्सरो ह्यग्निः सूर्यस्य परिवत्सरः सोम इद्वत्स
रः प्रोक्तो वायुश्चैवानुवत्सरः रुद्रस्तु वत्सरस्तेषां पंचाब्दायेयुगात्मकाः तेषाश्चैवोष्मपाश्चैव दि
वाकीर्त्याश्च ते स्मृताः एते पिबंत्यमावास्यां मासि मासि सुधां दिवि तांस्तेन तर्पयामास यावदा।
सीत्कुरुषाः यस्मात्प्रस्रवते सोमात्मासि मासि निबोधत तस्मात्सुधामृतं तद्वै पितॄणां सोमपा।
यिनां एवं तदमृतं सौम्यं सुधा च मधु चैव ह कृष्णपक्षे यदा वेदो कस्ताः पंचदश क्रमात् पिबंत्यंबु
मयीं देवास्त्रयस्त्रिंशाच्छकं द्विजाः पित्वाई मासं गच्छंति चतुर्दश्यां सुधामृतं इत्येवं पीयमानस्तु
दैवतैस्तु निशाकरः समागच्छदमावास्यां भागे पंचदशे स्थिते सुषुम्णाप्यायितंचैव अमावा॥

राम॰
१८२

स्वीय यथाक्रमं पिबंति द्विकलं कालं पितरस्ते सुधामृतं ततः पीतक्षये सोमे सोमे सावेकरश्मिना।
आप्याययत्सुषुम्णेन पितॄणां सोमपायिनां निःशेषायां कलायां तु सोममाप्याययत्पुनः सुषुम्णा
प्यायमानस्य भागं भागमहर्क्रमात् कलाः क्षीयंति ताः कृष्णा शुक्लाश्चाप्याययंति तं एवं सूर्यस्य
वीर्येण चंद्रश्चाप्यायिता तनुः दृश्यते पूर्णमासाद्वै शुक्लः संपूर्णमंडलः संसिद्धिरेव सोमस्य प
क्षयोः शुक्लकृष्णयोः इत्येवं पितमान्सोमः स्मृतश्चंद्रमास्तक्रमात् क्रांतः पंचदशो साहं सुधामृत
परिस्रवैः अतः सर्वाणि वक्ष्यामि पर्वाणि संधयस्तथा ग्रंथिमंति यथा सर्वाणीक्षुवेणोर्भवंत्यत
तथार्द्धमासपर्वाणि ततीयाप्रभतीनितु अग्न्याधानक्रियायस्मात् क्रियंते पर्वसंधिषु सायाह्नस
नमत्यासौ होलवौकाल उच्यते लवौ द्वावेव राकाया कालो ज्ञेयोपराह्निकः प्रतिपत्कृष्णपक्षस्य
काले नीते पराह्निकः सायाह्नप्रतिपद्येवसकालः पौर्णमासिकः व्यतीयाते स्थिते सूर्ये लेखोर्द्ध
तु युगांतरास्थितेचैवलेखोर्द्ध शशिनक्रमात् पौर्णमासे व्यतीतेनयदीक्षेते चपरस्पर यस्मिन्काले ससो
म्यांतेतौ व्यतीपातप्रवत्तु कालं सूर्यस्य निर्दिश्य दृष्ट्वा संख्यांतु सर्पति सवैपुण्यक्रियाकालः काला
त्ययोविधीयते सर्वदाः पौर्णपद्धेतुरात्रिसंधिषु पौर्णिमा ततापरस्यतरक्तो पौर्णमास्यानिशा
करः

समागच्छमावास्या भागोपंचदशोस्थितः सुषुम्णाप्यायितं चैवत्र मावास्यायथाक्रमं पिबंतिद्विकलंकालं
पितरस्तेसुधामृतं ततः पीतक्षयेसोमेसोमेस्यावेकरश्मिना आप्याययत्सुषुम्णेन पितृणांसोमपायिनां नि:
शेषायांकलायांतु सोममाप्याययत्पुनः सुषुम्णाप्यायमानस्य भागंभागमहःक्रमात् कलाःक्षीयंति
ताःकृष्णाःशुक्लाआप्याययंतितं पर्वसूर्यस्यवीर्येणचंद्रस्याप्यायितातनुः दृश्यतेपूर्णमासेवैशु
क्लःसंपूर्णमंडलः संसिद्धिरेवसोमस्यपक्षयोःकृष्णशुक्लयोः इत्येषपितृमान्सोमःस्मृतश्चंद्रमसःक्र
मात् क्रान्तःपंचदशमाईसुधामृतपरिस्रवैः अतःसर्वाणिवक्ष्यामिपर्वणांसंधयस्तथा ग्रंथिमं
तियथासर्वाणि इक्षुवेणुपर्वाभेस्मृत तथार्द्धमासपर्वाणितिथ्याप्रभृतीनि वै अग्न्याधानक्रियायाः
स्मात्क्रियतेपर्वसंधिषु सायाह्नेप्रतिपत्साद्धौ लवौकालउच्यते लवौद्वावेवराकायांकालोज्ञेयो
परान्हिकः प्रतिपत्कृष्णपक्षस्यकालेतीते परान्हिकः सायाह्ने प्रतिपच्चैवसकालः पौर्णमासिकः
व्यतीपातेस्थितेसूर्येलेखोर्द्ध्वंतुयुगांतरे युगांतरोदितेचैवलेखोर्द्ध्वंशशिनःक्रमात् पौर्णमासे
व्यतीतियदीक्षेतेवपरस्परं यस्मिन्कालेसमौस्यातांव्यतीपातस्ततुतत् कालंसूर्यस्यनिर्दिश्यदृष्ट्वा
संख्यातुसर्पति सवैपर्वक्रियाकालः कालान्तस्यापिविधीयते पूर्णेंदोःपौर्णमासस्यरात्रिसंधिषुपौ

र्णिमा ततोपरस्यतेरह्नः पौर्णिमास्यां निशाकरः यदा हृतेव्यतीपाते दिवापूर्णोपरस्परं चंद्रार्कौव
पराह्ने तु पूर्णिमानौ तु पौर्णिमा यस्माद्वामनुपश्यंतिपितरोदैवतैः सह तस्मादनुमती नाम।
पौर्णिमा प्रथमा स्मृता अन्यूर्यथाजतेयस्या पौर्णिमास्यां निशाकरः रंजनाच्चैव चंद्रस्य राकेति
कवयो विदुः अमावसेतामस्येत्यु यदा चंद्रदिवाकरौ एकां पंचदशी रात्रिमामावास्या ततस्तु सा
विकिनां नाम मावास्यां पश्यतस्तेसमागतौ अन्योन्यं चंद्रसूर्यौ तौ यदा तद्दर्श उच्यते द्वौ द्वौ मास
ममावास्यां सकलाः पर्वसंधिषु द्वादशरक्तुमात्रस्तु एवं कालो संगमस्त्वैव मध्याह्न इति ख्यातप्रवि
प्रतिपच्छुक्लपक्षस्य चंद्रमा सूर्यमंडलात् निर्मुच्यमानयोर्मध्ये तयोर्मंडलयोस्तु वै स तदा ह्याहु
तेकालोदर्शस्य च वषट्क्रियाः एतदृतु मुखं ज्ञेयममावास्यास्य पर्वणः दिवापर्वात्वमावास्या क्षीण
शेबहुलेन वै तस्माद्दिवा समायामावास्यां गृह्यते सोमदिवाकरौ गृह्यते वै दिवोऽयस्मादमावास्यादिवहो
यः कलानामपि वेत्तासौ हृदद्विमस्याजलात्मकः तिथीनां नामधेयानि ताहृद्विसंज्ञेतानि वदथी
येता मध्यान्योन्यं सूर्यचंद्रमसावुभौ निष्क्रामतस्य पतने वक्रमशः सूर्यमंडलात् द्विलवेन स्यादहो

ब्र॰पु॰
१८४

तत्रं भास्वरं स्य स्थानेश्वाशि सनदा याकृतो कालो दर्शस्य च वषट्क्रिया कुहूतेकोकिलो नो क्तो यः कालस्तु
समाप्यते तत्कालसंज्ञिता यस्मादमावास्या कुहूस्मृता इत्येष पर्वसंधीनां कालो वै द्विलवः स्मृतः पर्व
णः पर्वकालस्तु तस्मो वै वषट्क्रिया चंद्रसूर्यावतीपाते उभेतेपौर्णिमे स्मृते प्रतिपत्प्रतिपन्नंतः
पर्वकालो द्विमात्रकः कालः कुहूसिनीवाल्योः समुद्रो द्विलवः स्मृतः अर्काग्निमंडले सोमे पर्व
कालः कलाश्रयः एवं स शुक्लपक्षो वै रजन्याः पर्वसंधिषु संपूर्णमंडलः श्रीमाश्चंद्रमा उपरज्यते य
स्मादाप्याययते सोमः पंचदश्यां तु पौर्णिमा दशभिः पंचभिश्चैव कलाभिर्दिवसक्रमात् यस्मात्कालाः
पंचदश्यो सोमेनाप्यायितुं षोडशी तस्मात्सोमस्य भवति पंचदश्यां महाक्षयः इत्येते पितरो देवा सो
मपाः सोमवर्द्धनाः आर्तवान्नृतवो यस्मात्तेदेवान्भावयंति च अतः पितॄन्प्रवक्ष्यामि मासश्राद्धभुजस्तु
घे चंद्रसूर्यावतीपाते उभे ते पौर्णिमे स्मृते तेषां गतिं च सत्वं च गतिं श्राद्धस्य चैव हि नमृतानां गतिः
शक्या विज्ञातुं पुनरागतिः तपसा हि प्रसिद्धेन किं पुनर्मांसचक्षुषा अत्र देवपितृन्देवा पितरो लौ
किकास्मृताः देवाः सौम्याश्च यज्वानो ह्ययोनिजाः देवास्ते पितरः सर्वे देवास्तान्भावयंत्युत मनु
यज्वानो

सि
राम:
१८४

त्येव

ष्याः पितरश्चैव तेभ्यो न्ये लौकिकाः स्मृताः पिता पितामहश्चैव प्रपितामह यज्वानो ये तु सोमेन सोम
वंतस्तु ते स्मृताः कर्मस्वेते प्रयुक्तानि तवंत्या देहसंभवान् अग्निष्वात्ताः स्मृतास्तेषां ते मितो यज्यया
जिनः तेषां ते धर्मसाधर्म्यात् स्मृता मायोज्य के द्विजैः ये चाप्याश्रमधर्मेण प्रस्थाने युक्तवस्थिताः
अंते च नावसीदंती श्रद्धायुक्तेन कर्मणा ब्रह्मचर्येण तपसा यज्ञेन प्रजया चैव श्रद्धया विद्यया चैव
प्रदानेन च सप्तधा कर्मस्वेतेषु ये युक्ता भवंत्या देहपातनात् देवैस्ते पितृभिः सार्द्धं सूक्ष्मैः सोमा
याप्ययैः स्वर्गता दिवि मोदंते पितृमंतमुपासते प्रजावतां प्रसंसे तेव स्मृता मुख्यात्क्रियावतां तेषां
निर्वापि दत्वा नंतश्चौली नेष्ववांधवैः मासश्राद्धभुजः तृप्तिं लभंते सोमलौकिकाः एवमेमनुष्या
ष्याः पितरो मासिश्राद्धभुजस्तु ते तेभ्यो परे तु ये त्वन्ये संकीर्णा कर्मयोनिषु भ्रष्टाश्चाश्रमधर्मेभ्यः
स्वधास्वाहाविवर्जिताः भिन्नदेहा दुरात्मानो प्रेतभूता यमक्षये स्वकर्माण्येव शोचंति यातनास्था
नमागताः दीर्घायुषो तिशुष्काश्च श्मश्रुलाश्च विवाससः क्षुत्पिपासापरीताश्च विद्रवंति ततस्त
तः सरित्सरस्तडागानि वापीश्चैव जलेप्सवः परान्नानि च लीप्संते कल्पमानाः ॥ ॥ ॥

१८५

मेष सर्गः सनातनः वैस्वायंभुवस्य सर्वस्य कथितस्त्वेकदेशिकं नशक्यं परिसंख्यातुं श्रद्धेयं भूतिमिच्छता स्वा
यंभुवस्य हीत्येष सर्गः ज्ञातो मया स्तु वै विस्तरेणानुपूर्व्याच भूयः किं वर्त्तयाम्यहं ॥ इत्यादि पुराणेपि तत्व
सर्गो नाम ॥ ऋषय ऊचु चतुर्युगानि यान्यासन् पूर्वे स्वायंभुवेंतरे तेषां निसर्गतत्वं च श्रोतुमिच्छाम वि
स्तरात् सूत उवाच पृथिव्यादि प्रसंगेन यन्मया प्रागुदाहृतं तेषां चतुर्युगं ह्येष तद्वक्ष्यामि निबोधत
संख्ययेह प्रसंख्याय विस्तराच्चैव सर्वशः युगं च युगभेदं च युगसंध्यांशकं चैव युगसंधानमेव च ष
ट्प्रकारा युगाख्यैषा तां प्रवक्ष्यामि तत्वतः लौकिकेन प्रमाणेन निष्पद्याब्दं तु मानुषं तेनाब्देन प्र
संख्याय वक्ष्यामीह चतुर्युगं निमेषकालतुल्यानि विद्यालघ्वक्षरं च यत् काष्ठा निमेषा दश पंच
चैव त्रिंशत्काष्ठा गणयेत्कलां तु त्रिंशत्कलाश्चापि भवेन्मुहूर्त्तस्तैस्त्रिंशता रात्र्यहनी समेते अ
होरात्रे विभजते सूर्यो मानुषदैविके तत्राहः कर्मचेष्टायां रात्रिः स्वप्नाय कल्पते पित्र्ये रात्र्यहनी मास
प्रविभागस्तयोः पुनः कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्वरी त्रिंशच्च मानुषा मासाः पित्र्यो मासस्तु सं
स्मृतः शतानि त्रीणि मासानां षष्ट्या चाप्यधिकानि वै पित्र्यः संवत्सरो ह्येषः मानुषेण विभाव्यते

मानुषेणैव मानेन वर्षाणां यच्छतं भवेत् पितॄणां पितृवर्षाणि संख्यातानीह तानि वै पितृः लौकिके
नैव मानेन अब्दो यो मानुषः स्मृतः एतद्दिव्यमहोरात्रं शास्त्रेस्मिन्निश्चयो गतः दिव्ये रात्र्यहनी वर्षं प्र
विभागस्तयोः पुनः अहस्तत्रोदगयनं रात्रिस्याद्दक्षिणायनं ये ते रात्र्यहनी दिव्ये प्रसंख्याते तयोः
पुनः त्रिंशद्यानि वर्षाणि दिव्यो मासस्तु स स्मृतः मानुषं च शतं विद्धि दिव्यमासास्त्रयस्तु ते दश
चैव तथाहानि दिव्यो ह्येष विधिः स्मृतः त्रीणि वर्षशतान्येव षष्टिं वर्षाणि यानि वै दिव्यः संवत्सरो ह्ये
य मानुषेण प्रकीर्तितः त्रीणि वर्षसहस्राणि मानुषेण प्रमाणतः त्रिंशद्यानि तु वर्षाणि मतः सप्त
र्षिवत्सरः नवयानि सहस्राणि वर्षाणां मानुषाणि तु अन्यानि नवतिश्चैव ध्रौवः संवत्सरः स्मृतः ष
ट्त्रिंशत्तु सहस्राणि वर्षाणां मानुषाणि तु वर्षाणां च शतं ज्ञेयं दिव्यो ह्येष विधिः स्मृतः त्रीण्येव नि
युतान्याहुर्वर्षाणां मानुषाणि तु षष्टिश्चैव सहस्राणि संख्यातानि तु संख्यया दिव्यं वर्षसहस्रं तु प्रा
हुः संख्याः विदो जनाः इत्येवमृषिभिर्गीतं दिव्यया संख्यया त्वितं दिव्येनैव प्रमाणेन युगसंख्याप्र
कल्पनं चत्वारि भारते वर्षे युगानि कवयो विदुः पूर्वं कृतयुगं नाम ततस्त्रेता विधीयते द्वापरश्च

कलिं चैव युगान्येतान्यकल्पयत् चत्वार्याहुः सहस्राणि संख्यैव परिकीर्त्तिते तस्य तावति संध्याऽस
संध्यांशश्च तथाविधः इतरेषु ससंध्येषु संध्यांशेषु च सर्वशः एकापायेन वर्त्तते सहस्राणि शता
नि च त्रीणि त्रीणि सहस्राणि संख्यैव परिकीर्त्तिते वस्यास्तु त्रिशती संध्या संध्यांशश्च तथाविधः
द्वापरे द्वे सहस्रे तु युगानामाहुर्मनीषिणः तस्यापि द्विशती संध्या शः संध्यया समः कलिं वर्ष
सहस्रं तु युगानामाहुर्मनीषिणः तस्यापि शतिका संध्या संध्यांशः संध्यया समः एषा द्वादशसाह
स्री युगाख्या परिकीर्त्तिता कृतं त्रेता द्वापरं च कलिं चैव चतुष्टयं अत्र संवत्सरा दृष्टा मानुषेण
प्रमाणतः कृतस्य तावद्वक्ष्यामि वर्षाणां तत्प्रमाणतः सहस्राणि शतान्यत्र चतुर्दश तु संख्य
या षष्टिश्चैव सहस्राणि कलिकालयुगास्तत् संख्यातस्त्वेककालस्तु कालो विहविशेषतः ए
तच्चतुर्युगकालो विना संध्यांशकैः स्मृतः नियुतान्येक षड्विंशन्निरंशानि तानि वै चत्वारिंशत्त्री
णि चैव नियुतानि व संख्यया विंशतिश्च सहस्राणि स संध्यांशश्चतुर्युगे एवं चतुर्युगाख्यानां सा
धिका ह्येकसप्ततिः कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते मन्वन्तरस्य संख्यानं वर्षाग्रेण निबोधत।

त्रिंशत्कोट्यस्तु वर्षाणां मानुषेण प्रमाणतः सप्तषष्टिस्तथान्यानि नियुतान्याधिकानि तु विंशतिश्च सह
स्राणि कालोयं संधिकं विना मन्वंतरस्य संख्यैषा संख्याविद्भिः द्विजैः स्मृता मन्वंतरस्य कालोयं युगैः सा
र्द्धं प्रकीर्त्तितः चतुःसहस्रयुक्तं वै प्रोक्तं तत्तत्कृतं युगं त्रेतामप्यत्र वक्ष्यामि द्वापरं कलिमेव च युगप
त्समवेतौ द्वौ द्विधा वक्तुं न शक्यते क्रमागतं मयाप्येतत्तुभ्यं नोक्तं युगद्वयं ऋषिवंशप्रसंगेन व्याकुलत्वा।
त्तथैव च तत्र त्रेतायुगस्यादौ मनुः सप्तर्षयश्च ते श्रौतं स्मार्त्तं च धर्मं च ब्रह्मणा च प्रचोदितं दाराग्निहो
त्रसंयोगमृग्यजुः सामसंहितं इत्यादिलक्षणं श्रौतं धर्मं सप्तर्षयोब्रुवन् परंपरागतं धर्मं स्मार्त्तं चा।
चारलक्षणं वर्णाश्रमाचारयुतं मनुः स्वायंभुवोब्रवीत् सत्येन ब्रह्मचर्येण श्रुतेन तपसा च वै तेषां।
सुतप्ततपसामार्षेयेण क्रमेण तु सप्तर्षीणां मनोश्चैव आद्ये त्रेतायुगे तदा अबुद्धिपूर्वकं तेषामक्रियापूर्व
मेव च अभिव्यक्तास्तु ते मंत्रास्तारकाद्यैर्निदर्शनैः आदिकल्पे तु देवानां प्रादुर्भूतास्तु ते स्वयं प्रण
ाशे त्वथ सिद्धीनामन्यासां च प्रवर्त्तनं आम्नातं मंत्रजातानि तेषु ये कल्पेषु सहस्रशः ते मंत्रा वै पुनस्तेषां प्रति
भासं समुत्थिताः ऋचो यजूंषि सामानि मंत्राश्चाथर्वणानि च सप्तर्षिभिस्तु ते प्रोक्ताः स्मार्त्तं धर्मं

तुर्वर्गो त्रेतादौ संहिता वेदाः केवलं धर्मयोगतः संरोधादायुषश्चैव व्यस्यंते द्वापरेषु वै ऋषयस्तप
सा देवान्कलौ चद्वापरेषु वै अनादिनिधने नित्या पूर्वं सृष्टा स्वयंभुवा सधर्माः संप्रजाः संगायध्या
धर्मयुगे युगे विक्रीयन्ते समानार्थाः वेदवेदाय थायुगं आरंभयज्ञात्क्षत्रस्य हविर्यज्ञा विशापतेः परि
वारयज्ञाः शूद्रास्तु जपयज्ञाः द्विजोत्तमाः तदा प्रमुदिता वर्णास्त्रेतायां धर्मपालिताः क्रियावंतः
प्रजावंतः समृद्धाः सुखिनस्तथा ब्राह्मणाननुवर्त्तंते क्षत्रियाः क्षत्रियान्विशः वैश्यानानुवर्त्तिनः शू
द्राः परस्परमनुव्रताः शुभाः प्रवृत्तयस्तेषां धर्मा वर्णाश्रमास्तथा संकल्पिते न मनसा वाचोक्तेन स्व
कर्मणा त्रेतायुगे त्वविकलः कर्मारंभः प्रसिध्यति आयुर्मेधा बलं रूपमारोग्यं धर्मशीलता सर्वसाधा
रणा ह्येते त्रेतायां वै भवंत्युत वर्णाश्रमव्यवस्थानं तेषां ब्रह्मा तथाकरोत् पुनः प्रजास्तु ता मोहात्
धर्मानावलेपयेत् पारस्परविरोधेन मनुं ताः पुनरन्वयुः मनुस्वायंभुवो हृष्ट्वा यथातथ्यं प्रजाप
तिः ध्यात्वा तु शतरूपायां पुत्रावुत्पादयत् प्रियव्रतोत्तानपादौ प्रथमौ तौ महीपती ततः प्र
भृति राजानः उत्पन्ना दंडधारिणः प्रजानां रंजनाच्चैव तज्ज्ञा न स्वभवनपाः प्रकृत्तपापालयेत्तन

ब्र॰पु॰
१८८

शाकामनुजाभुवि धर्मसंस्थापनार्थाय तेभ्यः शास्त्रान तपोमयाः वर्णानां प्रविभागश्च त्रेतायां संप्रकीर्त्ति
तः संहिताश्च ततो मंत्रा ऋषिभिर्ब्राह्मणैस्तु ते यज्ञः प्रवर्त्तितश्चैव तदा ह्येवं तु देवतैः यामैः शुक्रैर्जयै
श्चैव सर्वसंभारसंभृतैः साद्धं विश्वभुजाश्चैव देवेंद्रेण महौजसः स्वायंभुवेंतरे देवैर्यज्ञास्ते प्रावर्त्तिताः
सत्यं जपस्तपो दानं त्रेतायां धर्म उच्यते क्रियाधर्मस्य ह्रसते सत्यधर्मः प्रवर्त्तते प्रजायंते ततः शूराश्चा
युष्मंतो महाबलाः न्यस्तदंडा महाभागा यज्वानो ब्रह्मवादिनः पद्मपत्रायताक्षाश्च पृथुरस्काः सु
संहिताः सिंहांतका महासत्वा मत्तमातंगगामिनः महाधनुर्धराश्चैव त्रेतायां चक्रवर्त्तिनः
सर्वलक्षणसंपन्ना न्यग्रोधपरिमंडलाः चक्रं रथो मणिर्भार्या निधिरश्वो गजस्तथा न्यग्रोधौ
तौ स्मृतौ बाहू व्यामो न्यग्रोध उच्यते व्यामेनैवोच्छ्रयो यस्य सम ऊर्द्ध्वं तु देहिनः समुच्छ्रयपरीणाहो
ज्ञेयो न्यग्रोधमंडलः सप्तानि मायरत्नानि सर्वेषां चक्रवर्त्तिनां चक्रं रथो मणिः खड्गं धनुरत्नं राम॰
च पंचमं केतुर्निधिश्च सप्तैते प्राणहीनानि चक्षते भार्या पुरोहितश्चैव सेनानी रथकृच्च यः म
न्त्र्यश्वकलभश्चैव प्राणिनः सप्त कीर्त्तिताः रत्नान्येतानि दिव्यानि संसिद्धानि महात्मनां चतुर्दश॥ १८८

विधेयानि सर्वेषांचक्रवर्त्तिनां विस्नोरंशेनजायंतेपृथिव्यांचक्रवर्त्तिनः मन्वंतरेषु सर्वेषुअतीता
नागतेषुवै भूतभव्येषुजायंतेवर्त्तमानानितानिवै त्रेतायुगादिकेष्वत्रजायंतेचक्रवर्त्तिनः भद्रा
णिएतानितेषांवैभवंतीहमहीक्षितां अद्भुतानिचचत्वारिबलंधर्मसुखंधनं अन्योन्यस्याविरोधेनप्राप्यं
तेवैनृपैःसमं अर्थोधर्मश्चकामश्चयशोविजयएवच अैश्वर्येणाणिमाद्येनप्रभुशक्त्यातथैवच
श्रुतेनतपसाचैवऋषिंस्तेभिभवंतिच बलेनतपसाचैवदेवदानवमानुषान् लक्षणैश्चाभिजा
यंतेशरीरस्थैरमानुषैः केशाःस्थिताललाटोर्णाजिह्वाचास्यप्रमार्जनी ताम्रप्रभोष्ठदंतोर्ध्वः श्री
वत्साश्चोर्द्ध्वरोमजाः आजानुबाहवश्चैवजालहस्तावृषाकृती न्यग्रोधपरिणाहाश्चसिंहस्कंधोह
मेहनाः गजेंद्रगतयश्चैवमहाहनवएवच पादयोश्चक्रमत्स्यौतुशंखपद्मौतुहस्तयोः पंचाशी
तिसहस्राणितेभवंत्यजरानराः असंगागतयस्तेषांचतस्रश्चक्रवर्त्तिनां अंतरिक्षेसमुद्रेचपाता
लेपर्वतेषुच इज्यादानंतपःसत्यंत्रेतायांधर्मउच्यते तदाप्रवर्त्ततेधर्मोवर्णाश्रमविभागतः म
र्यादास्थापनार्थंचदंडनीतिप्रवर्त्तते हृष्टपुष्टाःप्रजासर्वाअरोगाःपूर्णमानसाः एकोवेदश्च

तस्मादस्त्रेतायुगविधिस्ततः त्रीणि वर्षसहस्राणि तदा जीवंति मानवाः पुत्रपौत्रसमाकीर्णा म्रीयंते च
क्रमेण वै एष त्रेतायुगे धर्मस्त्रेतासंध्यां निबोधत त्रेतायुगस्वभावानां संध्यापादेन वर्त्तते संध्यायां वै
स्वभावस्तु युगपादेन तिष्ठति शांशपाउवाच कथं त्रेतायुगमुखे यज्ञस्यासीत्प्रवर्त्तनं पूर्वं स्वायंभुवे स
र्गे यथावत्तद्ब्रवीहि मे अंतर्हितायां संध्यायां सार्द्धं कृतयुगेन वै कालाख्यायां प्रवृत्तायां प्राप्ते त्रेतायु
गे तदा वर्णाश्रमव्यवस्थानं कृतवंतश्च वै पुनः संभारांश्च संभृत्य कथं यज्ञः प्रवर्त्तितः एतच्छ्रुत्वा
ब्रवीत्सूतः श्रूयतां शांशपायन: यथा त्रेतायुगमुखे यज्ञस्यासीत्प्रवर्त्तनं औषधीषु च जातासु प्र
वृत्ते वृष्टिसर्जने प्रतिष्ठितायां वार्त्तायां गृहाश्रमपुरेषु च वर्णाश्रमव्यवस्थानं कृत्वा मंत्रांश्च संहि
तान् मंत्रान्संयोजयित्वा इहामुत्रेषु कर्मसु तथा विश्वभुगिंद्रस्तु यज्ञं प्रावर्त्तयत्तदा दैवतैः
सहितैः सर्वैः सर्वसंभारसंभृतः तस्याश्वमेधे वितते समाजग्मुर्महर्षयः यजंतं पशुभिर्मेध्यैरू
चुः सर्वे समागताः कर्मव्यग्रेषु ऋत्विक्षु संतते यज्ञकर्मणि संप्रगीतेषु तेष्वेवं च सामगेषु च सुस
स्वरं परिक्रांतेषु लघुषु अध्वर्युप्रैषेषु च आलब्धेषु च मध्येषु तथा पशुगणेषु वै आविष्यपो

हूयमाने देवानां देवहोतृभिः आस्ते तेषु च देवेषु यज्ञभागस्तु महात्मन् यदिंद्रियात्मका देवा यज्ञ-
भागं लभ्यान्तते नान्यजंतेन तदा देवाः कल्यादिषु यथान्तते अधर्ये वर्तेष काले व्यास्थितायेमहर्ष-
यः महर्षयस्तु तान् दृष्ट्वा दीनान्ब्रुपनाएवं स्थितान् प्रष्टकुरिंद्रं संभूय कोयं यज्ञविधिस्तव
अधर्मो बलवानेषहिंसाधर्मेप्सया तव नेष्टः पशुवधस्त्वेष तव यज्ञे सुरोत्तम अधर्मो धर्मघाता
यं प्रारब्धः पशुभिस्त्वया नायं धर्मो ह्यधर्मोयं नहिंसा धर्म उच्यते आगमेन भवान्यज्ञं करोतु य-
दि हेच्छसि विधिदृष्टेन यज्ञेन धर्मस्ते व्ययहेतुना यज्ञवीजैः सुरश्रेष्ठ येषु हिंसा न वर्तते त्रिवर्ष-
परमं कालमुषितैरप्ररोहिभिः एष धर्मो महानिंद्र स्वयंभूविहितः पुरा एवं विश्वभुगिंद्रस्तु
निभिस्तत्वदर्शिभिः सधाय वाक्यमिंद्रेण पप्रच्छुः खेचरं वसुं ऋषय ऊचुः महाप्राज्ञ कथं दृष्टस्त्व-
या यज्ञविधिः नृप उत्तानपाद प्रब्रूहि संशयं नो वद प्रभो श्रुत्वा वाक्यं ततस्तेषामविचार्य बला-
बलं वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह यथोपनीतैर्यष्टव्यमिति होवाच पार्थिवः यष्टव्यं प-
शुभिर्मेध्यैरथ बीजफलैस्तथा हिंसास्वभावो यज्ञस्य इति मे दर्शितागमः तथा ह्यसिंहि तामंत्रा हिं-

व्र·पु·
१६०

सालिंग्राममहर्षिभिः दीर्घेणापनसायुक्तै दर्शनैस्तारकादिभिः तस्मादेषा मया[illegible]चोक्तं तस्मात्त्वा
मंत्रमूर्द्धय यदिस्माणां तान्येव मंत्रवाक्यानि वो द्विजाः तद्धाप्रावर्त्तितां यज्ञो सत्यया भीन मेक्ष्यः
एवं कृता नरास्तैवै युज्ञात्मान स्तपोधनाः अवभूप भवनं दृष्ट्वा तदर्थं वा गणनाभव मिथ्यावादी।
न्ययोयस्मात्सविवेशारसातलं ऊर्द्धचारी वसुर्भूत्वा रसातलेचरोभवत् वसुधातलवासी तु तेन
वाक्येनसोभवत् धर्माणां संशयछेत्ता राजा यस्तस्य धागतः तस्मान्नवोच्यमेकेन वहुज्ञेनापि सं
शयः वहुद्वारस्य धर्मस्य सूक्ष्मादरवपागतिः तस्मान्नश्रेयाद्वक्तुंधर्मः शाक्यस्तकेनचित् दे
वान्‌षीन्पादायस्वायंभुवमतेमनुं तस्मान्नहिंसाधर्मस्य[illegible]रमुक्तंमहर्षिभिः ऋषिकोटिसह
स्राणि कर्मभिस्तैर्दिवं यदि तस्मान्नेदानं यज्ञेवाप्रशंसंतिमहर्षयः उंछं मूलंफलंशाकमुद
पात्रं तपोधनाः एवंदत्वाविभवतः स्वर्गलोके प्रतिष्ठिताः अद्रोहस्त्वाप्यलोभश्च दमो भूतदया
तपः ब्रह्मचर्यं तपासत्यमनुक्रोशः क्षमा धृतिः सनातनस्य धर्मस्य मूलमेतदुरासदं धर्म मं.
त्रात्मको यज्ञस्तपश्चानशानात्मकं यज्ञेनदेवानाप्नोतिवैराज्यंतपसापुनः ब्राह्मणं कर्मसं

राम·
१६०

न्यासाद्वैराग्यात्प्रकृतेर्लयं ज्ञानात्प्राप्नोतिकैवल्यंपंचैतागतयस्मृताः एवंविवादःसुमहान्यज्ञ
स्यासीत्प्रवर्त्तने ऋषीणांदेवतानांचपूर्वंस्वायंभुवेंतरे ततस्तेऋषयोदृष्ट्वाहन्यमानंवलेनतु वसो
र्विकाममनाहत्यजग्मुस्तेवैयथागताः गतेषुदेवसंघेषुदेवायज्ञमगाहुयन् श्रूयंतेहितपःसिद्धा
ब्रह्मक्षत्रमयानृपाः प्रियव्रतोत्तानपादौध्रुवोमेधातिथिर्वसुः सुमेधाविरजाश्चैवशंखपाड्वप
वच प्राचीनवर्हिःपर्जन्योहविर्द्धानादयोनृपाः एतेचान्येचबहवस्तपःसिद्धादिवंगताः राज
र्षयोमहासत्वायेषांकीर्त्तिःप्रकीर्त्तिताः तस्माद्विशिष्यतेयज्ञात्तपःसर्वैस्तुकारणैः ब्रह्मणात
पसासृष्टंजगद्विश्वमिदंपुरा तस्मान्नाप्नोतितद्यज्ञस्तपोमूलमिदंस्मृतं यज्ञप्रवर्त्तनंह्येवंततःस्वा
यंभुवेंतरे ततःप्रभृतियज्ञोयंयुगैःसहव्यवर्त्तत ॥ इतिश्रीवायुप्रोक्ते महापुराणेयज्ञवर्णनं ॥
सूतउवाच अतऊर्द्ध्वंप्रवक्ष्यामिद्वापरस्यविधिंपुनः तत्रत्रेतायुगेक्षीणेद्वापरंप्रतिपद्यते द्वापरादौ
प्रजानांतुसिद्धिस्त्रेतायुगेतुया परिवृत्तेयुगेतस्मिंस्ततःसासंप्रणश्यति ततःप्रवर्त्ततेतासांप्रजानां
द्वापरेपुनः लोभोधृतिर्वणिक्युद्धंतत्वानामविनिश्चयः संभेदश्चैववर्णानांकार्याणांचविनिर्णयः

ब्र॰पु॰
१६१

याच्यावधः प्रणोदंडोमदोदंभः क्षमावलं एषारजस्तमोयुक्ताप्रवृत्तिर्द्वापरेस्मृता आद्येकृतेनधर्मोस्तित्रेता।
यांसंप्रपद्यते द्वापरेव्याकुलीभूत्वाप्रणश्यतिकलौपुनः वर्णानांविपरिध्वंससंकीर्यंतेतथाश्रमाः द्वैधमु।
त्पद्यतेचैवयुगेतस्मिन्श्रुतौस्मृतौ द्वैधात्श्रुतिस्मृत्योर्निश्चयोनाधिगम्यते अनिश्चयाधिगमनाद्धर्मतत्वंन
विद्यते धर्मतत्वेह्यभिज्ञानांमतिभेदोभवेन्नृणां परस्परविभिन्नैस्तेदृष्टीनांविभ्रमेणच अयंधर्मोह्ययंने
तिनिश्चयोनाभिगम्यते धर्मतत्वेत्वभिज्ञानांमतिभेदोभवेन्नृणां परस्परविभिन्नैस्तेदृष्टीनांविभ्रमेव
च कारणंचैवकल्यान्कारणाच्चाप्यनिश्चयात् मतिभेदेचतेषांवैदृष्टीनांविभ्रमोभवेत् ततोदृष्टि
विभिन्नैस्तैःकृतंशास्त्राकुलंत्विदं एकोवेदश्चतुष्पादस्त्रेतास्विहविधीयते संरोधादायुषश्चैवव्यस्य
तेद्वापरेषुसः वेदव्यासैश्चतुर्द्धातुव्यस्यतेद्वापरादिषु ऋषिभिनपुनर्भेदाभिद्यंतेदृष्टिविभ्रमैः
मंत्रब्राह्मणविन्यासैःस्वरवर्णविपर्ययैः संहिताऋग्यजुःसाम्नांसंहन्यतेश्रुतर्षिभिः सामान्या
द्वैकृताश्चैवदृष्टिभिन्नैःक्वचित्क्वचित् ब्राह्मणंकल्पसूत्राणिमंत्रप्रवचनानिच अन्येतुप्रस्थिता
स्तान्वैकेचित्तान्प्रत्यवस्थिताः द्वापरेषुप्रवर्त्तंतेभिन्नदृष्टाभ्रमान्विताः एकमाध्वर्यवंपूर्वमा

राम॰
१६१

सीदंते पुनः पुनः सामान्या विपरीतार्थैः कृतं शास्त्राकुलं त्विदं आध्वर्यवस्य प्रस्थानैर्बहुधा व्याकुलं
कृतं तथैवाथर्वऋक्सामां विकल्पैश्चाप्यसंक्षयैः व्याकुलं द्वापरे भिन्नं क्रियते भिन्नदर्शनैः तेषां
भेदप्रतीभेदा विकल्पैश्चाप्यसंख्ययाः द्वापरे संप्रवर्त्तंते विनश्यंते पुनः कलौ तेषां विपर्ययोत्प
न्ना भवंति द्वापरे पुनः अवृष्टिमरणं चैव तथैव व्याध्युपद्रवाः वाङ्मनःकर्मजैर्दुःखैर्निर्वेदो जा
यते पुनः निर्वेदाज्जायते तेषां दुःखमोक्षविचारणं विचारणाच्च वैराग्यं वैराग्याद्दोषदर्शनं दोषा
णां दर्शनाच्चैव द्वापरे ज्ञानसंभवः तेषां मज्ञानिनां पूर्वं मार्त्ये स्वायंभुवेंतरे उत्पद्यंते हि शास्त्रा
णां द्वापरे परिपंथिनः आयुर्वेदविकल्पाश्च अंगानां ज्योतिषस्य च अर्थशास्त्रविकल्पस्य हेतु
शास्त्रविकल्पनं स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक्पृथक् द्वापरे संप्रवर्त्तंते मतिभेदा
स्तथा नृणां मनसा कर्मणा वाचा कृच्छ्राद्वार्त्ता प्रसिध्यति द्वापरे सर्वभूतानां कायक्लेशपुरस्कृता
लोभाधृतिर्वणिग्युद्धं तत्वानामविनिश्चयः वेदशास्त्रप्रणयनं धर्माणां संकरस्तथा पूर्णे वर्षस
हस्रे द्वे परमायुस्तथा नृणां निःशेषे द्वापरे तस्मिन्तस्य संध्या तु पादतः प्रतिष्ठिते गुणैर्हीनो धर्मो

ब्र॰पु॰
१६२

सोद्वापरस्यतु नचैवसंध्यापादेनत्र्यंशस्त्वस्यावतिष्ठते द्वापरस्यचवर्येषांतिष्यस्यतुनिबोधत द्वापरस्यां
शश्शेषेषुप्रतिपत्तिः कलेरतः हिंसासूयानृतंमायावधश्चैवतपस्विनां एतेस्वभावातिष्यस्यसाधय
न्तिचवैप्रजाः एषधर्मकृतः कृत्स्नोधर्मश्चपरिहीयते मनसाकर्मणावाचावार्त्तासिद्ध्यतिवानवा क
लौप्रमारकोरोगः सततंक्षुद्भयानिच अनावृष्टिभयंघोरंदेशानांचविपर्ययः नप्रमाणंस्मृतोस्ति
तिष्येलोकेयुगेयुगे गर्भस्थोम्रियतेकश्चिद्यौवनस्थस्तथापरः स्थाविर्येमध्यकौमारेम्रियन्तेवैक
लौप्रजाः अधार्मिकत्वेनाचारः मारकोपाल्पतेजसः अनृतंवाश्वसततंतिष्येजायंतिवैप्रजाः दु
रिष्टैर्दुरधीतैश्चदुराचारैर्दुरागमैः विप्राणांकर्मदोषैश्चप्रजानांजायतेभयं हिंसामायासूयाच।
क्रोधासूयाक्षमानृतं तिष्येभवंतिजंतूनांरागोलोभश्चसर्वशः संक्षोभोजायतेत्यर्थंकलिमासा
द्यवैयुगं नाधीयंतेतदावेदान्नयजंतिद्विजातयः उत्सीदंतिनराश्चैवक्षत्रियाःसविशःक्रमात् शूद्रा
णामंतयोनस्तुसंबंधाब्राह्मणैः सह भवंतीहकलौतस्मिन्शयनासनभोजनैः राजानः शूद्र।
भूयिष्ठापाषंडानांप्रवर्त्तकाः भ्रूणहत्याप्रजास्तत्रप्रजाएवंप्रवर्त्तते आयुर्मेधावलंरूपंकुलंचैव

राम॰
१६२

महीयते शूद्राश्च ब्राह्मणाकारा शूद्राचाराश्च ब्राह्मणाः राजवृत्तेस्थिताश्चौराश्चौरवृत्ताश्च पार्थिवाः
भृत्याश्चानिसृष्टदारा युगान्ते प्रत्युपस्थिते स्वापादप्रवलत्वं च गवां चैवाप्युपक्षयः साधूनां वि
निवृत्तिं च विद्यात्तस्मिन् कृते युगे तदाग्र्यं हेमो महेन्द्रको दुर्लभो दानमूलवान् चतुराश्रमशैथि
ल्याद्धर्मः प्रविचलिष्यति तदा ह्यल्पफलाद्देवी भवन्भूमिर्महीयसी शूद्रा स्वल्पश्चरिष्यंति युगं ते।
प्रत्युपस्थिते तदा ह्येकाग्निको धर्मो द्वापरे यज्ञमासिकः त्रेतायां वत्सरं लक्ष्यं पकाह्नारतिकृच्छ
ते अरक्षितारो हर्त्तारो बलिभागस्य पार्थिवाः युगान्ते भुभविष्यन्ति स्वरक्षणपरायणाः अक्षत्रिया
श्च राजानो विप्राः शूद्रोपजीविनः शूद्रानिवादिनः सर्वयुगान्ते द्विजसत्तमाः पतनयुश्च भविष्यति
वहवोस्मिन्कलौ युगे भूयिष्ठं कूटमानैश्च पण्यविक्रीतते जनाः कुशीलचर्या पाषंडा वृथारूप
समाश्रिते युरुषाल्प वहुस्त्रीके युगान्ते पर्यवस्थिते वहुयाजनको लोको भविष्यति परस्परं का
वादतः कौरवाकोनाजवोना मत्स्यकः नकश्चित्प्रतिकर्त्ता च वक्ता लोको भवेष्यति श्रेशाका।
चैव यतिते नरयुगान्तस्य लक्षणं नवशून्यावसमती शून्या चैव भविष्यति मंडलानि भवत्यत्र देश।

पुनर्गेरेषु च अल्पोदका वाल्पफला भविष्यंति वसुंधरा गोप्तारश्चाप्यगोप्तारः भविष्यंति शासनाः ह
र्त्तारः परस्त्रीणां परदारप्रधर्षकाः कामात्मानो दुरात्मानो ह्यधर्मास्साहसप्रियः प्रनष्टचेतना दस्यो मु
क्तकेशास्तु चूलिकाः ऊनषोडशवर्षाश्च प्रजायंते युगक्षये शुक्लदंता जिताक्षाश्च मुंडाः काषायवास
सः शूद्रा धर्मं चरिष्यंति युगांते पर्युपस्थिते सस्यचौरा भविष्यंति तथा चैलाभिमर्शिनः चौराश्चौरस्य ह
र्त्तारो हर्तुर्हर्त्ता र एव च ज्ञानेन कर्मण्युपरते लोके निष्क्रियतां गते कीटमूषिकसर्पाश्च धर्षयिष्यंति मान
वान् दुःखेनाभिप्लुतानां च परमायुः शतं भवेत् सुभिक्षं क्षेममारोग्यं सामर्थ्यं दुर्लभं भवेत् कौशि
काः प्रतिपत्स्यंति देशान् क्षुद्भयपीडितान् दृश्यंते न च दृश्यंते वेदाः कलियुगेऽखिलाः उत्सीदंति तथा
यज्ञाः केवलाधर्मपीडिताः काषायिणश्च निर्ग्रंथास्तथा कापालिनश्च ह वेदविक्रयिणश्चान्ये तीर्थविक्र
यिणोऽपरे वर्णाश्रमाणां ये चान्ये पाखंडाः परिपंथिनः उत्पद्यंते तदा ते वै संप्राप्ते तु कलौ युगे अधीयंते तदा
वेदाः शूद्रा धर्मार्थकोविदाः यजंते नाश्वमेधेन राजानः शूद्रयोनयः स्त्रीवधं गोवधं कृत्वा हत्वा चैव परस्प
रं उपहरंत दारान्योन्यं साधयंति तथा प्रजा दुःखप्रचारतास्या मुदेशोत्सादसंयोगात्। - - - - - -

नमोवृत्तं कलौ स्मृतं प्रजास्तु भ्रूणहत्या च यस्य संवै प्रवर्त्तते तस्मादायुर्बलं रूपं कलिं प्राप्य प्रहीयते दुःख
नाभिस्तु नानां वैपरमायुः शतं नृणां दृश्यंते नाभिदृश्यंते वेदाः कलियुगेखिलाः उत्सीदंते न दा यज्ञाः केवा
लाधर्मपीडिताः नदात्वस्यनकाले न सिद्धिं यास्यंति युगांते द्विजसत्तमाः श्रुतिस्मृत्यादिनं धर्मं येचरंत्यनु
सूयकाः त्रेतायां वार्षिको धर्मो द्वापरे मासिकस्मृतः यथाशक्ति चरन्प्राज्ञस्तदाह्नाप्नुयात्कलौ एषा
कलियुगे वस्था संध्यांशं तु निबोध मे युगेयुगे तु हीयंते त्रीस्त्रीन्पादांश्च सिद्धयः युगस्वभावास्तथा संधि
हृंति मासस्तु पादशः संध्यास्वभावास्त्वंशेषु पादशो न प्रतिष्ठिताः एवं संध्यांशके काले संप्राप्ते तु युगांति
के तेषां शास्तासाधूनां भगूणां निधनोत्थितः गोत्रेण वैचंद्रमसो नाम्ना प्रमितिरुच्यते माधवस्य तु सो
शेन पूर्वं स्वायंभुवेंतरे समाः स विंशति पूर्णाः पर्यटन्वै वसुंधरां आचकर्ष स वै सेनां सवाजिरथकुंजरां प्रगृ
हीतायुधैर्विप्रैः शतशोथ सहस्रशः स तदा वै परिवृतो म्लेच्छान्हंति सहस्रशः स हत्वा सर्वशश्चैव राज्ञस्ता
न्शूद्रयोनिजान् पाखंडान्स ततः सर्वान्निःशेषान्कृतवान्प्रभुः नात्यर्थं धार्मिका ये च तान्सर्वान्हंति स
र्वशः वर्णव्यत्यासजाताश्च ये च तानुपजीविनः उदीच्यान्मध्यदेशांश्च पार्वतीयांस्तथैव च प्राच्या।

वृ॰पु॰
१६४

न्प्रतिच्यांचतथाविंध्यपृष्ठाश्रयांतिकान् तथैवदक्षिणात्यांश्चद्रविडान्सिंहलैःसह गंधारान्पारदा
श्चैवयवनान्पवनांश्च्या तथारान्बर्बराश्चीनान् शूलिकान्दरदान्खशान् लंपाकान्पचकेतकां
स्किरातानांचजातयः प्रवृत्तचक्रोबलवान्म्लेच्छानामंतकृद्विभुः अधृष्यःसर्वभूतानांचचाराथवसुंध
रां माधवस्यतुसोंऽशेनदेवस्येहविजज्ञिवान् पूर्वजन्मविधिज्ञश्चप्रमितिर्नामवीर्यवान् गोत्रेणवैचं
द्रमसःपूर्वेकलियुगेप्रभुः द्वात्रिंशेभ्यदितेवर्षेप्रक्रांतेविंशतिसमाः विनिघ्नन्सर्वभूतानिम
नवानिसहस्रशः कृत्वाबीजावशेषांतुपृथ्वींक्रूरेणकर्मणा परस्परनिमित्तेनकोपितोकस्मिको
पेनाकस्मिकेनतु समाधयित्वावृषलान्प्रायशस्तानधार्मिकान् गंगायमुनयोर्मध्ये निष्ठांप्राप्तःस
हानुगः ततोव्यतीतेतस्मिंस्तुसामात्येसहसैनिके उत्साद्यपार्थिवान्सर्वान्म्लेच्छांश्चैवसहस्रशः
तत्रसंध्यांशकेकालेसंप्राप्तेतुयुगांतिके स्थितास्वल्पावशिष्टासुप्रजास्विहक्वचित्क्वचित् अप्रग्रहास्त
तस्तावैलोकवेष्टास्तुवृंदशः उपहिंसंतिचान्योन्यंप्रपद्यंतेपरस्परं अराजकेयुगवशात्संशये
समुपस्थिते प्रजास्तावैततःसर्वाःपरस्परभयार्दिताः व्याकुलाश्चपरिभ्रांतास्त्यक्त्वादारान्गृ।

राम॰
१६४

हाणिच स्थानभ्राणान्समवेक्ष्यंतेनिकारणाः सदुःखिताः नष्टैश्चानस्मेनेधर्मेपरस्परहतास्तदा निर्मर्या
दानिराष्ट्राणिदानिस्थेहानिरयत्रयाः नष्टेवर्षप्रतिहताद्रुस्वकाः पंचविंशकाः हित्वादारांश्चपुत्रांश्चविषा
दव्याकुलेंद्रियाः अनावृष्टिहताश्चैववार्त्तामुत्सृज्यदुःखिताः प्रत्यंतंस्थानिषेवंतेहित्वाजनपदान्स्वकान्
सरितःसागरानूपान्सेवंतेसागरालयाः मधुमांसैर्मूलफलैर्वर्त्तयंतिसदुःखिताः चीरपत्राजिनधराविनि
ष्कृतानिःपरिग्रहाः वर्णाश्रमपरिभ्रष्टाःसंकरंघोरमास्थिताः एवंकष्टमनुप्राप्ताअल्पशेषाःप्रजास्तथा
जराव्याधिक्षुधाविष्टादुःखान्निर्वेदमागमन् विचारणस्तुनिर्वेदात्साम्यावस्थाविचारणा साम्यावस्था
त्मकोबोधःसंबोधाद्धर्मशीलता तासूपशमयुक्तासुकलिशिष्टासुवैस्वयं अहोरात्रात्तदातासांयुगंत
परिवर्त्तते चित्तसंमोहनंकृत्वातासांतैःसमंततः भाविनोर्थस्यचबलात्कृतंतःकृतमवर्त्तत प्रवृत्तेच
तस्मिंस्तुततःकृतयुगेतुवै उत्पन्नाःकलिशिष्टास्तुकार्तयुगिकाःप्रजास्तदा तिष्ठंतिचेहयेसिद्धाअदृष्टा
विचरंतिच सप्तसप्तर्षयश्चैवतत्रतेचव्यवस्थिताः ब्रह्मक्षत्रविशःशूद्राबीजार्थयेस्मृताइह कलिजैः
सहतेसर्वेनिर्विशेषास्तदाभवन् तेषांसप्तर्षयोधर्मंकथयंतरीतरेषुच वर्णाश्रमाचारयुक्तंश्रौतंस्मा

ब्र॰पु॰
१९९

नोद्विजात्तमः ततस्तेषुक्षीयावत्सवर्त्ततेवैप्रजाः कृतेप्रोत्सार्जकृतानां तु धर्मसमर्पितदर्शिनि तेषुध
र्मवृत्स्वार्यंति इतीहायुगाहृयात् मन्वंतराधिकारेषु तिष्ठंति मुनयस्तुवै यथाद्वापरप्रवर्गेषु त्रेता
ष्विहतयेहतो नवानां ग्रथमं इष्टा तेषाम् सेव संभवः तथा कार्त युगानां तु कलिगोष्ठिह संभवः
एवं युगाद्युगानां संहसंभानस्तुपरस्परं वर्त्ततेह्यव वेदा यावन्मन्वंतरक्षयः सुखमायुर्वलं रूपं धर्मा
र्थः कामम एव च युगेषु तानि हीयंते त्रीणि पादक्रमेण तु तसंध्यांशेषु हीयंते युगानां धर्मसिद्धयः
इत्येष प्रतिसंधिर्वै कीर्तितस्तु मया द्विजाः चतुर्युगानां सर्वेषामेतेनैव प्रसाधनं यथा चतुर्युगावृत्ति
सहस्राद्वादशगुणीकृता ब्रह्मणस्तदहः प्रोक्तं रात्रीश्चैतावती स्मृता अत्रार्जवं जडीभावो भूतानामायु
गक्षयात् एतदेव तु सर्वेषां युगानां लक्षणं स्मृतं यथा चतुर्युगानां तु गणितानां हि सप्ततिः क्रमेण परि
वृत्ता तु मनोरंतरमुच्यते चतुर्युगानंत्येकस्मिन्भवतीह यथा तु तत् तथा चान्येषु भवति पुनस्तद्वै यथा
क्रमं सर्गे सर्गे यथा भेदा उत्पद्यंते तथैव तु पंचविंशत्परिमिता न न्यूना नाधिकास्तथा तथा कल्प
युगैः सार्द्धं भवंति सम लक्षणाः मन्वंतराणां सर्वेषां एतदेव तु लक्षणं तथा युगानां परिवर्तनानि।

राम॰
१९९

चिरप्रवृत्तानियुगस्वभावात् तथासंभिवृत्तिजीवलोकक्षयोदयाभ्यांपरिवर्त्तमानः इत्येतल्लक्षणंप्रोक्त
युगानांवैसमासतः अतीतानागतानांचसर्वमन्वन्तरेष्विह अनागतेषुतद्वच्चतर्कः कार्योविजानता
मन्वंतरेषुसर्वेषुअतीतानागतेष्विह एकमन्वन्तरेणैवकेनसर्वाण्यनन्तराणिवै व्याख्यातानिविजानी
ध्वंकल्पेकल्पेनचैवहि तुल्यानिनामभिन्नसर्वेनामरूपैर्भवन्त्युत देवास्सप्तविधायेचइहमन्वंतरेश्वराः
ऋषयोमनवश्चैवसर्वेतुल्याप्रयोजने एवंवर्णाश्रमाणांवैप्रविभागयुगेयुगे युगस्वभावाच्चतथाविध
त्तेवैसदाप्रभुः वर्णाश्रमविभागश्चयुगानियुगसिद्धये अनुषंगात्समाख्याताःसृष्टसर्गान्निबोधत अ
सुरीसर्वगांधारीयेशाचीयक्षराक्षसी यस्मिन्युगेचसंभूतिस्तासांयावच्चजीवितं पिशाचायक्षगंधर्वा
यक्षराक्षसपन्नगाः युगमात्रंतुजीवंतिव्रजंतेमरणंवधेनते मानुषाणांपशूनांचपक्षिणांस्थावरैःसह
तेषांमायुःपरिक्रान्तंयुगधर्मेषुसर्वशः अस्थितिस्तुकलाइच्यभूतानामायुषस्तुवै परमायुश्शतंत्वे
तन्मनुष्याणांकलौस्मृतं देवासुरप्रमाणंतुसप्तसप्तांगुलंकृतम् अंगुलानांशतंपूर्णंमष्टपंचाशमु
त्तरं देवासुरप्रमाणेनउत्क्रान्तेकलिजेःसह चत्वारिंशाण्यशीतिश्चकालजेरंगुलैस्मृतं स्वेनांगुल

ब्र॰पु॰
१९९

प्रमाणेनऊईमाणदमस्तकं इत्येष मानुषोत्सेधो ह्रसतीह युगान्तिके सर्वेषु युगकालेषु अतीतानागते।
ष्विह स्वेनांगुलप्रमाणेनाष्टतालस्मृतो नरः आपादतलमस्तको नवतालो भवेत्तु यः संहतस्त्वानवाकुस्तु सह
दैरपि पूज्यते गवाश्वहस्तिनां चैव महिषस्थावरात्मनां क्रमेणैतेन योगेन ह्रासवृद्धिर्युगे युगे षट्स।
मत्यंगुलोत्सेधः पशूनां ककुदस्तु वै अंगुष्ठशतपूर्णस्तु मुत्सेधः करिणां स्मृतः अंगुलानां सहस्रं तु
चत्वारिंशांगुलं विना पंचाशतं हयानां च उत्सेधः शाखिनां स्मृतः मानुषस्य शरीरस्य संनिवेश
स्तु यादृशः तल्लक्षणस्तु देवानां दृश्यते मत्त्वदर्शितान् बुद्ध्यातिशययुक्तं च देवानां काय उच्यते
देवानातिशयं चैवं मानुषं काय मुच्यते इत्येते वै परिक्रान्ता भावा ये दिव्यमानुषाः पशूनां पक्षिणां
चैव स्थावराणां निबोधत गावो ऽजावयो ऽश्वाश्च हस्तिनः पक्षिणो नगाः उपयुक्ताः क्रियास्वेते।
यज्ञियास्तिह सर्वशः देवस्थानेषु जायंते तेन रूपाप्ववते पुनः यथा यथोपभोगास्तु देवानां शुभ
मूर्तयः तेषां रूपानुरूपैस्तु प्रमाणं स्थाणुजङ्गमैः मनोज्ञैस्तत्स्वभावैस्तु सुखभोगाः प्रपेदिरे अ
तः सिद्धान्प्रवक्ष्यामि सन्तः साधव एव च सदिति ब्रह्मणः शब्दस्तद्वन्तो ये भवन्त्युत सायोज्यं ब्रह्म

राम॰
१९९

णोह्यंतस्तेनसंतःप्रवदते दशात्मिकेयविमुख्येकारणेचाष्टलक्षणो नकुप्यंतिनहृष्यंतिजितात्मा
नस्तुतेस्मृताः सामान्येषुचधर्मेषुतथावैशेषिकेषुचाब्रह्मक्षत्रविशोयुक्ताः यस्मात्तस्माद्द्विजात
यः वर्णाश्रमेषुयुक्तस्यस्वर्गतोमुखचारिणः श्रोतस्मार्त्तस्यधर्मस्यज्ञानाधर्मःसउच्यते वि
द्यायास्साधनात्साधुर्ब्रह्मचारीगुरोर्हितः कारणंसाधनाच्चैवगृहस्थःसाधुरुच्यते साधनात्त
पसोरण्येसाधुर्वैखानसःस्मृतः यतमानोयतीसाधुःस्मृतोयोगस्यसाधनात् एवमाश्रमधर्मा
णांसाधनात्साधवस्मृताः गृहस्थोब्रह्मचारीचवानप्रस्थोथभैक्षकः नवदेवानपितरोमुनयोन
चमानवा अयंधर्मोह्ययंनेतिब्रुवतेभिन्नदर्शनाः धर्माधर्माविहप्रोक्तौशब्दावेतौक्रियात्मको
कुशलाकुशलंधर्मधर्माधर्माविति स्मृतौ धारणार्थेभवेत्तद्धातुर्धर्मःप्रकीर्तितः अधार
णेमहत्वेचअधर्मइतिचोच्यते अत्रेष्टप्रापकोधर्मआचार्यैरुपदिश्यते स्वयमाचरतेयस्मा
दाचारस्थापयत्यपि आचिनोतिचशास्त्रार्थान्यमैसनियमैर्युतः पूर्वेभ्योवेदविद्भ्यश्चतं
समर्षयोब्रुवन् ऋचोयजूंषिसामानिब्रह्मणोगानिचश्रुतिः मन्वंतरस्यातीतस्यस्मृत्वावारं

पुनर्जगौ तस्मात्स्मार्त्तः स्मृतो धर्मो वर्णाश्रमविभागजः स एव द्विविधो धर्मो आचार्यैरुपदिश्यत।
शेषशब्दाच्छिष्ट इति प्रोक्तं शेषं प्रचक्षते मन्वन्तरेषु ये शिष्टा इह तिष्ठन्ति धार्मिकाः मनुः सप्तर्षयश्चै
व लोकसंतानकारणात् धर्मार्थं ये च शिष्टान्वैवाग्रामे प्रचक्षते मन्वादयश्च ये शिष्टा ये मया।
प्रागुदाहृताः तैः शिष्टैश्चरितो धर्मः सम्यगेव युगेयुगे त्रयीवार्त्ता दंडनीतिरीज्या वर्णाश्रमास्तथा।
शिष्टैराचर्यते यस्मान्मनुना च पुनः पुनः पूर्वैः पूर्वगतत्वाच्च शिष्टाचारः स शाश्वतः दानं सत्यं
तपोलोभो विद्येज्यानमनोदया अष्टैतानि चरित्राणि शिष्टाचारस्य लक्षणं शिष्टा यस्माच्चरन्त्ये
तं मनुः सप्तर्षयश्चैव मन्वन्तरेषु सर्वेषु शिष्टाचारस्ततः स्मृतः विज्ञेयः श्रवणाच्छ्रौतः स्मरणात्स्मा
र्त्त उच्यते इज्यावेदात्मकः श्रौतः स्मार्त्तो वर्णाश्रमात्मकः प्रत्यंगानि च वक्ष्यामि धर्मस्येह तु लक्ष
णं दृष्टानुभूतमर्थं यः पृष्टो वै न निगूहति यथाभूतप्रवादस्तु इत्येतत्सत्यलक्षणं ब्रह्मचर्यं त
पो मौनं निराहारत्वमेव च इत्येतत्तपसो मूलं सुघोरं तद्दुरासदं पशूनां द्रव्यहविषां ऋक्सामय
जुषां तथा ऋत्विजां दक्षिणानां च संयोगो यज्ञ उच्यते आत्मवत्सर्वभूतेषु यो हितायाहिते यच

प्रवर्त्तते समदृष्टिकृत्स्नासेषा दयास्मृता आक्रुष्टोभिहतो वापि नाक्रोशेद्यो निहन्ति वा वाग्मनःकर्म
भिर्हन्ति तितिक्षा का मा स्मृता स्वामिना रक्ष्यमाणानामन्येषां च सतश्च परस्वामामननाद्दामस्तो
भरहकीर्त्यते मैथुनस्यासमाचारसाचिंतनमकल्पनं निवृत्तिर्ब्रह्मचर्यं च दक्षिड्डं दम उच्यते आ
त्मार्थे वा परार्थे वा इंद्रियाणि वयस्यैवे नमिथ्या संप्रवर्त्तते शमस्सैतनुलक्षणं दशात्मके यो विष
ये कारणे चाष्टलक्षणे नक्रुद्ध्येत प्रतिहते सजितात्मा विभाव्यते यद्यदिष्टतमं द्रव्यं न्यायेनोपागतं
च यत् तत्तद्गुणवते देयं इत्येतद्दानलक्षणं तंतदानं त्रिविधमित्येनाकनिष्ठज्येष्ठमध्यमं तत्र नैश्रे
यसं श्रेष्ठं कनिष्ठं स्वार्थसिद्धये कारुण्यात्सर्वभूतेभ्यः संविभागस्तु बंधुषु श्रुतिस्मृतिभ्यां विहितो
धर्मो वर्णाश्रमात्मकः शिष्टाचाराविरुद्धश्च स धर्मस्तत्साधुसंगतः अप्रहेयो हानिर्दृष्टश्रुतयेष्टानभि
नंदनं प्रीतिपापविषादेभ्यो विनिवृत्तिर्विरक्तता सन्यासः कर्मणो न्यासः कृतानामकृतैः सह कुशला
कुशलानां तु प्रमाणं त्याग उच्यते अव्यक्ताद्यो विशेषात्तु विकारोस्मिन्नचेतने चेतनाचेतनात्स्ववा
विज्ञानं ज्ञानमुच्यते प्रत्यगानां तु धर्मस्य हन्ये तत्त्वलक्षणं स्मृतं ऋषिभिर्धर्मतत्त्वज्ञैः पूर्वं स्वायंभुवेंतरे

ब्र॰पु॰
१९८

अत्रवो वर्णयिष्यामि विधिं मन्वंतरस्य च: तथैव चानुवर्ण्यस्य चातुर्वर्ण्यस्य चैव हि प्रतिमन्वंतरं चैव श्रुति
रन्या विधीयते ऋचो यजूंषि सामानि यथावत्प्रतिदैवतं आहूतसंप्लवं स्थायी वीर्य्यं कं शतरुद्रियं विधि
हात्रं तथा स्तोत्रं पूर्ववत्संप्रवर्त्तते द्रव्यस्तोत्रं गुणस्तोत्रं कर्मस्तोत्रं तथैव च चतुर्थमाभिजनकं स्तोत्रमे
तच्चतुर्विधं मन्वंतरेषु सर्वेषु यथा देवा भवंति ये प्रवर्त्तयति तेषां वै ब्रह्मा स्तोत्रं चतुर्विधं एवं मंत्रगुणा।
नां तु समुत्पत्तिश्चतुर्विधा अथर्वयजुषां साम्नां वेदेष्विह पृथक् पृथक् ऋषीणां तप्यतामुग्रं तपः परमदु
श्चरं मंत्राः प्रादुर्बभूवुर्हि पूर्वमन्वंतरेष्विह परितोषाद्भयाद्दुःखात्सुखाच्छोकाच्च पंचधा ऋषीणां तारका।
येन दर्शनेन यदृच्छया ऋषीणां यदृषित्वं हि तद्वक्ष्यामीह लक्षणैः अतीतानागतानां च पंचधा ह्यार्ष उ
च्यते अतस्त्वृषीणां वक्ष्यामि ह्यार्षस्य च समुद्भवं गुणसाम्ये वर्त्तमाने सर्वसंप्रलये तथा अविभागे
तु देवानामनिर्देशे नयो यथा अबुद्धिपूर्वकं तद्वै चेतनार्थं प्रवर्त्तते तेन ह्यबुद्धिपूर्वं तच्चेतनेन ह्यधि
ष्ठितं वर्त्तते च तथा तौ तु यथा मत्स्योदके उभौ चेतनाधिष्ठितं तत्त्वं प्रवर्त्तति गुणात्मना कारणत्वा
तथा कार्यं तदा तस्य प्रवर्त्तते विषयो विषयित्वाच्च ह्यर्थे पर्थित्वात्तथैव च कालेन प्रापणीयेन भेदा

राम॰
१९८

स्तुकरणात्मना संसिद्धानि तदाव्यक्तात्क्रमेण महदादयः महतश्चाप्यहंकारः तस्मादिन्द्रियाणि च
भूतभेदास्तु भेदैर्योजयित्वैते परस्परं संसिद्धकार्यकरणः सद्य एव विवर्तते यथोल्मुकात्त्रुटिस्त्वे
मेककालं प्रवर्तते तथा विवर्तमं क्षेत्रज्ञः कालेनैतेन कर्मणा तथाधिकारेषु चोक्तः सहसा संप्रदर्शते
तथा वृत्तोऽस्य व्यक्तात् स महात्मा शरीरस्थो यत्रैवाग्रे व्यवस्थितः तत्रैव संस्थितो विद्वान् द्वारशाला
मुखे विभुः महांस्तु तमसः पारे वैलक्षण्याद्विभाव्यते तत्रैव संस्थितो विद्वांस्तमसोन्त इति श्रुतिः
बुद्धिर्विवर्तमानस्य प्रादुर्भूता चतुर्विधा ज्ञानं वैराग्यमैश्वर्यं धर्मश्चेति चतुष्टयं सांसिद्धिकान्य
पैतानि स्युप्रतिघातानि तस्यैव स महात्मा शरीरस्य वैवर्त्या सिद्धिरुच्यते अत्र शेते च यः पुर्यां क्षेत्रज्ञ
नमप्याधिवा पुरीशत्वाच्च पुरुषः क्षेत्रज्ञानात्समुच्यते क्षेत्रं स क्षेत्रविज्ञानाद्भगवान्मतिरुच्यते
यस्माद्बुध्यानुशेते हि तस्माद्बोधात्मकः सवै ससिद्धये परिणतं व्यक्ताव्यक्तमचेतनं एवं निवृत्ति
क्षेत्रज्ञाक्षेत्रज्ञेनाभिसंहिता क्षेत्रज्ञेन परिज्ञाते भोग्योऽयं विषयः त्विति ऋषिसर्गसंततो धातुक्षेत्रे
सत्येतमसस्तथा एतस्मिन्नियते लोके सिवृत्तस्य पञ्चर्षिस्मितः विवृतसमकालं तु बुद्ध्याव्यक्तम

वा॰पु॰
१६६

षिस्तथं परं हि ऋषनेयस्मात्परमर्षिस्ततस्मृतः गत्यर्थाद् ऋषतेर्धातोर्नामनिर्वृत्तिरादितः यस्मादेषा
स्वयंभूतस्तस्माच्च ऋषिता स्मृता ईश्वराः स्वयमुद्भूता मानसाः ब्रह्मणः सुताः यस्मान्न हन्यते मानैर्म
हान्परिगतः पुरा यस्माद्देवस्वयंभूतस्तस्माच्च ऋषिता स्मृता ईश्वरा ऋषंति ये धीरा महान्तं सर्वतो गु
णैः यस्मान्महर्षयस्तेन तावुद्धे परमदर्शिनः ईश्वराणां सुता ह्येषां मानसा औरसाश्च ते अहंकारस्त
माश्चेव ऋषयंतन ऋषितां गताः तस्मात्तु ऋषयस्ते वै भूतादौ तत्त्वदर्शिनः ऋषिपुत्रा ऋषिकास्तु मैथु
नाद्गर्भसंभवाः तन्मात्राणि च सत्यं च ऋषंते ते महौजसः सत्यर्षयस्ततस्ते वै परमा सत्यदर्शिनः
ऋषीणां च सुतास्ते तु विज्ञेया ऋषिपुत्रकाः ऋषंति विष्णुं तं यस्माद्धि श्रुतस्थितिवेदतत्त्वतः तस्मा- सर्वय
स्ते वै श्रुतस्य परिदर्शनात् अव्यक्तात्मा महात्मा चाहंकारात्मा तथैव च भूतात्मा चेंद्रियात्मा च ते
षां तज्ज्ञानमुच्यते इत्येता ऋषिजातीस्तु नामभिः पंच वै भृगुः भृगुर्मरीचिरत्रिश्चांगिरा पुलहः क्र
तुः मनुर्दक्षो वसिष्ठश्च पुलस्त्यश्चेति ते दश ब्रह्मणो मानसा ह्येते उद्भूताः स्वयमीश्वराः प्रवर्त्तत ऋ
षिर्यस्मान्महांस्तस्मान्महर्षयः ईश्वराणां सुतास्त्वेते ऋषयस्तान्निबोधत काव्यो बृहस्पतिश्चैव क

राम॰
१६६

स्यपश्चवनस्तथा उतथ्यो वामदेवस्तथायोज्यौशिकस्तथा कर्दमो विश्रवा शक्तिर्वालिखिल्यस्त
थापरः इत्येते ऋषयः प्रोक्ता ज्ञानतो ऋषितां गताः ऋषीनाराणां मा ऋषिपुत्रानृषीकास्तु गर्भो।
त्पन्नान्निबोधत यत्सरोनगस्त्यश्च बृहदुक्थः शरद्वतः वाजश्रवाः सुवित्तिश्च श्यावाश्वश्च परायणः द
धीचः शंखमांश्चैव राजा वैश्रवणस्तथा इत्येते ऋषिकाः प्रोक्ता सत्या ऋषितां गताः ईश्वरासंक्षिका
श्चैव ऋषिकाश्चैव ये स्मृताः एते मंत्रकृतः सर्वे कृत्स्नशस्तान्निबोधत भृगुःकाश्यप प्रचेता दधीचो ह्या
त्मवानपि और्वोऽथ जमदग्निश्च विदुःसारस्वतस्तथा आर्ष्टिषेणो युधाजिञ्च वीतहव्यस्सुमेधसः
वैन्यः पृथुर्दिवोदासो ब्रह्मश्वो गृत्समाज्ञभः एकोनविंशतिर्ह्येते भृगवो मंत्रवादिनः अंगिरा वेधस
श्चैव भरद्वाजोऽथ बाष्कलिः तप्याचामतथा गर्ग शिनिसंकृतिरेव च गुरुवीतश्च मान्धाता अंबरीषस्त
थैव च यौवनाश्वः पौरुकुत्सः त्रसदस्युः सदस्यमान् स्वाहार्यो ह्याजमीढश्च ऋषयो वलिरेव च पृष
दश्वो विरूपश्च काव्यश्चैवाथ मुद्गलः उतथ्यश्च भरद्वाजः तथा वाजश्रवा अपि. अयास्यश्च सुचित्ति
श्च वामदेवस्तथैव च उशिजो बृहदुक्थश्च ऋषिर्दीर्घतमास्तथा कक्षीवांश्च त्रयस्त्रिंशत्स्मृता ह्यंगिरसा

वराः एतेमंत्रकृतःसर्वेकाश्यपास्तुनिबोधत कश्यपश्चैववत्सारोनैध्रुवोरैभएवच असितोदेवलश्चैवषडे
तेब्रह्मवादिनः अत्रिरर्चिशनिश्चैवश्यामवाश्चोप्युनिष्ठरः वल्गुनकोमत्तुडीमास्याप्पूर्वातिथिश्चषयः इत्ये
तेचात्रयोप्रोक्तामंत्रकारामहर्षयः वसिष्ठश्चैवशक्तिश्चतथैवचपराशरः चतुर्थइंद्रप्रतिमपंचमस्तुभ
रद्वसु षष्ठस्तुमैत्रावरुणःकुंडिनःसप्तमस्तथा एतेसप्तर्षयोविप्राव्रह्मतत्रातिवासिनः ब्रह्मतत्रमहा
तीर्थंब्रह्मणानिर्मितंपुरा देवानांचऋषीणांचमुनीनांतत्रसंगमः ब्रह्मणाचकृतप्रश्नःकदृष्टोवायुदेवताः
ऋषिणापिसदाप्रोक्तंनदृष्टोवायुदेवता इतिचिंतयतांतेषांश्रणमात्रस्तुदृष्टवान् दृष्टेपुरेचतत्रासिद्धा
योनांप्राप्तरेपुरं तत्तीर्थंभुविविख्यातंहनुमान्यत्रजीवितः तत्रैवस्थापितोविश्वावायुनाब्रह्मवादिना
देवत्रयाणामादेशाद्धर्मसंरक्षणायच तत्रकुंडस्थिरेश्वासीन्नित्यंसर्वोसत्यमूर्त्तिमान् वावादित्यश्चदेवो।
ह्यत्रस्थापितोवायुनातदा कामदःसर्वदःसूर्यःप्रभुरीशःप्रतापवान् सहस्रकरसंयुक्तःसर्वायुधविभू
षितः रत्नादेवीयुतःश्रीमान्त्रयीधारस्त्रयीमयः सूर्यकुंडंचतत्रासीद्ब्रह्मकुंडमतःपरं रुद्रकुंडंहरेः
कुंडमेतत्कुंडचतुष्टयं नवदुर्गास्थितातत्रक्षेत्रसंरक्षणायचाहरिद्वयंत्रिगुणांस्थानधायदृचतुष्टयम्

त्रिगुणेऽशांतथा यस्त्वचतुष्टयं विवाहव्रतचूडासु कर्मनेवां प्रदीयते आचारविविधाप्रोक्ता वाडवानां प्रय
त्नतः तावंतो हि गुणाः पूज्या यावंतो ब्राह्मणाः स्मृताः ॐ शारू पाः द्विजा पूर्वं मूर्त्तिमंत तत्स्थिता मंत्रैर्मंत्रवि
दांश्रेष्ठैः कृतावेशास्तु कोविदैः वापीकूपतडागानि देवतायतनानि च धर्मशालापिवद्दुल्ला वायुस्था
ने महापुरे रत्नवतीस्वर्णसमयं गंगा चाम्नवाहिनी कलौ हस्वहृतीनाममहापातकनाशनी वायुना
स्थापितं ह्येतत्क्रामनेपापनाशनं स्तनंदनं वनं तत्र ऋषभराजर्षिसेवितं यतस्थानमयाप्रोक्तं सर्वेषां च स
मासतः निरूपमा च तेन विधावायुना स्थापिता च ये उपमा च दशैवेति विधेया ब्राह्मणस्यतु लक्षणं।
ब्राह्मणाश्चैव ह्मिहितं सर्वशाखिनां हेतुर्हेतस्मृतं धानो यत्रिहंतस्य कदाितं परैः अपवार्यपरिग्रामे हि नोते
गंतिकर्मणः तथानिर्वचनं ब्रूयाद्धावयांचसावधारणे निंदांतामा कुराचार्यायहोमातिंदते वचः अप
वांत्तु सते धातो ब्रह्मासाधारणं वेत्तथा इदं त्विदमिदं नेदमित्यनिश्चित्य संशयः इदमेव विधातव्यमित्य
यं विधिरुच्यते अनस्याप्यस्य चोक्तत्वा - द्वापरकृतिः स्मृता यो हंत्यंततरोक्त श्रुपुराकल्पः स उच्यते
पुरा विक्रांतवादित्वात्पुराकल्पस्य कल्पना मंत्रब्राह्मणकल्पस्त निगमे पदविस्तरैः अनिश्चित्य

ब्र॰पु॰
२०१

कृतामाहुर्व्यवधारणाकस्यनं यथ्यहीदं तथा तद्वेदुर्दंवापितथैव तं इत्येवहापदेशोयं द्रशामोब्राह्म
णस्यतु इत्येतद्ब्राह्मणस्याद्यौ विहितं लक्षणं बुधैः तस्यतद्वृत्तिकृद्धि स्याद्व्याख्यायानुपदं द्विजैः
मंत्रब्राह्मणकल्पनाश्चैव विधिदृष्टेन कर्मसु मंत्रो मंत्रयतेर्धातोर्ब्राह्मणो ब्रह्मणोणनम् अस्यादेर
समं दिष्ठं सारवद्विश्वतोमुखं अस्याभमममनवं पंचसूत्रं सूत्रविदो विदुः ॥ इतिश्रीवायुप्रोक्ते
ऋषिलक्षणं नाम ॥ ऋषय ऊचुः ऋषयस्तु ततः कृत्वा सूतं माहुः सुदुस्तरं कथं वेदा पुराव्या
सात्तन्नो ब्रूहि महामते सूत उवाच द्वापरेतु पुरावृत्ते मनौ स्वायंभुवे तरे ब्रह्मा मनुमुवाचेदं वे
दं व्यस्य महामते परिवृत्तं युगं तात स्वल्पवीर्या द्विजातयः संवृत्ता युगदोषेण सर्वं चैव यथा क्रमं
भ्रष्टमानं युगवशाद्स्वशिष्टं हि दृश्यते दशसाहस्रभागेन स्ववशिष्टं कृतादिदं वीर्यं तेजो बलं वाल्प
सर्वं चैव प्रणश्यति वेदवेदाहि कार्यास्याद् माभूद्वेदविनाशनं वेदनाशमनुप्राप्ते यज्ञो नाशं गमिष्य
ति यज्ञे नष्टे वेदनाशस्तनः सर्वं प्रणश्यति आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः पुनर्दशगुणः
कृत्स्नो यज्ञो वै सर्वकामधुक् एवमुक्तस्तथेत्युक्त्वा मनुर्लोकहिते रतः वेदमेकं चतुष्पादं चतुर्धा

राम॰
२०१

व्यभजत्प्रभुः ब्रह्मणैवचनाम्नातलोकानांहितकाम्यया तदहंवर्त्तमानेनयस्मात्कंवेदकल्पनं
मन्वंतरेण वक्ष्यामिव्यतीतानांनाप्रकल्पनं प्रत्यक्षेणपरोक्षंवैतन्निबोधतसत्तमाः अस्मिन्युगेऽ
तेव्यासःपाराशर्यःपरंतपः द्वैपायनइतिख्यातोविष्णुरूपःप्रकीर्त्तितः ब्रह्मणाचोदितः
सोस्मिन्वेदंव्यस्तुंप्रचक्रमे अथशिष्यान्सजग्राहचतुरोवेदकारणात् जैमिनिंचसुमंतंच
वैशंपायनमेवच पैलंतेषांचतुर्थंतु पंचमंलोमहर्षणं ऋग्वेदश्रावकंपैलंजग्राहविधिवद्द्वि
जं यजुर्वेदप्रवक्तारंवैशंपायनमेवच जैमिनिंसामवेदार्थश्रावकंसोन्वपद्यत तथैवाथर्ववे
दस्यसुमंतुमृषिसत्तमं इतिहासपुराणस्यवाकोवाक्यस्यचैवहि मांवैप्रतिजग्राहभगवानीश्व
रःप्रभुः एकआसीद्यजुर्वेदस्तंचतुर्धाविकल्पयत् चातुर्होत्रमभूत्तस्मिंस्तेनयज्ञमकल्पयत्
आध्वर्यवंयजुर्भिस्तुऋग्भिर्होत्रंतथैवच औद्गात्रंसामभिश्चक्रेब्रह्मत्वंचाप्यथर्वभिः सामवेद
चतेनोक्ता ब्रह्मत्वमकरोद्यज्ञेवेदेनाथर्वणेनतु ततःसत्त्वउद्धृत्यऋग्वेदंसमकल्पयत् होतृत्वं
कल्पयेत्तेन यज्ञवाहंजगद्धिते सामभिःसामवेदंचतेनौद्गात्रमरोचयत् राजंस्त्वथर्ववेदेनसर्वं।

ब्र॰पु॰
२०२

कर्माण्यकारयत् आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः पुराणसंहिताञ्चक्रे पुराणार्थ
विशारदः यत्किष्टं तु यजुर्वेदं तेन यज्ञमथाप्युजन् युंजानः स यजुर्वेद इति शास्त्रविनिश्चयः पा
दानामृधिनत्वाच्चयजं विविधमाश्रितै सतेनोधृत्यवीर्यस्तु ऋत्विग्भिर्वेदपारगैः प्रयुज्यते।
अश्वमेधास्तेन वायुज्यते तु सः ऋचो गृहीत्वा पैलस्तु व्यभजत्तद्द्विधा पुनः द्विकृत्वा संयुगे वैव
शिष्याभ्यामददात्प्रभुः इंद्रप्रमतये चैकां द्वितीयां बाष्कलाय च चतस्रः संहिताः कृत्वा बाष्क
लिर्द्विजसत्तमः शिष्यानध्यापयामास स्वेष्वशाभिरतान् हितान् बोध्यं तु प्रथमां शाखां द्वि
तीयामग्निमाठरे पाराशरत्नीयां तु याज्ञवल्क्यामथापराम् इंद्रप्रमतिरेकां तु संहितां द्विज
सत्तमः अध्यापयन्महाभागो मार्कंडेयं यशस्विनं सत्यश्रवसमग्र्यं तु पुत्रं स तु महायशाः स
त्यश्रवाः सत्यहितं पुनरध्यापयद्द्विजान् सोपि सत्यपरं पुत्रं पुनरध्यापयत्प्रभुः सत्यश्रियं म
हात्मानं सत्यधर्मपरायणं अभवंस्तस्य शिष्यास्तु त्रयस्तस्य महौजसः सत्यश्रियस्तु विद्वांसः शा
स्त्रग्रहणतत्पराः शाकल्यः प्रथमस्तेषां तस्मादन्यो रथीतरः बाहुलिश्च भरद्वाज इति शाखा।

राम॰
२०२

प्रवर्त्तकः देवमित्रस्तु साकल्यो ज्ञाना नाहंकारगर्वितः जनकस्य स यज्ञे वै विनाशमगमद्द्विजाः
प्राणांश्चापि न ॥ कथं विनाशमगमत्स मुनिर्ज्ञानगर्वितः जनकस्य स यज्ञे वै कथ्यं वादो बभूव ह
किमर्थं चाभवद्वादः केन सार्द्धमथापि वा सर्वमेतद्यथावृत्तमाचक्ष्व विदितं तव ऋषीणां तु
वचः श्रुत्वा तद्वृत्तमथाब्रवीत् सूत उवाच ॥ जनकस्याश्वमेधे तु महानासीत्समागमः ऋषी
णां तु सहस्राणि तत्राजग्मुरनेकशः राजर्षेर्जनकस्याथ चित्ते यत्नाहि दिदृक्षवः आगतान्ब्र
ह्मणान्दृष्ट्वा जिज्ञासा सास्याभवत्ततः कोन्वेषां ब्राह्मणश्रेष्ठः कथमेतन्निश्चयं भवेत् इति निश्चि
त्य मनसा बुद्धिं चक्रे जनाधिपः गवां सहस्रमादाय सुवर्णमधिकं ततः समानीत्वा निदर्शी
त्य मुनीन्प्राह नराधिपः सर्वानहं प्रपन्नोस्मि शिरसा श्रेष्ठभागिनः यद्येतदाहृतं वित्तं यो वः
श्रेष्ठतमो भवेत् हरतस्तु तदुपनीतं हि विप्रा वित्तं द्विजोत्तमाः जनकस्य वचः श्रुत्वा मुनयस्ते
ऋतिद्धमाः दृष्ट्वा धनं महासारं धनवृध्नां जिघृक्षवः आकृष्यां चक्रुरन्योन्यं वेदज्ञानमदान्विताः
मनसा गतचिन्तास्ते ममेदं धनमित्यतः ममैवेतन्नवेत्यन्ये ब्रुवन्ति किं दाविकम्पसे इत्येवं धनदोष

ब्राह्मणा न

ण वादाश्चक्रुरनेकशः तथान्यस्तत्र वै विद्वान् ब्रह्मवाहसुतः कविः याज्ञवल्क्यो महातेजास्तपस्वी
ब्रह्मवित्तमः ब्रह्मणोथ गास्तमुत्पन्नो वाक्यं प्रोवाच सुस्वरं शिष्यं ब्रह्मविदां श्रेष्ठो धनमेतद्गृहाण
मो न यस्त्वचरद्धेवत्समभेन तत्र संशयः सर्ववादेषु हेवक्ता नान्यः कश्चित्तमस्तमः यो वा
न प्रियते विप्रः समाहूय तु मा चिरं ततो ब्रह्मर्षिवर्ष्टाः समुद्र इव संप्लवे तानुवाच ततः स्वस्थो
याज्ञवल्क्यो हसन्निव क्रोधमाकाष्ट विहीयो भवंतः सत्यवादिनः वदामहे यथाप्रश्नं जिज्ञासं तपर
स्परं ततोऽध्यात्मसंस्थो वादानगमुरनेकशः सहस्रधा प्रभेदैश्च सूक्ष्मदर्शनसंभवैः लोकेवे

देतथा दृष्टैर्विद्यास्थानैरलंकृताः प्राप्तोत्तमगुणैर्युक्ताः मत्सरपरिवर्जिताः वादासमभवंस्त
त्र धनहेतोर्महात्मनां अपयत्स्वेकतः सर्वे याज्ञवल्क्यस्त्वेकतः सर्वे ते मुनयस्तेन याज्ञवल्क्ये
न धीमता एकैकशस्ततः प्रश्ने नैवोत्तरमथाब्रुवन् तान् विजित्य मुनीन् सर्वान् ब्रह्मराशिर्महा
द्युतिः शाकल्यमिति होवाच पदकर्त्तारमंजसा शाकल्य वद वक्तव्यं किं ध्यायन्नवतिष्ठसे सर्व
त्वं जडमानेन वा नाध्यात्तो यादृति एवं संधर्षितस्तेन रोषाज्ञाताग्रस्यलोचनः प्रोवाच याज्ञवल्क्यं स

सपुत्रं च मुनिसन्निधौ त्वमस्मांस्तृणवत्कृत्वा तथैवेमान्द्विजोत्तमान् विद्याधनं महासारे स्वयं।
ग्राहं जिघृक्षसि शाकल्येनैवमुक्तो याज्ञवल्क्यः समब्रवीत् ब्रह्मिष्ठानां बलं विद्धि विद्यातत्त्वार्थ
दर्शनं कामप्रार्थनं संवद्धस्ते नार्थं कामयामहे कामप्रश्नधना विप्राः कामप्रश्नान्वदामहे एण
स्यैवो ध्यरान्नेष्टस्तस्मात्रितेधनं मया एतत्कृत्वा वचस्तस्य शाकल्यः क्रोधमूर्छितः याज्ञवल्क्यम
थोवाच कामप्रश्नार्थमद्य च: ब्रूहि इदानीं मया द्विष्टान्कामप्रश्नान्यथार्थतः ततः समभवद्वादस्तयो
र्ब्रह्मविदोर्महान् साग्रं प्रश्नसहस्रं तु शाकल्यस्समपृच्छत याज्ञवल्क्योऽब्रवीत्सर्वान्नृषीणां शृण्व।
तो मदा शाकल्यश्चापि निर्वादे याज्ञवल्क्यः समब्रवीत् प्रश्नमेकं ममापि त्वं शाकल्य वद कामिकं शा
पपणोऽस्य वादस्य अभूवन्मृत्युमाव्रजेत् अथ संवोदितं प्रश्नं याग्यवल्क्येण धीमता शाकल्यस्सम
विज्ञाय मूर्धो मत्तः मवानुवान् एवं मत्तः स शाकल्यः प्रश्नव्याख्यानपीडितः एवं वादः सहस्र
हात्रासीत्तयोर्धनार्थिनोः ऋषीणां मुनिभिः सार्द्धं याज्ञवल्क्यस्य चैव हि। सर्वप्रश्नस्तु मप्रश्नान्तश
तशोष्य सहस्रशः व्याख्यायते प्रश्नानेषां प्रश्नसारं महामतिः याज्ञवल्क्यो धनं गृह्य यशो विख्या।

पद्मात्मनः जगामैव गृहं स्वं स शिष्यैः परिवृतो वशी देवमित्रस्तु सांकल्यो महात्मा द्विजसत्तमः चक्रे सं-
हिताः पंच बुद्धिमान्पदवित्तमः तस्य शिष्या भवन्पंच मुद्गलो गोलकस्तथा खालीयश्च तथा मत्स्यः शै-
शिरेयश्च पंचमः प्रोवाच संहितास्तिस्रः शाकपूर्णी रथीतरः निरुक्तं च पुनश्चक्रे चतुर्थं द्विजसत्तमः
तस्य शिष्यास्तु चत्वारः केजवो वामनस्तथा धर्मशर्मा देवशर्मा सर्वे व्रतधरा द्विजाः शाकल्यं च मते
सप्त ब्रह्महत्याले वभूवतुः तदा चिन्तापरा प्राप्य गतास्ते ब्रह्मणोन्तिके तस्मात्त्वा चैनसि ब्रह्मणा प्रेषिताः।
पवनेश्वरे तत्रागत्य पूर्यभास्करः पापप्रणश्यति द्वादशार्कं नमस्कृत्य तथा वै बालकेश्वरं एका-
दशांतथा रुद्रान्वायुपुत्रं विशेषतः कुंडे चतुष्टये स्नात्वा ब्रह्महत्या गमिष्यति सर्वे श्रीवनरा भूत्वा
तत्पुरे समुपागताः स्नानेकृते विधानेन देवानां दर्शने कृते उत्तरेश्वरं नमस्कृत्य पवाडवानां प्रसादतः
सर्वपापविनिर्मुक्तां गतास्ते सूर्यमंडलं तदाप्रभृति तत्तीर्थं जातं पातकनाशनं वायोः पुरं पवित्रं च
वायुना निर्मितं पुरा अंजनीगर्भसंभूतहनुमान्पवनात्मजः यदा जातो महादेव हनुमान्स्य विक्रम
तदेवं निर्मितं तीर्थं वायुना ब्रह्मयोनिना जन्मभ्यां जातस्तथा द्वेश्च ब्राह्मणो निवेदिताः कृत्स्नपर्यंत ब्रह्म

यत्रार्थं करस्तेषु कृतो महान् अनेन विधिना जातं विप्राणां शासनं महत् गोत्रो वा कृतं क्रोवा सगरायी गुरु
तल्पगः वाडादिन्ये नमस्कृत्य महापापैः प्रमुच्यते ॥ इति श्रीमहापुराणे वायुप्रोक्ते वायुमहास्थाना
तीर्थवर्णनं नाम ॥ अध्याय ॥ भारद्वाजो याज्ञवल्क्यो गालविः सात्यकिस्तथा धीमान् शान्तवाल
कश्चैव रामश्चद्विजोत्तमाः बाष्कलिश्च भरद्वाजः तिस्रः प्रोवाच संहिताः स्थितेरो निरुक्तं चैव पुनश्च।
क्रे चतुर्थकं त्रयस्तस्य भवत्किप्रणा महात्मानो गुणान्विताः धीमान्नंदायनीयस्तपनगारिश्च बुद्धिमा
न् तृतीयश्चार्जवस्तेच तपसा शंसितव्रताः वीतरागा महातेजाः संहिताज्ञानपारगाः इत्येते बहृचा
प्रोक्ताः संहिता यैः प्रवर्तिताः वैशंपायन गोत्रो सौ यजुर्वेदं व्यकल्पयत् षडशीतिस्तु येनोक्ताः संहिता
यजुषां शुभाः शिष्येभ्यः प्रददौ तान्श्च जगृहु ते विधानतः एकस्तत्र परित्यक्तो याज्ञवल्क्यो महातपाः
षडशीतिस्तु तस्यापि संहितानां विकल्पकाः सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्तिताः त्रिधा नेदास्तु ते प्रो
क्ता मेदे स्मिन्नवमे शुभे उदीच्या मध्यदेशाश्च प्राच्याश्चैव पृथग्विधाः श्यामायनि उदीचीनां प्रधानः संब
भूव ह मध्यदेशप्रतिष्ठानामारुणिः प्रथमः स्मृतः आलंबिरादिः प्राच्यानां त्रयो दश पादयस्तु ते इत्येते

चरकाप्रोक्तां संहितां वादिनो द्विजाः ऋषयस्तद्वचः श्रुत्वा सर्वे तं जिह्मा सचोऽब्रुवन् चरकाध्वर्यवः केन का
रणेनाब्रूहि तत्त्वतः किं वृथैक स्तेहतोऽस्य भरकत्वं च मेजिरे इत्युक्ते प्राह तेषां स चरकत्वमनूयथा सूतउ
वाच कार्यमासीदृषीणां च किंचिद्ब्राह्मणसत्तमाः मेरुपृष्ठे समासाद्य तैस्तदा निश्चितं मिथः यो नो च सप्त
रात्रेण नागच्छेद्द्विजसत्तमाः स कुर्याद्ब्रह्महत्यां वै समयो नः प्रकीर्तितः ततस्ते सगणाः सर्वे वैशम्पायन
वर्जिताः प्रययुः सप्तरात्रेण यत्र संधिकृतोऽभवत् ब्राह्मणानां तु वचनाद्ब्रह्मवध्यां चकार सः शिष्या
न्यस्य समानीय स वैशम्पायनोऽब्रवीत् ब्रह्मवध्यं च सर्वं च मे धं वेम कृते द्विजसत्तमाः सर्वे यूयं समागम्य ब्रू
ताम तद्धितं वच याज्ञवल्क्य अहमेवैकं चरिष्यामि निष्कृतं तु मुनयस्त्विमे बलं चौजस्याप यिष्यामि न पसाश्वे
नभावितः एवमुक्तस्ततः क्रुद्धो याज्ञवल्क्यमथाब्रवीत् उवाच यत्त्वयाधीतं सर्वं प्रत्यर्पयस्व मे एवमुक्तः
सरूपाणि यजूंषि प्रददौ गुरोः रुधिरेण तथाक्तानि छर्दयित्वा ब्रह्मवित्तमः ततः संध्यानमास्थाय सूर्य
माराधयद्द्विजः सूर्यब्रह्म यदु क्षिप्तं नभं गत्वा प्रतितिष्ठति ततो यानि गतान्यूर्ध्वं यजूंष्यादित्यमंडलं ता
नि तस्मै ददौ तुष्टः सूर्यो वै ब्रह्मरातये अश्वरूपाय मार्तंडो याज्ञवल्क्याय धीमते यजूंष्यधीयते यानि

ब्राह्मणायेनकेनच अश्वरूपायदत्तानिततस्तेवाजिनोभवन् ब्रह्महत्यानुचैर्येस्तीर्णाचरणाच्चरकास्तुताः
वैशंपायनशिष्यास्तेकल्प्रवैकल्पधारिणः माध्यंदिनश्चशाखीयोविदग्धश्चाप्युद्दलः ताम्रायण
श्चवात्स्यश्चतथागालवशैशिरी आटवीचतथापर्णीवीरणीसपरायणः इत्येतेवाजिनप्रोक्तादशपंचच
संमताः शतमेकाधिकंकृत्स्नंयजुर्षांयेविकल्पकाः पुत्रमध्यापयामाससुमंतुमथजैमिनिः सुमंतुश्चा
पिसुत्वानंपुत्रमध्यापयत्प्रभुः ससहस्त्रमधीत्याशुसुकर्माप्यथसंहिताः प्रोवाचाथसहस्रस्यसुकर्मा
सूर्यवर्चसः अनध्यायेष्वधीयानांस्तानजघ्नेशतक्रतुः प्रायोपवेशमकरोत्ततोसौशिष्यकार
णात् क्रुद्धंदृष्ट्वाततःशक्रोवरमस्मैददौपुनः भविनौतेमहावीर्यौशिष्यावनलवर्चसौ अधीयानौ
महाप्राज्ञौसहस्रसंहिताविभौ एतेसुरामसहाभागमन्युद्धाद्विजसत्तमाः इत्युक्त्वावसवःश्रीमान्पौष्यंजि
द्विजसत्तम; हिरण्यनाभिःकौशिल्याद्वितीयोभून्नराधिपः अध्यापयत्तयोःपौष्यंजिःसहस्रार्द्धंतुसंहिताः
तेनाम्नोदीच्यसामानःशिष्याःपौष्यंजिनःशुभाः शतानिपंचकौशल्यसंहितानांचवीर्यवान् शि
ष्याहिरण्यनाभस्यस्मृतास्तेप्राच्यसामगाः लोकाक्षिःकुथुमिश्चैवकुशीतिर्लांगलिस्तथा पौष्यंजि

शिष्याश्चत्वारः तेषांभेदान्निबोधत नारायणपूनीयः सहितंडिपुत्रः तस्मादन्योमूलचारीसवीद्वान्
सकैतिपुत्रः महसात्यपुत्रपतात्तेदानविन्नलोकानुहिरण्यसु त्रयस्तकुथुमेपुत्रा औरसःसामप
परासरः भागवित्तिश्चतेजस्वीत्रिविधाकुथुमास्मृताः शौरीद्यशृंगिपुत्रस्तद्वावेतौचरितव्रतौ
नारायणीनीयसौमित्रिः समावेदविशारदौ प्रोवाचसहिनातिस्रः शृंगीपुत्रोमहातपाः चै
लप्राचीनयोगाश्च सुरालश्चद्विजोत्तमाः प्रोवाचसंहिताषट्तुपाराशर्यस्तुकौथुमः आसु
रायणवैशाख्यौवेदवृद्धपरायणौ प्राचीनयोगपुत्रश्चबुद्धिमांश्चपतंजलिः कौथुमस्यतु
भेदास्युःपाराशर्यस्यषट्स्मृताः लांगलिश्शालिगोत्रस्तुषट्प्रोवाचसंहिता भालुकिःकामहा
निश्चजैमिनिलोमगायनिः कंडुश्चकोहलश्चैवषडेतेलांगलास्मृताः एतेलांगलिनःशिष्या
संहितायैप्रसाधिता ततोहिरण्यनाभस्यकृतशिष्योनृपात्मजः सोकरोच्चचतुर्विंशात्संहि
ताद्विपदांवरः प्रोवाचचैवशिष्येभ्योयेभ्यस्तांश्चनिबोधत राडश्चमहावीर्यश्चपंचमोवाहनस्त
लस्था तलकःपांडकश्चैवकालिकोराजिकस्तथा गौतमश्चाजवस्तश्चसोमराजायनस्तथा

दृढव्यः परिशेषश्च नलस्थलकश्च वच यवीयसश्च वैशालोऽङ्गुलीयश्च कौशिकः सालिमंजु
रिसत्यश्च कापीयकानिकश्च यः पराशरस्तु धर्मात्मा इत्येतास्तु सामगाः सामगानां तु श्रेष्ठौ
द्वौ श्रेष्ठौ द्वौ तु प्रकीर्त्तितौ पौष्यंजिश्च कृतिश्चैव संहितानां विकल्पकौ । अथर्वाणं द्विधा कृत्वा
सुमन्तुरददाद् द्विजाः कबन्धाय गुरुः कृत्स्नं मे च विद्यायथाक्रमं कबन्धस्तु द्विधा कृत्वा पथ्याय
कं पुनर्ददौ द्वितीयं वेदस्पर्शाय स च तद्वा करोत्पुनः मोदो ब्रह्मबलश्चैव पिप्पलादस्तथैव च
शौकायनिश्च धर्मज्ञश्चतुर्थस्तपनस्तथा वेदस्पर्शस्य चत्वारः शिष्यास्त्वेते दृढव्रताः पुन
श्च त्रिविधं विद्धि पथ्यानां भेदमुत्तमे जाजलिः कुमुदादिश्च तृतीयः शौनकस्तथा शौनकस्तु द्वि
धा कृत्वा ददावेकं तु बभ्रवे द्वितीयां संहितां धीमान्सैंधवायनसंज्ञिने सैंधवो मुंजकेशाय भिन्ना
द्वास्या द्विधा पुनः नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः चतुर्थो गिरसंकल्पः शान्तिकल्प
श्च पंचमः श्रेष्ठास्त्वाथर्वणो ह्येते संहितानां विकल्पकाः । षट्शः कृत्वा मयाप्युक्तं पुराणं मुनि
सत्तमाः आत्रेयस्सुमतिर्धीमान्काश्यपो ह्यकृतव्रणः भारद्वाजोऽग्निवर्चाश्च वसिष्ठो मित्रयुश्च यः

सावर्णिसोमदत्तिस्तु सुशर्मा शांशपायनः एते शिष्या मम ब्रह्मन्पुराणेषु दृढव्रताः त्रिभिस्त्रिस्तः कृता
स्तिस्रः संहितापुनरेव हि काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनिः मामिका च चतुर्थी स्यात्सा
चैषा पूर्वसंहिता सर्वास्ता हि चतुष्पादाः सर्वाश्चैकार्थवाचिकाः पाठांतरे पृथग्भूता देवशाखा
यथा तथा चतुःसाहस्रिकाः सर्वाः शांशपायनिकामृते लोमहर्षणिका मूला ततः काश्यपिका
परा सावर्णिकास्तृतीयास्ता ऋज्वाक्यार्थपंडिताः शांशपायनिकान्यान्नोदनार्थविभूषिताः
सहस्राणि ऋचामष्टौ षट्शतानि तथैव च एतापंचदशान्याश्च दशान्या दशभिस्तथा वालिखि
ल्याः सहप्रैषाः ससावर्णाः प्रकीर्त्तिताः अष्टौ साम सहस्राणि सामानि च चतुर्दश आरण्यकं सहो
मं च एतद्गायंति सामगाः द्वादशैव सहस्राणि कंदस्त्वाध्वर्यवं स्मृतं यजुषां ब्राह्मणानां च तथा व्या
सोऽव्यकल्पयत् सग्राण्यारण्यकं तस्मात्समंत्रकरणं तथा अतः परं कथानां तु सर्वा इति विशे
षणं ग्राम्यारण्यं समंत्रं च ऋग्ब्राह्मणयजुःस्मृता तथा हारिद्रवीयाणं खिलान्युपखिला
नि च तथैव तैत्तिरीयाणां परक्षुद्रा इति स्मृतं द्वे सहस्रे शतान्यूने वेदे वाजसनेयके ऋग्गणः

परिसंख्यातो ब्राह्मणं न चतुर्गुणं अष्टौ सहस्राणि शतानि चाष्टौ अशीतिस्त्वन्यधिकश्च पादः ए
तत्प्रमाणं यजुषामृचां च सशुक्रियं साखिलं याज्ञवल्क्यं तथा चरणविद्यानां प्रमाणे साहिमाप्र
णउद्धृत्य साहस्रमृचामुक्तः मंत्रः षड्विंशतिः पुनः एतावदधिकं मे ज्ञायतः कामं विवक्षति एको
दश सहस्राणि दशाचान्यादशोत्तरो ऋचां दश सहस्राणि अशीतिस्त्रिंशतानि च सहस्रमेकं
मंत्राणि ऋचामुक्तं प्रमाणतः एतावद्ग्रन्थिस्तारमन्यच्चार्थिकं बहु ज्ञवामथर्वणं पंचसह
स्राणीति निश्चयः सहस्रमन्यद्विज्ञेयमृषिभिर्विंशतिं विना एतदांगिरसां प्रोक्तं तेषां मारणएव।
कं पुनः इति संख्याप्रसंख्याता शाखाभेदास्तथैव च कर्त्तारश्चैव शाखानां भेदहेतुस्तथैव च
सर्वमन्वंतरेष्वेकं शाखाभेदाः समास्मृताः प्राजापत्याः श्रुतिर्नित्यां तद्विकल्पास्त्विमे स्मृता श्रु
तिनित्यभावादेवानां मुत्रोत्पत्तिः पुनरमन्वंतराणां ज्ञीयते स्मराणां नाम निश्चयः द्वापरेषु पुनर्भे
दास्त्विमे कृताः श्रुतीनां परिकीर्त्तिताः एवं वेदं तदा न्यस्य भगवानृषिसत्तमः शिष्येभ्यश्च पु
नर्दत्वा तपस्तप्तं गतो वनं तस्य शिष्यप्रशिष्यैस्तु शाखाभेदास्त्विमे कृताः अंगानि वेदाश्चत्वा

रो मीमांसान्यायविस्तरः धर्मशास्त्रं पुराणं च विद्यास्त्वेताश्चतुर्दश आयुर्वेदो धनुर्वेदो गांध
र्वश्चैव ते त्रयः अर्थशास्त्रं चतुर्थं तु विद्यास्त्वष्टादशैव तु ज्ञेया देवर्षयः पूर्वं तेभ्यो ब्रह्मर्षयः पुनः
राजर्षयः पुनस्तेभ्य ऋषिप्रकृतयस्त्रयः तेभ्य ऋषिप्रकृतयो मुनिभिः शंसितव्रतैः कश्यपेषु वसि
ष्ठेषु तथा भृग्वंगिरोत्रिषु पंचस्वेतेषु जायंते गोत्रेषु च ब्रह्मवादिनः यस्माद्दृष्टंति ब्रह्मणं तेना
ब्रह्मर्षयस्स्मृताः धर्मस्याथ पुलस्त्यस्य क्रतोस्य पुलहस्य च प्रत्यूषस्य प्रभासस्य कश्यपस्य पुनस्तथा
पुनः देवर्षयस्स्मृतास्तेषां नाम तस्मान्निबोधत देवर्षी धर्मपुत्रौ तु नरनारायणावुभौ वालिखि
ल्याः क्रतोः पुत्राः कर्दमः पुलहस्य तु कुबेरश्चैव पौलस्त्य प्रत्यूषस्याचलस्स्मृतः पर्वतो नारद
श्चैव कश्यपस्यात्मजावुभौ ऋषंति देवान्यस्मात्तेतस्माद्देवर्षयस्स्मृताः मानवे चैव वंशे पै
ड वंशे च ये नृपाः ऐडा ऐक्ष्वाक नाभागा ज्ञेया राजर्षयस्तु ते ऋषंति रंजनाद्यस्मात्प्रजा राजर्षय
स्ततः ब्रह्मलोकप्रतिष्ठास्तु स्मृता ब्रह्मर्षयोमलाः देवलोकप्रतिष्ठाश्च ज्ञेया देवर्षयः शुभाः
इंद्रलोकप्रतिष्ठास्तु सर्वे राजर्षयोमलाः अभिजात्याच तपसा मंत्रव्याहरणैस्तथा एवं ब्रह्मर्षि

यः प्रोक्ता दिव्या राजर्षयस्तु ये दिवर्षयस्तथान्ये च तेषां वक्ष्यामि लक्षणं ॥ भूतभव्यभवज्ञानं सत्याभिव्या
हृतं तथा संबुद्धास्तु स्वयं ये तु संबुद्धा ये च वै स्वयं तपसेह प्रसिद्धा ये गर्भे येश्च प्रणोदिता मंत्रव्याहारिणो
ये च ऐश्वर्यात्सर्वगाश्च ये षट्कर्माभिरता नित्यं शालीना गृहमेधिनः एताञ्ज्ञात्वानधीयानाये तद्
षयो मताः सभेते सप्तभिश्चैव गुणैः सप्तर्षयस्तताः दीर्घायुषो मंत्रकृत ईश्वरा दीर्घचक्षुषः बुद्धा
प्रत्यक्षधर्माणो गोत्रप्रवर्त्तकाश्च ये तस्मात्व्यवहरंति सप्त ऋषींस्तु ते कर्मस्थितभिः अग्राम्यैर्वर्त्तयंति स्म
मैश्चैव स्वयंकृतैः ऋद्धिंविनाऽरुह्यिमं तो वाह्य नरनिवासिनः कृतादिषु युगाख्येषु सर्वास्वेय पुनः पुनः
वर्णाश्रमव्यवस्थानं क्रियंते प्रथमं तु वै प्राप्ते त्रेतायुगमुखे पुनः सप्तर्षयस्त्विह प्रवर्त्तयंति ये वर्ण नाश्र
मांश्चैव सर्वशः तेषामेवान्वये वीरा उत्पद्यते पुनः पुनः जायमाने पिता पुत्रे पुत्रः पितरि चैव हि प
वं समनुत्याविच्छेदं वर्त्तयंत्यायुगात्स्वयात् अष्टाशीति सहस्राणि प्रोक्तानि गृहमेधिनां अर्यम्णो दक्षि
णायेन तु पितृयाणं समाश्रिताः दाराग्निहोत्रिणस्ते वै ये प्रजाहेतवः स्मृताः गृहमेधिनां संख्येयाः स्मशा
नान्याश्रयंति ते अष्टाशीति सहस्राणि निहितां उत्तरायणे ये श्रूयंते दिवं प्राप्ता ऋषयो ऊर्ध्वरेतसः

मंत्रब्राह्मणकर्त्तारोजायंतीहयुगेयुगे एवमावर्त्तमानास्तेद्वापरेषुपुनःपुनः २ वेदव्यासोस्तानीतेस्मिभवि
ताश्चमहातपाः भविष्यंतिभविष्येषुशाखाप्रणयनानितु कल्पानांभाष्यविद्यानांनानाशास्त्रकृत
स्तथैव क्रियंतेतैर्विवरणं ४------ भविष्ये द्वापरेचैवद्रौणिर्द्वैपायनः पुनः तस्मैतद्ब्रह्मणाद्ब्रह्मन
यमासाद्याप्रमव्ययं तपसाकर्मणाब्रह्मंकर्मणावापितेजसः पुनश्चतेजसामस्यसत्येनांभोभिरव्ययं प्राप्त
ब्रह्माप्यतंपुरुषंब्रह्मैवामृतमुच्यते एवमेकाक्षरमिदंस्वात्मन्येवव्यवस्थितं बृहत्वाद्बृंहणाच्चैव तद्ब्र
ह्मेत्यभिधीयते प्रणवावस्थितंभूयोभूर्भुवस्वरितिस्मृतं ऋग्यजुःसामाथर्वाणि यत्तस्मैब्रह्मणेनमः
जगत्प्रथयपरं मत्वाज्ञंजगत्संमोहनालयं संप्रकाशप्रवृत्तिभ्यांपुरुषार्थप्रयोजनं सांख्यज्ञानवतांनिष्ठा
तिः संवादमात्मनः यत्तदव्यक्तममृतंप्रकृतिर्ब्रह्मशाश्वतं प्रधानमात्मयोनिश्चगुहासत्वंवशिष्य
ते ऽविभागस्तथाशुक्रमक्षरंबहुधात्मकं परमब्रह्मणेतस्मैनित्यमेवनमोनमः कृतेपुनः क्रियानां
लिङ्गंतपवाकृतक्रिया महदेवकृतंसर्वं यद्वैलोकेकृताकृतं ज्ञानंवाचैक्यंतंवापितथैवामाध साधुना
ज्ञातव्यंचाप्यमतंव्यस्तंह्यभोज्यमेवच ह्रस्वंचाप्यन्तंचाव्यत्तानुज्ञातव्यंवाप्यकिंचनः दर्शितं।

यन्न दर्शितवानेष कल्पदृष्टं महर्हति सर्वाणि सर्वं सर्वाश्च भावानेव सोऽब्रवीत् यद्यत्क्रियते येन तत्तदा ता।
स्तोभि मन्यते मयेदं क्रियते पूर्वं तदन्ये न विभाविनं यदा तु क्रियते किंचित्केनचिद्वा ऽत्र यं क्वचित्
तैनेव वक्तव्यं तत्पूर्वं कदाचित् प्रतिभाति वै विस्मृतं चापि रसं च ज्ञानाज्ञाने प्रियाप्रिये धर्माधर्मौ सुखं दुःखं ममैक
स्मामृतमेव च ऊर्ध्वं तिर्यगधोभागास्तस्यैवाहं हि कारिणः स्वायंभुवेऽन्तरे पूर्वं ब्रह्मणः परमेष्ठिनः प्रत्येक
विधं भवति त्रेतायां हे पुनः पुनः आस्यंते सैकविधं तद्द्वापरे पुनः पुनः ब्राह्मणैश्चैव गदितास्मि वै
वस्वन्तरे आवर्तमानं तस्मिन्युगाख्या सु पुनः पुनः अस्मिन् हे सैकविधं तद्द्वापरे पुनः पुनः ऊर्ध्वं वि
संहिता सेवते जायमाना परस्परं अष्टाशीतिसहस्राणि ऋषीणां कृतानि वै तापस संहितास्तास्त्वाव
र्तंते पुनः पुनः स्थिता दक्षिणपंथानं ये श्मशानानि भेजिरे युगे युगे तु ताः शाखा व्यस्यन्ते तैः पुनः पु
नः द्वापरे द्वापरे सर्वे पुनः संहितास्तु ऋषिभिः तेषां गोत्रेष्विमा शाखा भवन्तीह पुनः पुनः ताः शा
खास्तत्र कर्तारो भवंतीह युगक्षयात् एवमेव तु विज्ञेयं व्यतीतानागतेष्विह मन्वंतरेषु सर्वेषु शाखा
प्रणयनानि वै अतीतेष्वतीतानि वर्तन्ते सांप्रतेषु च भविष्याणि च यानि स्युः वर्ण्यंते नागतेष्वपि ह

वैराणपश्चिमेऽन्वेयं वर्त्तमानं च चोभवे एतेनक्रमयोगेन मन्वंतरविनिश्चयः एवं देवाश्च पितरऋषयो म
नवश्चये मंत्रैः सहेन्द्रगणकेति हावर्त्तंते च तेः सह जनलोकात्सरान्सर्वेयस्तु कल्यान्तु नः पुनः एयो स
कालसंक्षये संभूतानि ये च सत्तु अवश्यं भाविनार्थेषु संबंधं तेन तदा त्विते ततस्तेदोषवतम्मपश्यंतो रा
गद्वेषकं निवृत्तेन तदावृत्ति लेषां सादोषदर्शनात् एवं देवयुगानीह दशाकृत्वा निवर्त्तंते जनलोकाद्
योलोकं गच्छन्तो हानिवर्त्तनं एवं देवयुगानीह व्यतीतानि सहस्रशः निधनं ब्रह्मलोके वै गतानि मुनिभि
सह नशक्यमानुपूर्व्येण तेषां वक्तुमविस्तरात् अनादित्वाच्च कालस्य असंख्यानाच्च सर्वशः मन्वंतरा
णि तीतानि यानि कल्पैः पुरा सह पितृभिर्मुनिभिर्देवैः सार्द्धं सप्तर्षिभिश्च वै कालेन कालेन च प्रसंख्या
नां युगानां च निवर्त्तनं एतेन क्रमयोगेन कल्पमन्वंतराणि तु सप्रजानि व्यतीतानि शतशोऽथ सहस्रशः
मन्वंतरान्ते संहारः संहारान्ते च संभवः देवतानामृषीणां च मनोः पितृणां स्य च नशक्यमानुपूर्व्येण व
क्तुं वर्षशतैरपि विस्तरस्तु निसर्गस्य संहारस्य च सर्वशः मन्वंतरस्य च संख्यातु आमिषेएणनिबोध
त देवतानां ऋषीणां च संख्यानार्थं विशारदैः त्रिंशत्कोट्यस्तु संपूर्णाः संख्याताः संख्यया द्विजः सप्त

सप्तषष्टिस्तथान्यानि नियुतानि च संख्यया विंशतिश्च सहस्राणि कालोयं साधिकं विना मन्वंतरस्य संख्यैषा
मानुषेण प्रकीर्तिता वत्सरेणैव दिव्येन प्रवक्ष्याम्यंतरं मनोः अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतो
द्वापंचाशत्तथान्यानि सहस्राण्यधिकानि तु चतुर्दशगुणो ह्येष कालश्चाहूतसंप्लवः पूर्णं युगसहस्रा
न्तद्दह्नं ब्रह्मणः स्मृतं तत्र सर्वाणि भूतानि दग्धान्यादित्यरश्मिभिः ब्रह्माणमग्रतः कृत्वा सह देवर्षिदानु
वैः प्रविशंति सुरश्रेष्ठं देवदेवं महेश्वरं स सृष्टा सर्वभूतानि कल्पादिषु पुनः पुनः इत्येष स्थितिकालो
वै मनोर्देवर्षिभिः सह सर्वमन्वंतराणां वै प्रतिसंधिं निबोधत युगाख्यायासमुहिह्यशोगोवास्मिन्नायान्
या कृतत्रेतादिसंयुक्तं चतुर्युगमिति स्मृतं तदेकसप्ततियुगं परिवृत्तं तु साधिकं मनोरंतरमधीकारं।
प्रोवाच भगवान्प्रभुः एवं मन्वंतराणां तु सर्वेषामेव लक्षणं अतीतानागतानां वै वर्तमानेन कीर्तितं
इत्येष कीर्तितः सर्गो मनोः स्वायंभुवस्य ह प्रतिसंधिं तु वक्ष्यामि तस्यैवापरस्य तु मन्वंतरस्य पास्तु वै
महर्षिभिर्देवतैः सह अवश्यं भाविनार्थेन तत्पातद्दैनिवर्तते अस्मिन्मन्वंतरे पूर्वं त्रैलोक्यस्येश्वरास्तु ये स
सप्तर्षयस्तु देवाश्च पितरो मनवस्तथा मन्वंतरस्य काले तु संपूर्णे साधकास्तथा हीनाधिकारा संवृत्ता।
बुध्वा पर्यायमात्मनः महर्लोकाय ते सर्वे उन्मुखा दधिरे गतिं ततो मन्वंतरे तस्मिन्प्रक्षीणा देवतास्तु
ताः

संपूर्णे स्थितिकाले तु तिष्ठंत्येकं कृतं युगं उत्पद्यंते भविष्याश्च यावन्मन्वंतरेश्वराः देवताः पितरः
श्चैव ऋषयो मनुरेव च मन्वंतरे तु संहारे संध्यायां त्वेककलौ युगे संपन्ने कृतं ते तु काले शिष्टास्तु वै तदा
यथा कृतस्य संतानः कलिपूर्वस्य तौ बुधैः तथा मन्वंतरांतेषु आद्यमन्वंतरस्य च क्षीणे मन्वं
तरे पूर्वे प्रवृत्ते चापरे पुनः संध्यैककृतयुगस्यादावतेभ्यः सिष्टास्तु ये तदा सप्तर्षयो मनुश्चैव कालावे
क्षास्तु ये स्थिताः मन्वंतरप्रतीक्षंते क्षिपयंते तपसि स्थिताः मन्वंतरव्यवस्थार्थं च सर्वशः पूर्ववार्थसिंतत्य
संप्रवर्तंते प्रवृत्ते वृष्टिसर्जने द्वंद्वेषु संप्रवृत्तेषु उत्पन्नास्वोषधीषु च प्रजासु च निकेतासु संस्थि
तासु क्वचित्क्वचित् वार्तायां तु प्रवृत्तायां सधर्मे त्वाश्रमिभाविते निरानंदो गते लोके नष्टे स्थावरजं
गमे अग्रामनगरे चैव वर्णाश्रमविवर्जिते पूर्वमन्वंतरे शिष्टा ये भवंतीह धार्मिकाः सप्तर्षयो म
नुश्चैव संतानार्थं व्यवस्थिताः प्रजार्थं तपतां तेषां तपः परमदुश्चरं उत्पद्यंतीह सर्वेषां निधनेष्वि
ह सर्वशः देवासुराः पितृगणा मनयो मानवास्तथा सर्पा भूताः पिशाचाश्च गंधर्वा यक्षराक्षसा
व्येलाश्चाचये शिष्टाः शिष्टाचारान्प्रचक्षते सप्तर्षयो मनुश्चैव ह्यादौ मन्वंतरस्य ह प्रारंभंते च वै

मणिमनुष्या देवैस्सह मन्वंतरादौ प्रागेव त्रेतायुगमुखे ततः पूर्वं देवास्तत्र वै स्थिते धर्मे तु सर्वे
शः ऋषीणां ब्रह्मचर्येण गत्वानृण्यं तु वै तदा पितॄणां प्रजया चैव देवानामीज्यया तथा शतं वर्ष
सहस्राणि धर्मे वर्णात्मके स्थिताः त्रयीवार्त्तादंडनीतिधर्मान्वर्णाश्रमांस्तथा स्थापयित्वाश्रमा
श्चैव स्वर्गाय ददिरे मतिः पूर्वं देवेषु तेष्वेवं स्वर्गाय प्रस्थितेषु च पूर्वं देवास्यतत्त्वैवस्थिता धर्मे
ण कृत्स्नशः मन्वंतरे परावृत्ते स्थानान्युत्सृज्य सर्वशः महः स्म होहं गताः किंतिमहर्लोकमनाम
यं विनिवृत्तविकारास्ते मानसीं सिद्धिमास्थिताः स्वेवेक्षमाणा वशिनस्तिष्ठंत्याभूतसंप्लवं त
तस्तेषु व्यतीतेषु सर्वेषु सर्वदेवेतेषु सर्वेद शून्येषु देवस्थानेषु त्रैलोक्ये तेषु सर्वशः उपस्थिता
इहैवान्ये देवा ये स्वर्गवासिनः ततस्ते तपसा युक्ता स्थानान्यापूरयंति वै सत्येन ब्रह्मचर्येण श्रुते
न च समन्विताः सप्तर्षीणां मनोश्चैव देवानां पितृभिः सह निधनानि ह पूर्वेषां मादिना च भविष्य
ता तेषामन्यंतविकृदद्दह मन्वंतरक्षया पूर्वं पूर्वानुपूर्वेण स्थितिरेषा न वस्थिता मन्वंतरे
षु सर्वेषु यावदाहूतसंप्लवं एवं मन्वंतराणां तु प्रतिसंधानलक्षणं अतीतानागतानां तु प्रोक्तं

स्वायंभुवेनतु मन्वंतरेष्वतीतेषुभविष्याणांतुसाधनं एवमत्यंतविच्छिन्नंभवनाद्भूतसंस्रवात् मन्वं
तराणांपरिवर्त्तनानिएकांतनस्थानिमहत्कृतानि महज्जनंचैवजनंतपश्चएकांतस्थानिस्वभवेत्तिस
त्ये तद्भाविनांतत्रतद्दर्शनेननानाचदृष्टेनचप्रत्ययेन सत्येस्थितानिस्थानदातुनाभिप्रागेविका
रेप्रतिसर्गकाले मन्वंतराणांपरिवर्त्तनानिमुचंतिमत्यंतदनंतोपरांते ततोपियोगाद्भिमप्रमा
णविशंतिनारायणमेवदेवं मन्वंतराणांपरिवर्त्तनेषुचिरप्रवृत्तेषुविधिस्वभावात् क्षणंरमंतिह्य
तिजीवलोकःक्षयोदयाभ्यांपरिवर्तमानः इत्येतदेतमृषिभिस्तुतानांधर्मात्मनांदिव्यदृशांमनूनां
वायुप्रणीतानन्यपलभ्यहृद्यंविप्रोजसांव्याससमाससंयोगः सर्वाणिराजर्षिसुरर्षिमेतिब्रह्मर्षिदे
वासुराणांमंतिचैव देवेशासमर्षिपितृप्रजेशैर्युक्तानिसम्यक्परिवर्त्तितानि उदारवंशाभिजनप्रणी
तीनांप्रकृष्टमेधासमेधितानां कीर्त्तिफलितख्यातिभिरन्वितानांगुणैपहिविख्यापनमीश्वराणां स्व
र्गीनमेतत्परमंपवित्रंपुत्रीयमेतत्त्वपरंरहस्यं जप्यंमहत्पर्वसुचैतदग्र्यंदुःस्वप्नशांतिःपरमायुषे
च प्रजेशदेवर्षिमनुप्रधानांगुणप्रवृत्तिंप्रतितामजस्य ममापिविख्यापनमस्यमायस्मिंश्रुष्ट

समहेश्वरात्मकं॥ इति श्रीवायुप्रोक्ते प्रतिपत्तिवंशानुवर्णनं समाप्तं ॥ शांशपायन क्रमं मन्वंतराणां तु
श्रोतुमिततत्वतः देवतानां च सर्वेषां ये च यस्यांतरे मनोः सूत उवाच मन्वंतराणि यानि स्फसीता॥
नागतानि च समासाद्विस्तराच्चैव ब्रुवतो वै निबोधत स्वायंभुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा॥
उत्तमस्तामसश्चैव चारैवतचाक्षुषो षडेते मनवोतीता राकाम्यश्चावनागतान् सावर्णाः पंच रौ॥
च्यश्च भौत्यौ वैवस्वतस्तथा वक्ष्याम्येतान्पुरस्तात्तु मनोर्वैवस्वतस्य ह मनवः पंच ये तेनी नामानवा
लांन्निबोधत मन्वंतरं मया ~ यक्रांतं स्वायंभुवस्य ह अत ऊर्द्धं प्रवक्ष्यामि मनोः स्वारोचिषस्य ह प्र
जासर्गं समासेन द्वितीयस्य महात्मनः आसन्वै तुषिता देवा मनोः स्वारोचिषेंतरे पारावताश्च विहं
लोद्वा वेव तुषुणोस्मृतौ तुषितायां समुत्पन्नाः क्रतोः पुत्राः स्वरोचिषः पारावताश्च शिष्टाश्च द्वा
दशैतौ गणौ स्मृतौ कैदजाश्च चतुर्विंशद्देवास्तेवै तदा स्मृताः वैधस्य प्रोच्य वामान्या गोपादेवा
यतस्तथा अजश्च भगवान्देवो दुरोणश्च महाबलः आपश्चापि महावाहुर्महौजाश्चापि वीर्यवा
विकित्वान्निनतोयश्च अंशो यश्चैव पठ्यते अजश्च द्वादशास्तेषां तुषिताः परिकीर्त्तिताः इत्येतके

त्तुपुत्रास्तुतदासन्सोमपायिनः प्रचेतास्त्रिवयोदेवो विश्वेदेवास्तथैवच संमजोविक्रांतायश्चाग्नि
जिह्व श्चारिमर्दनः अजिह्मानमहीयानोविद्यामंतोतथैवच अजोघोचमहाभागोयवीयश्चम
हाबलः होतायज्वाचइत्येतेपदक्रांतायरावताः इत्येतादेवतास्तासन्मनोः स्वारोचिषेंतरेसो
मपास्तुतदाह्येतास्त्रतुर्विंशातिदेवताः तेषामिंद्रस्तदाह्यासीद्विधश्चलोकविश्रुतः ऊर्जोवसि
ष्ठपुत्रस्तुस्तंभः काश्यपएवच भार्गवश्चवदाद्रोणऋषभोंगिरसस्तथा पौलस्त्यश्चैवदत्तात्रि
त्रेयोनिश्चलस्तथा पौलस्त्यश्चयथावास्तु एतत्सप्तर्षयस्मृताः चैत्रःकविकृतश्चैवकृतांतोवि
श्रुतोरविः बृहद्गुहोनवश्चैववस्वभाश्चैतेनवस्मृताः मनोस्वारोचिषस्यैतपुत्रवंशकरास्मृताः पु
राणेचपरिख्यातोद्वितीयंचैतदंतरं सप्तर्षयोमनुर्देवापितरश्चचतुष्टयं मूलंमन्वंतरस्यैतेतेषां
चैवांतरेप्रजाः ऋषीणांदेवताःपुत्राःपितरोदेवसूनवः ऋषयोदेवपुत्राश्चइतिशास्त्रविनिश्च
यः मनोस्तत्रैविशाश्चैवसप्तर्षिभ्योद्विजातयः एतन्मन्वंतरंप्रोक्तंसमासान्नतुविस्तरात् स्वाय
भुवेनविस्तारोज्ञेयः स्वारोचिषस्यतु नशक्यविस्तरस्तस्यवक्तुंवर्षशतैरपि पुनरुक्तंवहुत्वाच्च

प्रजानांवैकुलेकुले तृतीयस्त्वथपर्याय उत्तमस्यांतरेमनोः पंचदेवगणाप्रोक्तास्तान्वक्ष्यामि
निबोधत सुधामानस्तथादेवास्तथैवचान्येवशवर्त्तिन प्रतर्द्दनाशिवासत्यागणाद्वादशैवस्मृताः स
त्योधृतिर्मदोदांतक्षमक्षामोधृतिःशुचिः इषोर्जश्चतथाश्रेष्ठसुवर्णश्चैवद्वादशः इत्येतेनामभिः
प्रोक्तासुधामानस्तुद्वादशः सहस्रधारोविश्वात्माशतधारोबृहद्वसुः विश्वधाविश्वकर्माचमनस्वा
नोविराड्नशः ज्योतिश्चैवविभासश्चकीर्त्तिमान्वशवर्त्तिनः अन्यानाराधितोदेशोवसुधिष्ण्योविव
स्वसुः दिनक्रतुःसधर्माचधृतवर्मायशस्विजाः कौलमाश्चैवइत्येतेकीर्त्तितास्तुप्रतर्द्दनाः हंस
न स्वरोवैहाहीचप्रर्द्दनव्यशाश्वारो सुदानोवसुदानश्चसमंजसविषावुभौ यत्नवाहयतिश्चैवसुवितं
मुनयस्तथा शिवाह्येतेतुविज्ञेयाविज्ञेयाद्वादशापराः सत्यानामपिनामानिनिबोधतयथामतो
दिक्पतिर्वाक्पतिश्चैवविश्वशंभुस्तथैवच स्वमडीकोधिपश्चैववर्चोधामुहास्तर्वशः राघश्चैव
सदाश्वश्चहेमानंदोनथैवच सत्याह्येतेपरिक्रांतायज्ञियाद्वादशापराः इत्येतादेवताह्यासन्नौ
त्तमस्यांतरेमनो अजश्चपरशुश्चैवदिव्योदिव्यौषधिर्नयः देवानुजश्चाप्रतिमोमहोत्साहोशिजस्त

पा विनितिश्च सुकेतुश्च सुमित्रः सुबलः शुचिः उत्तमस्य मनोः पुत्रास्त्रयोदश महात्मनः एते क्षत्रप्र
णेतारस्तृतीयं चैतदन्तरं उत्तमे परिसंख्यातः सर्गः स्वारोचिषस्य च विस्तरेणानुपूर्व्यां च तामसस्यान्तरं नि
बोधत चतुर्थे त्वथ पर्याये तामसस्यान्तरे मनोः गणास्त्वेतेषां देवानामेकैकः पञ्चविंशकः इंद्रिया
णीशानं यद्धि मनवः प्रतिजानते सत्यश्चाणास्तु शीर्षेणापातमश्चैवाश्रमस्तथा इंद्रियाणि नदा देवा मनो
स्तस्यान्तरे स्मृताः तेषां च प्रभुर्देवानां शिबिरिन्द्रः प्रतापवान् सप्तर्षयोऽन्तरे चैव तान्निबोधत सत्तमाः का
व्योहर्षस्तथा चैव काश्यपः पृथुरेव च आत्रेयश्चाग्निरित्येवं ज्योतिर्धामा च भार्गवः पौलस्त्यो वनपीठ
श्च गोत्रवासिष्ठ एव च चैत्रस्तथा पिपीलस्तामसेऽन्तरे ख्यवं घडस्तथा शान्ति नरस्त्यातिर्भयस्तथा प्रियभृ
त्यो हावर्त्तिश्च द्विष्ठुलोठधरे ह्रुधृत कृतश्चकृतबंधुश्च तामसस्य मनोः सुताः पंचमे त्वथ पर्याये मनोश्चा
रिष्णवेऽन्तरे गणास्तु ये समाख्याता देवानां च निबोधत अमिताभा भूतरजा वैकुंठः सुमेधसः चरिष्णोस्तु
शुभा पुत्रा वसिष्ठस्य प्रजापतेः चतुर्दश च चत्वारो गणास्ते संतभास्वराः स्वमविप्राग्निधामसश्च सत्यमि
त्रामनस्तथा स्वमतिर्वाविरावश्च वाचिनो दश्चवास्तथा प्रतिरासी च वादश्च शान्तश्चेति चतुर्दशः

ग्रमिताभास्तताह्येतेदेवाश्चारोचिषेंतरे मतिश्चसुमतिश्चैवज्ञानसत्योतथैवच ग्रकृतिविकृतिश्चैवमहो
विनयएवच जेताजिष्णुसहस्रश्चैवकृतिमान्स्ववसस्तथा इमेतानिहतामानिस्वाभूतरजसाविदुः वृषभे
ताजयोभीमस्तुच्छिदंनीयशोदमः नाचोविश्वानजेयश्चकृत्रागोरोधवसस्तथा कीर्तिनास्तुविजयोवसु
मेधातुनिवाधत मेधामेधातिथिश्चैवसत्यमेधास्तथैवच प्रश्निमेधान्यमेधाचभूयोमेधादयःप्रभुः दी
प्तिमेधायशोमेधास्थिरमेधातथैवच समेधाश्चमेधाश्चप्रतिमेधाश्चयस्मृतः मेधावान्मेधहर्ताचकीर्ति
नास्तुसमेधसः विभुरिंद्रस्तदातेषामासीद्विक्रांतपौरुषः पौलस्त्योवरवाकुश्चयजुर्नामाचकाश्यपः
हिरण्यरोमांगिरसोवेदश्रीश्चैवभार्गवः उर्ध्ववाकुश्चवासिष्ठःपर्जन्यःपौलहस्तथा सत्यनेत्रस्तथात्रेयास्त
षयोरैवतांतरे महाप्रुराणसंभाव्यप्रत्यंगपरहाशुचिः वलधुनिरामित्रकेतुश्भोगदृढव्रतः चरिस्नवश्च
पुत्रास्लेपंचमंचेतदंतरं स्वारोचिषोत्तमश्चैवतामसोरैवतस्तथा प्रियव्रतान्वयाह्येतेचत्वारोमन
वस्तथा षष्ठेमन्वन्तरपर्यायेदेवायेचषष्टंतरे ग्राद्याप्रसूताभाव्याश्चपृथुकाश्चदिवौकसः म
हानुभावालेखाश्चपंचदेवगणास्मृताः दिवौकसमरीपथप्राच्यतेमातनामभिः ग्रत्रेःपुत्रस्यनमा

र: स्वारोचिषस्य प्रजापतेः गणाश्च तेषां देवानामेकैको ह्यष्टकः स्मृतः अंतरिक्षोवसहयो अग्निश्चिकित्वान्प्रियव्र
तः श्रोतामंतास्तु मंतावश्चा याह्येते प्रकीर्तिताः श्येनभद्रास्तयस्तः पथ्योनेत्रे महायशाः सुमनाश्चसुचे
तास्त्वैवतश्चप्रचेतसः घृतिश्चैव महाससत्वप्रभूताः परिकीर्तिताः निजयः स्वजयश्चैव मनस्योनोतथै
वच सुमतिस्सपरिश्चैव विज्ञातोर्यपतिस्त्वयः भवाह्येते स्मृता देवा ह्यष्टकाः स्तु निबोधत ऊतनिहुशक्त
नोदेवोवानष्टहस्तथैवच शाकरसत्ययिस्तश्च विलश्च विजयस्तथा अजितश्च महाभागा प्रष्टकाः।
सेदिवौकसः लेखांस्तथा प्रवक्ष्यामि ब्रुवतो मे निबोधत मनोजवश्च धामस्तु प्रवेतास्तु महायशाः
ध्रुवोध्रुवक्षितिश्चैव अच्युतश्चैव वीर्यवान् अवनो बृहस्पतिश्चैव बृहविष्णात्रिगिरः स्मृतः सुधामाक
पयपश्चैव वसिष्ठोविरजस्तथा अभिमानश्चपालस्य सहिस्सुपोलहस्तथा मधुराश्चेयइत्येतेस
मवैचाक्षुषेंतरे ऊरुः पुरुः शतद्युस्तस्य यस्वीमत्यवाक्कृतिः अग्निष्टुदतिरात्रश्च सुद्युम्नश्चा।
तिनेनव अभिमन्युश्च दशमोनाड्वलेयामनोः सुताः चाक्षुषस्यसुता ह्येते पृष्ठेचैवतदन्तरे वै
वस्वतेनसख्यातस्तस्य सर्गो महात्मनः विस्तरेणानुपूर्वाच कथितं वैमयाद्विजाः॥ अथषष्ठत्तु

चाक्षुषस्य सुदायादः संभूतः कश्यपान्वये तस्मान्ववायेप्यन्ये तं नो ब्रूहि यथातथ्यातथ्यं सूत उ
चाक्षुषस्य निसर्गं तु समासात्कुत्तमर्हसि तस्मान्ववाये संभूतः प्रपुर्वैन्य प्रतापवान् प्रजानायत
यश्चान्ये दक्षः प्राचेतसस्तथा उत्तानपादं जग्राह पुत्रमत्रिः प्रजापतिः दत्तकस्य तु पुत्रो स्य राजा
ह्यासीत्प्रजापतेः स्वायंभुवेन मनुना दत्तो त्रेः कारणं प्रति मन्वंतरमथास्याद्य भविष्यं चाक्षुषस्य
ह प्रसंगं तदनुवक्ष्यामि उपोद्घातेन वै द्विजाः उत्तानपादाच्चतुरः सूनृताधत्त भामिनी धर्मस्य कन्याथ
मेत्तास्तू नृता नाम विश्रुता उत्पन्ना वधिधर्मेण ध्रुवस्य जननी शुभा धर्मस्यापत्य लक्ष्म्यां वै उत्पन्ना सा
शुचिस्मिता ध्रुवं च कीर्तिमंतं च अयस्मंतं वसुं तथा उत्तानपादो जनयत्कन्ये द्वे च शुचिस्मिते स्वरा मन
स्वती चैव तयोः पुत्राः प्रकीर्तिताः ध्रुवो वर्षसहस्राणि त्रीणि दिव्यानि वीर्यवान् तपस्तेपे निराहारः प्रार्थ
यन्विपुलं यशः त्रेतायुगे तु प्रथमे पौत्रः स्वायंभुवस्य सः आत्मानं धारयन्योगात् प्रार्थयन्सुमहद्यशः
तस्मै ब्रह्मा ददौ प्रीतो ज्योतिषां स्थानमुत्तमं आभूतसंप्लवं दृश्यं मस्तादयविवर्जितं तस्यातिमात्रामृद्धिं
च महिमानं निरीक्ष्य ते देवासुराणामाचार्यः श्लोकमप्युशना जगौ अहो स्य तपसो वीर्यमहो श्रुतमहो

ब्र.पु.
२१६

द्रुतं सिनीवासमर्घ्ययः कृत्वा यदेन सुपरिश्रवं ध्रुवो दिव्यं समासन्नमीश्वरस्य दिवस्पतिः ध्रुवात्प्रशिष्टिं
वधान्यं च भुमसैोसुबुवेनृपौ छायाकायामारवेपुष्टिर्भवनारीनुताविभुः सत्याभिव्याहृतेनस
मयस्त्री साभवत्तदा दिव्यं सहननाकायादेव्या भरणभूषिता कायायां पुष्टिराधत्त पंचपुत्रान
कल्मषान् प्राचीनगर्भं वृषभं वृकंच वृकलंधृतिं पत्नी प्राचीनगर्भस्य सुवर्चा सुबुवेनृपं नाम्नो
दारधियं पुत्रमिंद्रोयः पूर्वजन्मनि संवत्सरसहस्रांते सकृदाहारमाहरन् एवमन्वंतरपुत्रमिंद्र
त्वं प्राप्तवान्विभुः उदारधेः स्ततं भद्रा जनयन्मादि वंजयं रिपुंरिपुंजयंजज्ञे वरांगी सा ¯ वंजयं
रिपोराधत्त वृहती चाक्षुषं सर्वतेजसं तस्य पुत्रो मनधीमान्ब्रह्मन्सत्रप्रवर्त्तकः व्यजीजनत्पुष्करि
णीवीरणी चाक्षुषं मनुं प्रजा, पतेस्तुतायां वै वीरणस्य महात्मनः चाक्षुषनाम विख्यातं मनुर्ध
मार्थकोविदं मनोरजायंत दश नड्वलायां सुता शुभा कन्यायां वै महाभागा विरजस्य प्रजापतेः
ऊरुः पुरुः शतद्युम्नस्तपस्वी सत्यवान्कृतिः अग्निष्टुदतिरात्रश्च सुद्युम्नश्चेति ते नव अभिम।
न्युश्च दशमो नड्वलायां मनोः सुताः ऊरोरजनयत्पुत्रान्षडाग्नेयी महाप्रभाः अंगं सुमनसं स्वा।

राम.
२१६

त्तिकृतं तमं जितमोजितं सुनीथ्या मार्त्तवीर्न्वंगाद्देनमेकं व्यजायत अथ चारेणवेनस्य प्रकोपः समहा
नभूत् प्रजार्थमृषयस्तस्य ममन्थुर्दक्षिणं करं वेनस्य पाणौ मथिते संबभूव महान्नृपः जनयित्वा सुतं
तस्य श्रुत्वा प्रथितपौरुषं अथ पूर्वं स्वयमेव राजन्मुनयो मुदिताः प्रजाः सधन्वी कवची जातः तेजसा
ज्वलन्निव पृथुर्वैन्यः स वै लोकान् ररक्ष क्षत्रपूर्वजः राजसूयाभिषिक्तानामाद्यः स वसुधाधिपः त
स्य स्तवार्थमुत्पन्नौ निपुणौ सूतमागधौ तेनेयं गौर्महाराज दुग्धा सस्यानि धीमता प्रजानां वृ
त्तिकामानां देवैर्ऋषिगणैः सह पितृभिर्दानवैश्चैव गन्धर्वैरप्सरोगणैः सर्पैः पुण्यजनैश्चैव वीरुद्भिः
पर्वतैस्तथा तेषु तेषु तथा पात्रेषु दुह्यमाना वसुंधरा प्रदाद्यथेप्सितं क्षीरं तेन लोकान् स धारयत् ऋ
षय ऊचुः॥ विस्तरेण पृथोर्जन्म कीर्त्तयस्व महामते यथा महात्मना दुग्धा पूर्वं तेन वसुंधरा यथा देवैश्च
नागैश्च यथा ब्रह्मर्षिभिः सह यथा यक्षैः सगन्धर्वैरप्सरोभिर्यथासुरैः यथा यथा येन दुग्धा विधिना
येन येन च तेषां पात्रविशेषांश्च दोग्धा वत्सौ क्षीरमेव च तथा वत्सविशेषांश्च तन्नः प्रब्रूहि पृच्छतां।
यस्मिंश्च कारणे पाणिर्वेनस्य मथितः पुरा क्रुद्धैर्महर्षिभिः सर्वं तत्सर्वं कथयस्व नः सूत उवाच वत्स।

यिच्छामि भूविप्राश्रयो वैन्यस्य संभवं एकाग्राः प्रयताश्चैव शृणुध्वं द्विजोत्तमाः नाशुचेर्नापि पापाय
नाशिष्याय हिताय च वर्त्तयेयमिमं पुण्यं नाव्रतायकृतघ्नने स्वर्ग्यं यशस्यमायुष्यं धन्यं वेदैश्च
संमतं रहस्यं ऋषिभिः प्रोक्तं शृणुयाद्योनसूयकः यश्चेमं श्रावयेन्मर्त्यः पृथोर्वैन्यस्य संभवं ब्रा
ह्मणेभ्यो नमस्कृत्य न स शोचेत्कृताकृते गोप्ता धर्मस्य राजा स नभूदत्रिसमः प्रभुः अत्रिवंश
समुत्पन्नो ह्यङ्गो नाम प्रजापतिः यस्य पुत्रोऽभवद्वेनो नात्यर्थं धार्मिकस्तथा जातो मृत्युसुतायां
वै सुनीथायां प्रजापतिः स मातामहदोषेण वेनः कालात्मजात्मजः स धर्मं पृष्ठतः कृत्वा कामाल्लो
भेष्ववर्तत स्थापनां स्थापयामास धर्मापेतां स पार्थिवः वेदशास्त्राण्यतिक्रम्य स धर्मे निरतोऽभ
वत् न स्वाध्यायवषट्काराः प्रजास्तस्मिन् प्रशासति आसन्नेव प्रवृत्तः सोमं स्तुतं यज्ञेषु देवता नय
पुर्यं न दातव्यं न दातव्यमिति तस्य प्रजापतेः आसीत् प्रतिज्ञा क्रूरेयं विनाशे प्रत्युपस्थिते अहमीज्य
श्च यष्टा च यज्ञश्च सर्वयज्ञैर्द्विजातिभिः मयि यज्ञो विधातव्यो मयि होतव्यमित्यपि तमतिक्रम्य मर्यादामा
ददानं स्वसांप्रतं ऊचुर्महर्षयः सर्वे मरीचिकस्यायास्तथा वयं दीक्षां प्रवेक्ष्याव संवत्सरशतान्वहू
न्

माधर्म्मंवेदमाकार्षीर्नैषधर्म्मः सनातनः निधनेत्रप्रसूतोसिप्रजापतिरसंशयः पालयिष्येप्रजा।
श्चेतित्वयापूर्वंप्रतिश्रुतं तांस्तथावादिनः सर्वान्ब्रह्मर्षीनब्रवीत्तदा वेनः प्रहस्य दुर्बुद्धिरिदमर्थ
नकोविदः स्रष्टाधर्मस्यकस्यान्यःश्रोतव्यंकस्यवैमया वीर्यश्रुततपःसत्यैर्मयावाकःसमोभुवि म
द्यात्मानोमन्तूनंमांन्नयेजानीततत्वतः प्रभवंसर्वलोकानांधर्म्माणांचविशेषतः इच्छन्दहेयंपृथि
वींप्लावयेयंजलेनवा सृजेयवाग्रसेयंवानात्रकार्याविचारणा यदानशक्यतेस्तंभोमानाच्चवै
ष्टामोहितः अनुनेतुंनृपोवेनस्ततःक्रुद्धामहर्षयः निगृह्यतंमहाबाहुं विस्फुरंतंयथानलं
ततोस्यवामहस्तंतेममंथुर्भृशकोपिताः तस्मात्तुमथ्यमानाद्वैजज्ञेपूर्वमभिश्रुतिः ह्रस्वोतिमात्र
पुरुषःकृष्णश्चापितथाद्विजाः सभीतःप्रांजलिश्चैवस्थितवान्व्याकुलेंद्रियः तमार्त्तंविह्वलंदृष्ट्वानि
षीदेत्यब्रुवन्किल निषादवंशकर्तासौबभूवाततविक्रमः धीवरानसृजद्यापिनेककलाश्चवसंभवान्
न्ममंथुर्ज्जातमव्ययः पृथुस्तस्मात्समुत्पन्नःकरात्सालनतेजसः पृथोःकरतलाद्वापियस्माज्जातःप्र
थुस्ततः दीप्यमानस्ववपुषासाक्षादग्निरिवज्वलन् आद्यमाजगवंनामधनुर्गृह्यमहारवं शरांश्च

ब्र॰पु॰
२१८

निबद्धांगदं कवचं च महाप्रभं तस्मिन्जातेथ भूतानि संप्रहृष्टानि सर्वशः समापेतुर्महाराज वेनस्य
त्रिदिवंगतः समुत्पन्नेन राजर्षिः सत्पुत्रेण धीमता त्रातः स पुरुषव्याघ्रः पुन्नाम्नो नरकात्तदा तं च
समुद्राश्च रत्नान्यादाय सर्वशः अभिषेकाय तोयं च सर्वे पवितुमास्थिरे पितामहश्च भगवान्
देवैरांगिरसैः सहामरैः स्थावराणि च भूतानि जंगमानि च सर्वशः समागम्य तदा वैन्यमभ्यषिंचन्
नराधिप महता राजराजेन महाराजं महाद्युतिं सोभिषिक्तो महाराजो देवैरंगिरसः सुतैः आदिरा
जो महाराज पृथुर्वैन्यः प्रतापवान् पित्रापरंजिता यस्य प्रजास्तेनानुरंजिताः ततो राजेति नामास्य
अनुरागादजायत आपः संस्तंभिरे चास्य समुद्रमभियास्यतः पर्वताश्च ददुर्मार्गं ध्वजसंगश्च नाभ
वत् अकृष्टपच्या पृथिवी सिद्ध्यन्त्यन्नानि चिंतया सर्वकामदुघा गावः पुटके पुटके मधु एतस्मिन्नेव
काले तु यज्ञे तस्य स्वे महे सोमे सुत्ये समुत्पन्नः सूतः सौम्ये तदाहवि तस्मिन्नेव समुत्पन्ने पुनर्ज
ज्ञे तु मागधः सोमगे भुन्तमायस्तु क्रमांडे वृद्धे देविके समागते समुत्पन्नस्तस्मान्मागध उच्यते ऐं
द्रेण हविषा चापि हविस्पृक्तं बृहस्पतेः जुहावैन्द्राय देवेन ततः सूतो व्यजायत प्रमादस्तत्र संजज्ञे

राम॰
२१८

प्रायश्चित्तं च कर्मेदं शिष्यहव्येन यत्कृतं अभिभूतं गुरोर्हविः अधरोत्तरचारेण जज्ञे तद्वर्णवैकृ-
तं यच्च क्षत्रात्समभवद्ब्राह्मण्यां हीनयोनितः सूतः पूर्वेण साधर्म्यात्तुल्यधर्मः प्रकीर्तितः मध्यमो
ह्येष सूतस्य धर्मः क्षत्रोपजीवनं रथनागाश्वचरितं जघन्यं च चिकित्सितं पृथोस्तवार्थं तौ तत्र समा-
हूतौ महर्षिभिः तावूचुर्ऋषयः सर्वे स्तूयतामेष पार्थिवः कर्मैतदनुरूपं च पात्रं चायं नराधिपः
तावूचतुस्तदा सर्वांस्तानृषीन्सूतमागधौ आवां देवानृषींश्चैव प्रीणयावः स्वकर्मभिः न चास्य
कर्म वै विद्म न तथा लक्षणं यशः स्तोत्रं येनास्य कुर्याव राज्ञस्तेजस्विनो द्विजाः ऋषिभिस्तौ नि-
युक्तौ तु भविष्यैः स्तूयतामिति दानधर्मरतो नित्यं सत्यवाक्संयतेन्द्रियः ज्ञानी शीलो वदान्यश्च संग्रा-
मेष्वपलायिनः यानि कर्माणि कृतवान्पृथुः पश्चान्महाबलः तानि शीलेन वद्धानि स्तुवन्ति सूतमा-
गधैः ततस्तदा तेन प्रीतः पृथुः प्रादात्प्रजेश्वरः अनूपदेशं सूताय मगधं मागधाय च तदा वै
पृथिवीपालास्तूयन्ते सूतमागधैः आशीर्वादैः प्रबोध्यन्ते सूतमागधवन्दिभिः तं दृष्ट्वा परमप्रीताः
प्रजा ऊचुर्महर्षयः एष वो वृत्तिदो वैन्यो भविता ते नराधिपः ततो वैन्यं महाभागं प्रजाः समभिदुद्रुवुः

ब्र॰पु॰
२२९

त्वंनोवृत्तिंविधत्स्वेतिमहर्षेर्वचनात्तदा सोभिद्रुतःप्रजाभिस्तुप्रजाहितचिकीर्षया अनुगृहीत्वाबा
णांश्चवसुधामुद्दिश्यवेगितः आशीर्वादभयत्रस्तागौर्भूत्वाप्राद्रवन्मही तांप्रपृथुर्धनुरादायद्रवंतीम
न्वधावत सालोकान्ब्रह्मलोकादीन्गत्वावैन्यभयात्तदा ददर्शाग्रतोवैन्यंकार्मुकोद्यतधारिणं अ
लभंतत्तदात्राणंवैन्यमेवान्वपद्यत कृतांजलिपुटादेवीपूज्यालोकैस्त्रिभिस्तदा उवाचवैन्यंनाध
र्मंस्त्रीवधेपरिपश्यसि कथंधारयितासीत्वंप्रजाराजन्मयाविना मयिलोकास्थिताराजन्मयेदं
धार्यतेजगत् मत्कृतेनविनश्येयुःप्रजापार्थिवसत्तम नमामर्हसिवैहंतुंश्रेयश्चेत्त्वंचिकीर्षसि
प्रजानांपृथिवीपालशृणुचेदंवचोमम उपायतःसमारब्धासर्वेसिध्यंत्युपक्रमाः हत्वापिमांन
शक्तस्त्वंप्रजानांपालनेनृप अन्नभूताभविष्यामिजहिकोपंमहाद्युते अवध्याश्चस्त्रियःप्रा
हुस्तिर्यग्योनिगतेष्वपि क्रोधंनिगृह्यधर्मात्मावसुधामिदमब्रवीत् एकस्यार्थाययोहन्यादात्म
नोवापरस्यवा एकंप्राणिनंवहून्वापिकामंतस्यास्तिपातकं यस्मिंस्तुनिहतेभद्रेएधंतेवहवस्सु
खं तस्मिन्हतेस्तिभद्रेनास्तिपातकंचोपपातकं सोहंप्रजानिमित्तंत्वांवधिष्यामिवसुंधरे यदि

राम॰
२२९

मेवचनंनायकरिष्यसिजगद्धितं त्वांनिहत्यापवाणेनमकामनपराङ्मुखौ आत्मानंप्रथयित्वेह
प्रजाहधारयात्स्वयं सात्वंवचनमास्थायममधर्मभृतांवर मंजीवयप्रजानित्यंशक्ताह्युस्मिनसंशयः
दुहितृत्वंचमेगच्छएवमेतन्महद्वरे नरकेयेत्वधर्मार्थंप्रयुक्तोघोरदर्शनं प्रत्युवाचततोवैन्यमेव
मुक्त्वासतीमही एवमेतदहंराजन्विधास्यामिनसंशयः वत्संतुममतंपश्यक्षरेयंयेनवत्सला
समांचकारुसर्वत्रमाधमभृतांवर यथाविष्यंदमानेमेक्षीरंसर्वत्रभावयेत् ततस्तुत्सारयामासशि
लाजालानिसर्वशः धनुष्कोट्यातदावैन्यस्तेनशैलाविवर्द्धिताः मन्वंतरेष्वतीतेषुविषमासी
द्वसुंधरा स्वभावेनाभवंस्तस्याःसमानिविषमाणिच नहिपूर्वविसर्गेवैविषमेपृथिवीतले प्रविभा
गपुराणांवा ग्रामाणांचापिविद्यते नसस्यानिनगोरक्ष्यानकृषिर्नवणिक्पथः चाक्षुषस्यांतरेपू
र्वमेतदासीत्पुराकिल वैवस्वतेंतरेतस्मिन्सर्वस्यैतस्यसंभवः समत्वंयत्रयत्रासीद्भुवस्तस्मिन्नदे
वहि तत्रतत्रप्रजास्तावैनिवसंतीस्मसर्वदा आहारःफलमूलंतुप्रजानामभवत्किल कृच्छ्रेणैव
तदावासोमित्येवमनुशुश्रुम वैन्यप्रभृतिलोकेस्मिन्सर्वस्यैतस्यसंभवः संकल्पयित्वावत्संतुचा

त्सुघं मनुरीश्वरः प्रभुर्दुदोह सस्यानि स्वतले हि पृथुस्तलः सस्यानि तेन दुग्धानि वैन्येन तु वसुंधरा म
मन्त्रं चैवात्र्वघं कृत्वा वत्सं पात्रे च भूमये तेनान्वेन तदा चैव वर्त्तयंते प्रजा सदा ऋषिभिस्तु यतेवा
पि पुनर्दुग्धा वसुंधरा वत्स सोमस्तु भूते षां दुग्धा चापि बृहस्पतिः पात्रमासीत्तु छंदांसि गाय
त्र्यादीन सर्वशः क्षीरमासीत्तदा तेषां तत्तो ब्रह्म च शाश्वतं पुनस्ततो देवगणैः पुरंदरपुरोगमैः
सौवर्णं पात्रमादाय विदुग्धेयं तदा मही तेषां वा वासवो दीर्घा काडवेयो महौजसः नागानां वै
हि जन्येष्ठ सर्पाणां चैव सर्वशः तेनैव वर्त्तयंत्युग्रा महाकाया विषोल्बणाः तदाहारास्तदाचारा
स्तद्वीर्यास्तदपाश्रयः आमपात्रे पुनर्दुग्धा त्वंतर्धानमियं मही वत्सं वैश्रवणं कृत्वा यक्षैः पुण्य
जनैस्तथा दोग्धा रजतनाभस्तु पिता मणिचरस्य सः यक्षात्मजो महातेजा वशी सुमहाब
लः तेन ते वर्त्तयंती स्म परमर्षिरुवाच ह राक्षसेन्द्रैः पुनर्दुग्धा वसुंधरा ब्रह्मोपेता स्तदामायेनेषां
मासीत्कवेरकः रत्नसमाली बलवान् रुधिरं क्षीरमव च कपालपात्रे तिद्रुग्धा अंतर्धानेन चराक्षसः ते
नेद्भारेणराक्षासि वर्त्तयंतीह सर्वशः पद्मपात्रे पुनर्दुग्धा गंधर्वैरप्सरोगणैः वत्सं चित्ररथं कृत्वा शु

वीनांधारयंत्येवच वत्सस्तुहिमवानासेषांमेरुर्दोग्धामहागिरिः पात्रंतुशैलमेवासीत्तेनशैलाःप्र
तिष्ठिताः तेषांवत्सस्तुरुचिस्त्वासीद्दोग्धापुत्रोमुनीश्चिः गंधर्वराजातिवलोमहात्मासूर्यसन्निभः
पौलेस्त्वंक्रयतेदुग्धापुनर्देवीवसुंधरा तत्रौषधीमूर्तिमतीरत्नानिविविधानिच क्षयनेवृक्ष
वीरुद्भिःपुनर्दुग्धावसुंधरा पलाशपात्रमादायच्छिन्नदग्धापुरोहता शालमधुपपुष्पितःशा
लसत्वोवत्सोपप्लक्षास्विनी सर्वकामदुधादोग्धीप्रथिवीभूतभाविनी सैषाधात्रीचधात्रीचधार
णीचवसुंधरा दुग्धाहितार्थंलोकानांप्रथुनाहतिनःश्रुतं चराचरस्यलोकस्यप्रतिष्ठायो
निरेवच ॥ इतिश्रीवायुप्रोक्तेपुराणेपृथिवीदोहनंनाम ॥ सूतउवाच आसीदियंसमुद्रांता
मेदिनीतिपरीश्रुता वसुधारमतेयस्माद्वसुधानेनचोच्यते मधुकैटभयोःपूर्वमेदसासंपरि
प्लुता ततोभ्युपगमाद्ब्रह्मन्पृथोर्वैन्यस्यधीमतः इयंचासीत्समुद्रांतामेदिनीतिपरिश्रुता
दुहितृत्वमनुप्रामाप्रथिवीत्युच्यतेततः प्रथिताप्रथिवीनर्माशोभिताचवसुंधरा सस्या
करवतीरत्नायतनाकरमालिनी चातुर्वर्ण्यसमाकीर्णरक्षितातेनधीमता एवंप्रभावोराजा
सीद्वै

नः सत्वपसतम: नमस्कार्यश्च वरुणश्च भूतग्रामेण सर्वशः ब्राह्मणैश्च महाभागैर्वेदवेदांगपारगैः प्र
थुरेव नमस्कार्यो ब्रह्मयोनिः सनातनः पार्थिवैश्च महाभागैः प्रार्थयद्भिर्महद्यशः आदिराजान
मस्कार्यः पृथुर्वैन्यः प्रतापवान् योधैरपि च संग्रामे प्रार्थयानैर्जयं युधि आदिकर्त्ता नराणां वै न
मस्यः पृथुरेव हि यो हि योद्धा रणं याति कीर्तयित्वा पृथुं नृपं स घोररूपान् संग्रामान् क्षेमी तरति की
र्तिमान् वैश्यैरपि च राजर्षिर्वैश्यवृत्तिसमास्थितैः पृथुरेव नमस्कार्यो वृत्तिदाता महायशाः
एते वत्सविशेषाश्च दोग्धारः क्षीरमेव च पात्राणि च मयोक्तानि सर्वाण्येव यथाक्रमं ब्रह्मणा प्रथमं
दुग्धा पुरा पृथ्वी महात्मना वायुं कृत्वा तदा वत्सं बीजानि वसुधातले ततः स्वायंभुवे पूर्वं तदा म
न्वंतरे पुनः वत्सं स्वायंभुवं कृत्वा दुग्धाग्नीध्रेण वै मही मनौ स्वारोचिषे दुग्धा मही चैत्रेण धीमता म
नुं स्वारोचिषं कृत्वा वत्सं सस्यानि वै पुरा उत्तमे त्वंतरे चापि दुग्धा देवभुजेन तु मनुं कृत्वोत्तमं वत्सं
सर्वसस्यानि धीमता पुनश्च पंचमे पृथ्वी तामसस्यांतरे मनोः दुग्धेयं तामसं वत्सं कृत्वा तु बल
बंधुना चारिष्णवस्य देवस्य संप्राप्ते चांतरे मनोः दुग्धा मही पुराणेन वत्सं चारिष्णवं प्रति चाक्षु

येषिंच संशामेतदा मंन्वंतरेषु नः दुग्धा मही पुराणोव वत्सं कृत्वा च चाक्षुषं चाक्षुषस्यांतरे तीते प्राप्ते
चैवस्वते पुनः वैन्येनेयं मही दुग्धा यथा ते कीर्त्तितं मया एतैर्दुग्धा पुरा पृथ्वी व्यतीतेष्वंतरेषु वै देवा
दिभिर्मनुष्यैश्च तथा भूतादिभिस्तथा एवं सर्वेषु विज्ञेया स्वनीतानागतेष्विह देवा मन्वंतरे यथा
पृथोस्तु च्छ्वागत प्रजाः पृथोस्तु पुत्रौ विक्रांतौ जज्ञाते तेंतविपायेनौ शिखंडिनी हविर्धानमंतर्धाना
द्व्यजायत हविर्धानात्षडाग्नेयी धिषणाजनयत्सुतान् प्राचीनबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ ॥
प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः बलश्रुततपोवीर्यैः पृथिव्यामेकराडसौ प्राचीनाग्राः कु
शास्तस्य तस्मात्प्राचीनब- सौ समुद्रतनयायां तु कृतदारः स वै प्रभुः सहवसमसः पारेसवर्णा
यां प्रजापतिः सवर्णादित्तसा मुद्रीदश प्राचीनबर्हिषः सर्वान्प्रचेतसो नाम धनुर्वेदस्य पारगान् अ
पृथक्धर्मचरणास्तेतप्यंत महत्तपः दशवर्षसहस्राणि समुद्रसलिलेशयाः तपश्चरत्सु महते
दुःखितः चचार पृथिवीं चैव मार्गमाणस्ततस्ततः अथापश्यत्तु तां राजा कुरुक्षेत्रे महाबलः प्ल
क्षतीर्थे पुष्करिण्यां गाहावां तु नाकुनां क्रीडंतीमप्सरोभिश्च पंचभिः सह शोभनां अपश्यत्तां
ततस्तं भूपराजानं विदूरतः उर्वशी तां सखीः प्राह अयं स पुरुषोत्तमः यस्मिन्नहमवात्सीति

श्रा॰
पु॰ १९६

दर्शयामासतंनग्नं ततस्त्राविर्बभूवुस्तापंचंचूराप्सरसस्तथा दृष्ट्वानुराजानंप्रीतः प्रलापान्कृ
त्वेबहून् क्वायाहितिष्ठमनसाघोरेवचसितिष्ठहे एवमादीनिसूक्तानिपरस्परमभाषत
उर्वशीत्वब्रवीच्चैनंसगर्भाहंतवेशुभो संवत्सरात्कुमारस्तेभविताननवसंशयः निशामेकांतु
वैराजाथ्रवसत्तुतयासह संप्रहृष्टोजगामाथस्वपुरंतुमहायशाः गतेसंवत्सरेराजाउर्वशीं
पुनरागमत् उषित्वाचतयासार्द्धमेकांरात्रिंमहामना कामार्त्तस्ताब्रवीद्दीनोभवतिस्त्वममे
तिवै उर्वश्यथाब्रवीचैनंगंधर्वास्तेवरंददुः तंवृणीष्वमहाराजब्रूहिचैनांस्त्वमेवहि वृणोमि
त्वांहिमांल्लोकंगंधर्वाणांमहात्मना तथेत्युक्त्वावरंवव्रेगंधर्वाःस्वनयात्विति स्थालीमग्नेः स्व
यित्वागंधर्वास्त्वनमब्रुवन् अनेनइष्ट्वालोकांनप्राप्स्यसित्वंनराधिप इष्ट्वायज्ञैर्बहुविधैः
तस्मैपांसलोकतो वासवायसगंधर्वाश्चायसमहारथः एकोग्निःपूर्वमासीद्धोपडस्त्रीस्तान्व
कल्पयत् एवंप्रभावोराजासीदैडस्तुद्विजसत्तमाः देशेपुण्येतमेचेवमहर्षिभिरलंकृते
राज्यंसकारयामासप्रयागेपृथिवीपतिः उत्तरेयामुनेतीरेप्रतिष्ठानेमहायशाः तस्यपुत्रा

एवः
पु १९६

वभूवुर्हि षडिंद्रोपमतेजसः गंधर्वलोके विदिताश्चायुर्द्धीमानमावसुः विश्वायुश्च शतायु
श्च गतायुश्चौर्वशीसुताः अमावसोस्तु वै जातो भीमो राजाथ विश्वजित् श्रीमान् भीमस्य
दायादो राजासीत्कांचनप्रभः विद्वांस्तु कांचनस्यापि सुहोत्रोभून्महावलः सुहोत्रस्याभ
वज्जन्हुः केशिन्या गर्भसंभवः आजुहाव ततो गंगा वितते यज्ञकर्मणि साप्लावयामास ततो देवा
भाविनार्थस्य दर्शनात् गंगयाप्लावितं दृष्ट्वा यज्ञवाटं समंततः सौहोत्रिर्व्रवीद् ःजन्हुर्गं
गां संरक्तलोचनः अस्य गंगेवलेपस्य सद्यः फलमवाप्नुहि एष ते विफलं सर्वं पिवन्नंभः
करोम्यहं राजर्षिणा ततः पीतां गंगां दृष्ट्वा महर्षयः उपनिन्युः महाभागा दुहितृत्वेन जा
न्हवीं यौवनाश्वस्य पुत्रीं तु कावेरीं जन्हुरावहत् युवनाश्वस्य शापेन गंगार्धेन विनिर्गता का
वेरी सरितां श्रेष्ठा जन्हुर्भार्यामनिंदिता जन्हुश्च दयितं पुत्रं सुहोत्रं नाम धार्मिकं कावेर्यां ज
नयामास          अजकस्य तु दायादो वलाकाश्वो महायशाः वभूवुश्चमृगया
शील कुशस्तस्यात्मजस्ततः कुशपुत्रा वभूवुश्च चत्वारो देववर्चसः कुशाश्वः कुशनाभश्च

श्रा·
३२०

अमूर्त्तरयाय यशोवहः कुशिकस्तस्य तस्येये पुत्रार्थी राजसत्तमः पूर्णे वर्षसहस्रे वै शतक्रतुमपश्य
त स उग्रं तपसं दृष्ट्वा सहस्राक्षः पुरंदरः समर्थः पुत्रजनने स्वयमेवास्य शाश्वतः पुत्रत्वं कल्प
यामास स्वयमेव पुरंदरः गाधिर्नामाभवत्पुत्रः कौशिकः पाकशासनः पौरुकुत्स्यभवद्भार्या गा
धिस्तस्यामजायत पूर्वं कन्या महाभागा नाम्ना सत्यवती प्रभा तां गाधिः पुत्रकाव्याय ऋची
काय ददौ प्रभुः तस्याः पुत्रस्तु वै भर्त्ता भार्गवो भृगुनंदनः पुत्रार्थे साधयामास चरुं गाधेस्तथै
व च तस्याश्चाहूय प्राह तत् ऋचिको भार्गवस्तदा उपयोज्य चरुरयं त्वया मात्रा च ते शुभे तस्या
जनिष्यते पुत्रो दीप्तिमान् क्षत्रियर्षभः अजेयः क्षत्रियैर्युद्धे क्षत्रियर्षभसूदनः तवापि
पुत्रं कल्याणि धृतिमंतं तपोधनं शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यते एवमुक्त्वा तु तां भा
र्यां ऋचीको भृगुनंदनः तपस्यभिरतो नित्यमरण्यं प्रविवेश ह गाधिः सदारस्तु तदा ऋचीका
श्रममभ्यगात् तीर्थयात्राप्रसंगेन सुतां द्रष्टुं नरेश्वरः चरुद्वयं गृहीत्वा तु ऋषेः सत्यवती तदा
भर्त्तुर्वचनमव्यग्रा हृष्टा मात्रे न्यवेदयत् माता तु तस्या दैवेन दुहित्रे स्वचरुं ददौ तस्याश्चरुम।

राम·
३२०

ष्याज्ञानादात्मनस्सचकारह अथसत्यवतीगर्भंक्षत्रियांतकरंशुभा धारयामासदीप्तेनवपुषाघोरद
र्शना तमृचीकस्ततोदृष्ट्वायोगेनाभ्यनुमृश्यच तदाब्रवीद्द्विजश्रेष्ठस्वभार्यांवरवर्णिनीं मात्रासि
ध्वंसितताभद्रेचरुविन्यासहेतुना जनिष्यतीहिपुत्रस्तेक्रूरकर्मातिदारुणः भ्राताजनिष्यतेचापि
तस्याभूतंतपोधनं विश्वंहिब्रह्मतपसामयातत्रसमर्पितं एवमुक्तामहाभागाभर्त्रासत्यवतीत
दा प्रसादयामासपतिंसुतोमेदृशोभवत् ब्राह्मणापसदस्त्वत्त इत्युक्तोमुनिरब्रवीत् नैषसंकल्पि
तः कामोमयाभद्रेतथात्वया उग्रकर्माभवेत्पुत्रः पितुर्मातुश्चकारणात् पुनःसत्यवतीवाक्य
मेवमुक्त्वाब्रवीदिदं इच्छन्लोकानपिमुनेसृजेथाः किंपुनःसुतं शमात्मकमृजुंभर्त्तःपुत्रंमे
दातुमर्हसि काममेवंविधःपौत्रोममस्यात्तवद्प्रभो यद्यन्यथानशक्यंवैकर्त्तुमेवंद्विजोत्तमः ग
तः प्रसादमकरोत्सतस्यास्तपसोबलात् पुत्रेनास्तिविशेषोमेपौत्रेवावरवर्णिनि त्वयायथो
क्तंवचनंतथाभद्रेभविष्यति तस्मात्सत्यवतीपुत्रंजनयामासभार्गवं तपस्याभिरतंदांतंजम
दग्निंशमात्मकं भृगोश्चरुविपर्यासेरौद्रवैष्णवयोः पुरा जननाद्वैष्णवस्याग्नेर्जमदग्निरजायत

व्रा॰
३२२

विश्वामित्रंतुदायादंगाधिःकुशिकनंदनः प्राप्यब्रह्मर्षिसमतांजगामब्रह्मणावृतः साहिसत्य
वतीपुण्यासत्यव्रतपरायणा कौशिकीतिसमाख्याताप्रवृत्तेयंमहानदी परिक्रातामहा
भागाकौशिकीसरितांवरा इक्ष्वाकुवंशात्प्रभवस्तुर्नामपार्थिवः तस्यकन्यामहाभागाका
मलीनामरेणुका रेणुकायांतुकामल्यांतपोधृतिसमन्विता आर्चीकोजनयामासजमद
ग्निंसुदारुणं सर्वविद्यांतगंश्रेष्ठंधनुर्वेदस्यपारगं रामंक्षत्रियहंतारंप्रदीप्तमिवपावकं
और्वस्यैवमृचीकस्यसत्यवत्यांमहामनाः जमदग्निस्तपोवीर्याज्जज्ञेब्रह्मविदांवरः म
ध्यमस्तुसुतःशेफशुनश्चककनिष्ठकः विश्वामित्रस्तुधर्मात्मानाम्नाविश्वरथःस्मृतः
जज्ञेभृगुप्रसादेनकौशिकाद्वंशवर्द्धनः विश्वामित्रस्यपुत्रस्तुशुनःशेफोभवन्मुनिः
हरिश्चंद्रस्ययज्ञेतुपशुत्वेनियतः सवै देवैर्दत्तःशुनःशेफोविश्वामित्रायवैपुनः दे
वैर्दत्तःसवैयस्माद्देवरातस्ततोभवत् विश्वामित्रस्यपुत्राणांशुनःशेफोग्रजःस्मृतः म
धुछंदोजयश्चैवकृतदेवोष्टकावाष्टकौ कच्छपःपूरणश्चैवविश्वामित्रसुतास्त्ववै तेषां

राम॰
३२१

श्रेणिर्वक्रुधाकौशिकानांमहात्मनां पार्थिवादेवरातस्ययज्ञवल्क्याःसमर्षणा उदुंबरा
त्रमुम्लानालारेकायनुमुंचना लोहित्यणारेणवश्चैवतथाकारीषवस्मृताः देवलाया
महूताश्चशालंकायनवाष्कलाः ददातिवारदाश्चान्येविश्वामित्रस्यधीमतः ऋष्य
न्तरविवाहास्तेवहवकौशिकास्मृताः देवलायामहूताश्चशालंकायनवाष्कलाः द
दातिवादराश्चान्येविश्वामित्रस्यधीमतः ऋष्यन्तरविवाहास्तेवहवकौशिकास्मृताः
कौशिकासांख्यानाश्चैवतथान्येसैधवायनाः पौरोरवस्यपुण्यस्यब्रह्मर्षेकौशिकस्यवै
विश्वामित्रस्यपुत्राणांशुनःशेफोग्रजस्मृतः हषद्वतीसुतश्चापिविश्वामित्रात्तथाष्ट
कः अष्टकस्यसुतोयोहिग्राकोजह्नुगणेमया ऋषयउक्तुः किलत्वेनधर्मेणतप
सेहश्चतेभवा ब्राह्मण्यमनुप्राप्तंविश्वामित्रादिभिर्नृपे येनयेनाभिधानेनब्राह्मण्यं
क्षत्रियागता विशेषंज्ञातुमिच्छामितपसादानतस्तथा एवमुक्तस्ततोवाक्यमब्रवी

ब्रा॰
३२२

ष्टिदमर्थवत् अन्यायोपगतैर्द्रव्यैराक्रम्य यजतेपि या धर्माभिकांक्षीयजतेनधर्मफलमश्नु
ते धर्मंवैतंसमास्थायपापात्मा पुरुषाधमः ददातिदानंविप्रेभ्योलोकानांदंभकारणात्
जपंकृत्वातथातीव्रंधनलाभान्निरंकुशः रागमोहान्वितोहिंतेपावनार्थंददातियः तेन
दत्तानिदानानि अफलानिभवंत्यफलानस्यधर्मप्रवृत्तस्यहिंसकस्यदुरात्मनः एवंदत्वाधर्म
मोहाद्ददतोयजतश्चह संक्लिष्टकर्मणादानं नतिष्ठतिदुरात्मनः न्यायागतानांद्रव्याणां
तीर्थेसंप्रतिपादनं कामाननतिसंधाययजतेचददातिच सदानफलमाप्नोतितच्चदानं
मुखोदयं दानेनभोगानाप्नोतिस्वर्गंसत्येनगच्छति तपसावसहतेमेनलोकान्विहृतीति।
हृति विद्रुभ्यसतेजस्वीलोकेध्यानेनमश्नुते दानाच्छ्रेयसत्यघृतोयज्ञाच्छ्रेयसत्यात
पः सत्यात्ततपसः श्रेयंतस्माज्ज्ञानंगुरुस्मृतं श्रूयतेवयमः सिद्धास्त्रोमतोद्विजातयः
विश्वामित्रानरपतिमांधातानामकृतिः कपिः कपोतश्चपुरुकुत्सश्चसत्यासत्यागृहेत्वाव्रमुः

रा॰म॰
३२२

आर्ष्टिषेणाजमीढस्य भागान्योन्यस्य चैव च काश्यीवस्यैवानिज - - - - - - - - - तथार
यीतरस्य रुंदस्य विस्य वृद्धादयो नृपाः क्षत्रोपेताः स्मृताः सेव तपसाञ्चर्षितां गताः एते राज
र्षयः सर्वे सिद्धिं समहतीं गताः अत ऊर्ध्वं प्रवक्ष्यामि आयोर्वंशं महात्मनः ॥ इति श्रीमहा
पुराणे वायुप्रोक्ते सोमवंशानुकीर्त्तिनं नाम ॥ सूत उवाच एते पुत्रा महात्मानः पंचैवास
न्महाबलाः स्वर्भानुतनयायान्ते च प्रभायां जज्ञिरे नृपः नहुषः प्रथमस्तेषां पुत्रो धर्मात्ततः सु
तः धर्मवृद्धात्मजश्चैव सुनहोत्रो महायशाः सुनहोत्रस्य दायादास्त्रयः परमधार्मिकाः
काशः शलश्च द्वावेतौ तथा गृत्समदः प्रभुः पुत्रो गृत्समदस्यापि शुनको यस्य शौनकः ब्राह्म
णाः क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च एतस्य वंशे संभूता विचित्रैः कर्मभिर्द्विजाः शला
त्मजो ह्यार्ष्टिषेणश्चरं तस्यात्मजः शौनकश्चार्ष्टिषेणश्च क्षत्रोपेता द्विजातयः काशस्य
काशयो राजा पुत्रो दीर्घतपास्तथा धर्मश्च दीर्घतपसो विद्वान्धन्वंतरिस्ततः तपसोन्ते सुमह
तो जातो वृद्धस्य धीमतः अथैनमृषभं प्रोचुः हतं वा काममिमं पुनः ऋषय ऊचुः कथं धन्व

ब्रा॰
३२२

नतिर्देवो मानुषेष्विह तज्जितवान् पतद्वेदितुमिकामस्ततो ब्रूहि प्रियं तया सूत उवाच धान्वं
तरे संभवोयं श्रूयतामिह वै द्विजाः समं भूतं समुद्रांते मथ्यमाने मृते पुरा उत्पन्नः सकलायु
र्वेदसर्वतत्त्वज्ञः श्रियावृतः स यः संसिद्धिकायं ते दृष्ट्वा विष्णुर्भिनस्थितः अजस्त्वमिति होवाच तस्मा
दब्जस्तु स स्मृतः अब्जः प्रोवाच विष्णुं तं तनयोस्मि तव प्रभो विधत्स्व भागं स्थानं च मम मल्लोके
सुरोत्तमः एवमुक्तः स दृष्ट्वा तु तं प्रोवाच स प्रभुः कृतो यज्ञविभागस्तु यज्ञियैर्हि सुरैस्तथा
वेदेषु विधियुक्तं च विधिहोत्रं महर्षिभिः न शक्यमिह होमो वै तुभ्यं कर्तुं कदाचन: अर्वाक्सु
तोसि हे देवानां मम वामि वै प्रभोः द्वितीयायां तु संभूत्या लोके ख्यातिं गमिष्यति अणिमादि
युता सिद्धिर्गर्भस्थस्य भविष्यति तेनैव च शरीरेण देवत्वं प्राप्स्यसि प्रभो चरुमंत्रैर्व्रतैर्जप्यै
र्यक्ष्यंति त्वां द्विजातयः अथ त्वं पुनरेवाथ आयुर्वेदं विधास्यसि अवश्यं भावि ह्यर्थोयं प्रा
ग्दृष्टस्त्वजयोनिना द्वितीयं द्वापरं प्राप्य भविता त्वं न संशयः तस्मात्त्वं वै वरं दत्वा विष्णुरंत
र्दधे ततः द्वितीये द्वापरे प्राप्ते सौ मानहोत्र प्रकाशिराट् पुत्रकामस्तपस्तेपे नृतो दीर्घतमास्त

राम॰
३२२

या अजदेवंतुष्टस्त्वार्थ्यैहारिराधयिषुर्नृपः वरेणछंदयामासप्रीतोधान्वंतरिंनृपं नृपउ॥
भगवन्यदितुष्टस्त्वंपुत्रोमेधृतिमान्भव तथेतिसमनुज्ञायतत्रैवांतरधीयत तस्यगेहेसमुत्प
न्नोदेवोधान्वंतरिस्तदा काशिराजोमहाराजःसर्वरोगप्रनाशनः आयुर्वेदंभरद्वाजात्प्रकार
सभिषक्क्रियां तमष्टधापुनर्व्यस्यशिष्येभ्यप्रत्यपादयत् धान्वंतरिसुतश्चापिकेतुमानिति
विश्रुतः अथकेतुमतःपुत्रोविभामीमरथोनृपः दिवोदासइतिख्यातोवाराणस्याधिपो
भवत् एतस्मिन्नेवकालेतुपुरींवाराणसींपुरा शून्यांनिवेशयामासक्षेमकोनामराक्षसः श
प्ताहिसापुरीपूर्वंनिकुंभेनमहात्मना शून्यावर्षसहस्रंवैभविष्यतीतिपुनःपुनः तस्यांतुशप्त
मात्रायांदिवोदासःप्रजेश्वरः विषयांतेपुरींरम्यांगोमत्यांसंन्यवेशयत् ऋषयऊचु वाराण
सींकिमर्थंतांनिकुंभःशप्तवान्पुरा निकुंभश्चापिधर्मात्मासिद्धक्षेत्रेशशापयः सूतउ दिवो
दासस्तुराजर्षिर्नगरींप्राप्यपार्थिवः वसतेसमहातेजाःस्फीतायांवैनराधिपः एतस्मिन्नेवका
लेतुकृतदारोमहेश्वरः देव्याःसप्रीयकामस्तुवसानश्वसुरांतिके देवाज्ञयापारिषदाविश्व

ब्रा॰
३२

रूपानपोधनाः शर्वेन्नैरूपविशेषैस्तोषयंतीमहेश्वरं रुष्यतेतेमहादेवोमेनानैवतुरुष्य
ति नगुप्यतेसानित्यंवैदेवीतंनपैवच ममपार्श्वेत्वनाचारस्तवभर्त्तामहेश्वरः दरिद्रस
र्वथैवेहअकृष्ठलडतेनघे माताततथोक्तावचमास्त्रीस्वभावातचाब्रमन् स्मितंकृत्वात्तुवा
ह्राहरपार्श्वमथागमत् विप्रस्ववदनादेवीमहादेवमभाषत नेहवत्स्याम्यहंदेवनयमा
स्वनिवेशनं तथोक्तस्तुमहादेवः सर्वान्लोकानवेक्ष्यह वासार्थंरोचयामासपृथिव्यांतु
द्विजोत्तमाः वाराणसीमहातेजाःसिद्धक्षेत्रंमहेश्वरः दिवोदासेननाक्रांतांतानिविष्टांतम
रीभवः पार्श्वस्थसममाहूयगणेशंक्षेमकंब्रवीत् गणेश्वरपुरींगत्वाशून्यांवाराणसीं।
उरु मृदुनाचाभ्युपायेनत्यतिवीर्यःसपार्थिवः ततोगत्वानिकुंभस्तुपुरींवाराणसींपुरा
स्वप्नेसंदर्शयामाससंकणांनामपार्थिव श्रेयस्तेहंकरिष्यामि स्थानेरोचयानघ मद्
पांप्रतिमांकृत्वानगर्यांतेनिवेशय तथास्वप्नेयथादृष्टं सर्वंकारितवान्द्विजः नगर्या
द्वारियनुज्ञाप्यराजानंतुयथाविधि पूजांतमहतींचैवनित्यमेवप्रयुज्यते गंधैर्धूपैश्चमा

रा॰म॰
३२४

लैश्चश्रेष्ठनागैर्यैर्लक्षैरेवच अन्नप्रदानपुण्यैश्चअत्यद्भुतमिवाभवत् एवंसंपूज्यतेतत्रनित्य
मेवगणेश्वरः ततोवरसहस्राणिनागराणांप्रयच्छति पुत्रान्हिरण्यमायुष्मीस्सर्वकामं
लक्ष्यैवच राजस्तुमहिषीश्रेष्ठा स्वयशानामविश्रुता पुत्रार्थमायतासाधीराज्ञादेवीप्र
चोदिता प्रजातुविपुलाकृत्वादेवीपुनर्याचत पुनः पुनरप्यागम्यवकुश्रापुत्रकारण
त् नप्रयच्छतिपुत्रांस्तुनिर्भकारणेनतु राजायदितन्नदेहेननतः किंचित्प्रवर्ततेअपदी
र्घेणकालेनक्रोधोराजानमाविशत् भूतंत्विदंमहद्वारिनागराणांप्रयच्छतिप्रीत्यावरा
श्चश्चात्रशोनकिंचिन्नःप्रयच्छति मामकैःपूज्यतेनित्यंनगर्यांममचैवतु तेनापितस्यवक्तु।
शोदेव्यामेतत्रकारणात् नददातिचपुत्रंमेकृतघ्नोवकुभोजनः अतोनार्हतिपूजांतुमत्स
काशात्कथंचन तस्मात्तुनाशयिष्यामितस्यस्थानंदुरात्मनः एवंतुसंविनिश्चित्यदुरा
त्माराजकिल्विषी स्थानंगणपतेस्तस्यनाशयामासदुर्मतिः भग्नमायतनंदृष्ट्वाराजान
मगमत्प्रभुः यस्मात्त्वनपराधंमेत्वयास्थानंविनाशितं अकस्मात्तुश्रीसूर्यामचित्री

व्रा°
नु२२१

नत

तेनराधिप सेनत्तुशापेनशून्यावाराणसीतदा शाहाप्तुंरीनिकुंभस्तुमहादेवमथान
यत् शून्यांपुरींमहादेवोनिर्ममेपरमात्मनः रमतेतत्रवैदेवीमेच्यर्यान्सातुविस्मिता देवा
क्रीडार्थमीशानोदेवारएयमथानयत् रमतेतत्रवैदेवीरममाणामहेश्वरी नरतितत्रवै
देवीलब्धेगृहविस्मयात् पुनर्यामीतितांदेवींदेवोवाक्यमथाब्रवीत् नाहंवेश्मविमो
क्ष्यामित्रविमुक्तंहिमेगृहं प्रहस्येनामथोनाममथोवाचत्रविमुक्तंहिमेगृहं नाहंवेश्मा
मिध्यामिशक्त्वेहरमास्यहं तस्मात्तदविमुक्तंहिप्रोक्तंदेवीनवैस्वयं एवमेववाराणसी
शापात्प्रविस्वतेचकीर्तितं यस्मिन्वसतवैदेवःसर्वदेवनमस्कृतः युगोयुत्रिस्तुधर्मात्मास
हदेव्यामहेश्वरः त्रेतद्वानेकलोयातितत्पुरंतुमहात्मनः अंतर्हितेपुरेतस्मिन्पुरीसावस
तेपुनः एववाराणसीशापानिवेशापुनरागता भद्रश्रेण्यस्यपुत्राणांशतंमतमधन्विनां
हत्वानिवेशयामासदिवोदासोनराधिपः भद्रश्रेण्यस्यराज्यंतुहृततेनवलीयसा भद्रश्रे
ण्यस्यपुत्रस्तुदुर्दमोनामनामतः दिवोदासेनवालेतिघृणयासविवर्जितः दिवोदासो

राम°
२२१

नवालेतिघृणयासविवर्जितः दिवोदासाद्दृषद्वत्यांवीरोजज्ञेप्रतर्दनः तेनपुत्रेणवालेन
प्रहृतंतस्यवैपुनः वैरस्यांतंमहाराजतदातेनविधित्सता प्रतर्दनस्यपुत्रौद्वौवत्सोभार्गश्च
विश्रुवः वत्सपुत्रोह्यलर्कस्तुसंनतिस्तस्यचात्मजः अलर्कंप्रतिराजर्षिंश्लोकोगीतोपुरा
तनौ षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच युवारूपेणसंपन्नोह्यलर्कःकाशिसत्तमः
लोपामुद्राप्रसादेनपरमायुरवाप्तवान् शापस्यांतेमहावाहुर्हत्वाक्षेमकराक्षसं रम्या
मावासयामासपुरींवाराणसींनृपः सन्नतेरपिदायादःसुनीथोनामपार्थिवः सुनीथस्य
तुदायादःक्षेमकेतुर्नामधार्मिकः क्षेमकेतुतनयश्चापिधर्मकेतुरितिश्रुतिः धर्मकेतोस्तु
दायादःसत्यकेतुर्महारथः सत्यकेतुसुतश्चापिविभुर्नामप्रजेश्वरः सुविभुस्तुविभोःपु
त्रःसुकुमारस्ततस्ततः सुकुमारस्यपुत्रस्तुधृष्टकेतुःसधार्मिकः धृष्टकेतोस्तुदाया
दोवेणुहोत्रःप्रजेश्वरः वेणुहोत्रसुतश्चापिगार्ग्योवैनामविश्रुतः गार्ग्यस्यगर्गभू
मिस्तुवत्सोवत्सस्यधीमतः ब्राह्मणाःक्षत्रियाश्चैवतनयाःपुत्रास्सधार्मिकाः विक्रान्तावल

ब्रा॰ १२६

वंतश्चासिंहतुल्यपराक्रमाः इत्येतेकाश्यपाःप्रोक्तारजेरपिनिबोधत राजपुत्रशतान्यासन्
पंचवीर्यवतांभुवि राजेयमितिविख्यातंक्षत्रमिंद्रभयावहं तदादेवासुरेयुद्धेसमुत्पन्नेसुदा
रुणे देवाश्चैवासुराश्चैवपितामहमथाब्रुवन् आवयोर्भगवान्युद्धेविजेताकोभविष्यति
ब्रूहिनःसर्वलोकेशश्रोतुमिच्छामहेवयं ब्रह्मोउ येषामर्थायसंग्रामेरजिराजायुधःप्र
ते भुः योत्स्यतेविजेष्यंतेत्रिँल्लोकान्नात्रसंशयः रजिर्यतस्ततोलक्ष्मीर्यतोलक्ष्मीस्ततो
धृतिः यतोधृतिस्ततोधर्मोयतोधर्मस्ततोजयः तेहृष्टादानवाःसर्वेराजानंदेवदानवाः ऊ
चुरस्मज्जयायत्वंगृहाणवरकार्मुकं रजिरुवाच अहंजेष्यामितोयुद्धेदेवान्शक्रपुरो
गमान् इंद्रोभवामिधर्मात्माततोयोत्स्यामिसंयुगे दानवाऊचुः अस्माकमिंद्रःप्रह्लाद
स्तस्यार्थेविजयामहे अस्मिंस्तुसमयेइंद्राजस्त्रिदिवाद्देवनोदितो सत्यमितिब्रुवन्नेवदे
वैरप्यभिचोदितः भविष्यसींद्रोविजित्वात्रिदैवैरपिनिमंत्रितः जघानदानवान्सर्वान्
जहाररजिःप्रभुः ततस्ताराजिंपुत्रैर्दैवैसहशतक्रतुः रजिपुत्रोहमित्युक्त्वापुनरेवकृ

एम॰ १२६

वह्वृचः इन्द्रोसिराजन्देवानांसर्वेषांनात्रसंशयः तस्याहमिंद्रपुत्रस्तेख्यातियास्यामिशत्रुह
सतुशक्रवचश्रुत्वावंचितस्तेनमायया तथेत्येवाब्रवीद्राजाप्रीयमाणःशतक्रतुः तस्मिंस्तु
देवसदृशोदिवंप्राप्तेमहीपतौ दायादमिंद्रादाजह्रुराज्यंतनयारजेः तानिपुत्रशतान्या
स्यतच्चस्थानंशचीपतेः समक्रामंतबहुधास्वर्गलोकंत्रिविष्टपं ततःकालेबहुतिथेस
मतीतेमहाबलः गतराज्योब्रवीच्छक्रोहृतभागोभविष्यति बदरीफलमात्रंवैपुरोडाशं
विधत्स्वमे ब्रह्मर्षेयेनतिष्ठेयंतेजसाप्यायितस्ततः ब्रह्मन्कृशमनायंविमनानष्टराज्योहृ
ताशनः हतौजादुर्बलोमूढोरजिपुत्रैःप्रसीदमे बृहस्पतिरु यद्येवंचोदितःशक्रत्वया
स्यांपूर्वमेवहि नाभविष्यत्त्वत्प्रियार्थमकर्त्तव्यंममानघ प्रयतिष्यामिदेवेंद्रत्वद्धितार्थंम
हाद्युतेः यथाभागंचराज्यंचनचिरात्प्रतिपत्स्यसे तथाशक्रकरिष्यामिमाभूत्तेविक्ल
वंमनः ततःकर्मचकारस्यतेजःसंवर्द्धनंमहत् तेषांचबुद्धिसंमोहमकरोद्बुद्धिसत्तमः ते
यदास्तुसुतानामूढारागान्मत्ताविधर्मिणः ब्रह्मद्विषश्चसंवृत्ताहतवीर्यपराक्रमाः ततो

ब्रा॰
३२०

लेभे सौरैश्वर्यमैंद्रस्थानं तपोत्तमं हत्वा रजिसुतान्सर्वान्कामक्रोधपरायणान् यः इंद्रं पावनं स्थाने प्रतिष्ठापितवान् शतक्रतोः शृणुयाद्वा रजेर्ह्यापि न स दौरात्म्यमाप्नुयात् ॥ इति दिमहापुराणे वायुप्रोक्ते रजिपुत्रनाम ॥ ऋषय ऊचुः मरुत्तेन कथं कन्या रुद्रैर्दत्ता महात्मनो किं वीर्याश्च महात्मानो जाता मरुत्तकन्यया सूत उवाच आहरंत मनुस्सोम मन्नकामः प्रजेश्वरं मासि मासि महातेजा षष्टिं संवत्सरान्नृपः तेन ते मरुतस्तस्य तेन सोमेन तोषिताः अन्नपानाद् ददुः प्रीताः सर्वकामपरिच्छदं अन्नं तस्य मरुत्तस्य महात्मनः न क्षीयते कोटिशो दीयमानं च सूर्यस्योदयनादपि मित्राज्जाते स्तु कन्यायां मरुत्तस्य च धीमतः तस्माज्जाता महासत्वा धर्मज्ञा मोक्षदर्शिनः सन्न्यस्य गृहधर्माणि ---------- यतीधर्ममवाप्य। वै ब्रह्मभूयाय ते गताः अनपत्यो मरुत्तस्तु ततो धर्मस्य वद्धते दृढधर्मस्ततो जातः प्रतिपत्नीमहातपाः प्रतिपन्नस्ततश्चापि संजयो नाम विश्रुतः संजयस्य जयः पुत्रो विजयस्तस्य तु जयः विजयस्य जयः पुत्रस्तस्य हर्यत्ततस्सुतः आदीनस्य जयत्सेनस्तस्य तु

राम॰
३२०

त्रोथसंस्कृतिः संस्कृतेरपिधर्मात्मा क्षत्रधर्मा महायशाः इत्येते क्षत्रधर्मात्मा नहुषस्य।
निबोधत नहुषस्य च दायादाः षडिन्द्रोपमतेजसः उत्पन्नाः पितृकन्यायां विरजायां महौजसः
यतिर्ययातिःसंयातिरायातिःपंचरुद्धवः यतिर्ज्येष्ठस्तु तेषां वै ययातिस्तु ततो वरः काकु
त्स्थकन्यां गां नाम लेभे पत्नीं यतिस्तदा संयाति मोक्षमास्थाय ब्रह्मभूतोभवन्मुनिः ते
षां जिघाय पंचानां ययातिः पृथिवीपतिः देवयानीमुशनसस्सुतां भार्यामवाप सः शर्मि
ष्ठामासुरीं चैव तनयां वृषपर्वणः यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च।
पूरुं च शर्मिष्ठा वार्षपर्वणी अजीजनन्महावीर्यान्सुतान्देवसुतोपमान रथं तस्मै ददौ
शक्रः प्रीतः परमभास्वरं असंगं कांचनं दिव्यमक्षय्या चमहेषुधिः युक्तं मनोजवैरश्वैर्ये
न कन्यां समुद्वहन स तेन रथमुख्येन जिगाय सततो महीं ययातिर्युधि दुर्धर्षो देवदा
नवमानवैः पौरवाणां नृपाणां च सर्वेषां सोऽभवद्रथः यावत्कुरुदेशप्रभवः कौरवाज
नमेजयकुरोः कुत्रस्तराज्ञस्तुराज्ञः पारीक्षितस्य ह जगाम सरथो नाशं शापाद्गर्गी

ब्रा॰
३२८

स्वधीमतः गार्ग्यस्य हि सुतं बाल्ये स राजा जनमेजयः चक्रिरे हिंसयामास स लोहगंधिनः सधि
पः सलोहगंधिराजर्षिः परिधावन्नितस्ततः पौरजानपदैस्त्यक्तो न लेभे शर्म कर्हिचित्
ततः स दुःखसंतप्तो नालभत्संविदं क्वचित् स शौनकमृषिं शरणं व्यथितस्तदा इंद्रो
तो नाम विख्यातो यो सौ मुनिरुदारधीः योजयामास स वेज्ञातः शौनको जनमेजयं अश्व
मेधेन राजानं पावनार्थं द्विजोत्तमः स लोहगंधो व्यनशत्तस्यावभृथमेत्य च स च दि
व्यो रथोत्तस्माद्वसोश्चेदिपतेस्तथा ततश्च शक्रेण तुष्टेन लेभे तस्माद्बृहद्रथः ततो हत्वा ज
रासंधं भीमस्तं रथमुत्तमं प्रददौ वासुदेवाय प्रीत्या कौरवनंदनः स जरां प्राप्य राजर्षिर्य
यातिर्नहुषात्मजः पुत्रं ज्येष्ठं वरिष्ठं च यदुमित्यब्रवीद्वचः जरा वली च मां तात पलिता
नि च पर्यगुः काव्यस्योशनसः शापान्न च तृप्तोस्मि यौवने त्वं यदो प्रतिपद्यस्व पाप्मा
नं जरया सह जरां मे प्रतिगृह्णीष्व तं यदुः प्रत्युवाच ह अनिर्दिष्टा मया भिक्षा ब्राह्मण
स्य प्रतिश्रुता सा च व्यायामसाध्या वै न गृहीष्यामि ते जरां जरायां बहवो दोषा गृही।

राम॰
३२७

तु महत्सुत्सहे सितश्मश्रुधरो दीनो जरया शिथिलीकृतः वलीसंततगात्रश्च दुर्दर्शो
श्रुपात्र: दुर्बलाकृतिः कार्यकरणेऽपरिभूतस्तु यौवने स पर्वतीनिभिश्चैवतां जरां नाभिकामये सं
तितेवहवः पुत्रा मत्तः प्रियतरा नृपः प्रतिग्रहीतुं धर्मज्ञ पुत्रमन्यं वृणीष्व वै स एवमु
क्तो यदुना तीव्रकोपसमन्वितः उवाच वदतां श्रेष्ठो ज्येष्ठं तं गर्हयन् सुतं आश्रमः कस्त
वान्योस्ति को वा धर्मविधिस्तव मामनादृत्य दुर्बुद्धे यदाहं तव देशिकः एवमुक्त्वा यदुं
राजा सशापैनं समन्युमान् यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि तस्मान्न राज्यभा
ग्मूढ त्वत्प्रजा तेव भविष्यति दुर्वसो प्रतिपद्यस्व पाप्मानं जरया सह यौवनेन चरेयं वै
विषयांस्तव पुत्रक पूर्णे वर्षसहस्रे ते प्रतिदास्यामि यौवनं स्वं चैव प्रतिपत्स्यामि पाप्मा
नं जरया सह दुर्वसुरुवाच नकामये जरां तात कामभोगप्रणाशिनी जरायां बहवो दोषाः पाया
नभोजनकारिताः तस्माज्जरां न ते राजन् ग्रहीतुमहमुत्सहे ययातिरु यस्त्वं मे हृदया
ज्जातो वयः स्वं न प्रयच्छसि तस्मात्प्रजाः समुच्छेदं तुर्वसो तव यास्यति संकीर्णाचा

ब्रा॰
३२९

धर्मेणप्रतिलोमचरेषु च पिशिताशिषु चान्त्येषु म्लेच्छराज्ञो भविष्यसि गुरुदारप्रसक्ते
षु तिर्यग्योनिगतेषु च पशुधर्मिषु म्लेच्छेषु भविष्यसि न संशयः ॥ सूत उ एवं तु तुर्वसुं
शप्त्वा ययातिः सुतमात्मनः शर्मिष्ठायाः सुतं द्रुह्युमिदं वचनमब्रवीत् द्रुह्यो त्वं प्रतिपद्यस्व
वर्णरूपविनाशिनीं जरां वर्षसहस्रं वै यौवनं स्वं ददस्व मे पूर्णे वर्षसहस्रे ते प्रति
दास्यामि यौवनं स्वं च दास्यामि भूयः पाप्मानं जरया सह द्रुह्युरुवाच नाजं न रथ
नाश्वं जीर्णो भुंक्ते न च स्त्रियं न संगश्चास्य भवति न जरां तेन कामये ययातिरुवाच य
स्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि तस्माद्द्रुह्यो प्रियः कामो न ते संप्र
पत्स्यते क्वचित् नौप्लवोत्तरसंचारस्तत्र नित्यं भविष्यसि अराजा भोजशब्दस्त्वं तत्र चाप्य
निवार्यते अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह एकं वर्षसहस्रं तु चरेयं यौवनेन ते अ
नुरुवाच जीर्णः शिशुवदादत्ते ऽकाले ऽन्नमशुचिः सदा न जुहोति स काले ऽग्निं तां जरां
नाभिकामये ययातिरुवाच यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि जरादोषस्त्वयोक्तो

राम॰
३२९

यंतस्मात्वंप्रतिपत्स्यमे प्रजाचयौवनंप्राप्ताविनशिष्यसितस्तव अग्निप्रस्कंदनपरः
त्वंचाप्येवंभविष्यसि पुरोत्वंप्रतिपद्यस्वपाप्मानंजरयासहजरावलीचमांतातपलि
तानिचपर्ययुः काव्यस्योशनसःशापान्नचतृप्तोस्मियौवने किंचित्कालंचरेयंवै
विषयान्वयसातव पूर्णेवर्षसहस्रेतेप्रतिदास्यामियौवनं स्वंचैवप्रतिपत्स्यामिपा
प्मानंजरयासह गृहाणयौवनंमत्तःचरकामान्यथेप्सितान् जरयाहंप्रतिछन्नोवयोरूप
धृस्तव यौवनंभवतेदत्वाचरिष्यामियथात्थवत् ययातिरुवाच पूरोप्रीतोस्मिभद्रंतेप्री
तश्चेदंददामिते सर्वकामसमृद्धातेप्रजाराज्येभविष्यति सूतउवाच पूरोरनुमतेराजा।
ययातिस्वजरांततः संक्रामयामासतदाप्रसादाद्भार्गवस्यतु पौरवेणाथवयसाययाति
नहुषात्मजः प्रीतियुक्तोनरश्रेष्ठःचचारविषयान्स्वकान् यथाकामंयथोत्साहंयथा
कालंयथासुखं धर्माविरोधाद्राजेन्द्रोयथार्हतिसएवहि देवानतर्पयद्यज्ञैःपितॄन्श्राद्धै।
स्तथैवच दीनाननुग्रहैरिष्टैःकामैश्चद्विजसत्तमान् अतिथीनन्नपानैश्चविशश्चपरि

त्रा॰
२२०

पालनैः आवृतांस्तेन दंडश्च दस्युनिग्रहणेन च धर्मेण च प्रजाः सर्वा यथावदनुरंजयन् यया
तिः पालयामास सताद्यादिं द्वापरः सराजा सिंहविक्रांतो युवा विषयगोचरः अविरोधेन।
धर्मस्य च वा रसत्त्वमनंतरं समागमात् कामानामंतदोषनिदर्शनात् विश्वासात्सहितो
रमे चैव गजेनंदनेवने अथ शप्तस्य यदा तांचैव वर्द्धमानां नृप सदा गत्वा शुरोः सकाशं वै स्त्री
जरां प्रतिपद्यत समप्राप्य तत्तत्कामं स्त्रन तद्दिनं च पार्थिवः कालं वर्षसहस्रं वै सस्मार म
नुजाधिप परिसंख्याय कालं च कलाकाष्ठालयं च च पूर्णमहात्मा नत कालं पुरुं पुत्रमुवाच ह
यथा सत्वं यच्यो त्साहं यथाकालमरिंदम सेविता विषया पुत्र यौवने विमया तव शुक्रोशाप्तीतो
स्मि भद्रं ते गृहाण सत्त्वं स्वयौवनं राज्यं च त्वं गृहाणेदं त्वं हि मे प्रियकृत्सुतः प्रतिपेदे जरां रा
ज्ञो ययातिर्नहुषात्मजः यौवनं प्रतिपेदे च पुनस्त्वं पुनरात्मनः अभिषेक्तुकामं च तं पुरु
त्रं कनीयसं ब्राह्मणाः प्रमुखा वर्णा इदं वचनमब्रुवन् कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्र
भो ज्येष्ठं यदुमतिक्रम्य कनीयान् राज्यमर्हति संबोधयामि सर्वे धर्मं समनुपालय यया
तिरुवाच

राम॰
२२०

ब्राह्मणप्रमुखावर्णाःसर्वेप्रकृतयस्तथा एवंतमेवचः ज्येष्ठंप्रतियथाराज्यंनदेयंमेकथंचन मातापित्रो
र्वचनकृत्हितःपुत्रःप्रशस्यते ममज्येष्ठेनयदुनानियोगोनानुपालितः प्रतिकूलःपितुर्यश्च
नसपुत्रःसतांमतः सपुत्रःपुत्रवद्यश्चवर्ततेपितृमातृषु यदुनाहमवज्ञातः तथातुर्वसु
नापिच द्रुह्येणचानुनाचैवमय्यवज्ञाकृताभृशं पूरुणातुकृतंवाक्यंमानितश्चविशेष
तः कनीयान्ममदायादोजरायेनधृताममा सर्वकामःसर्वकृतःपूरुणापुत्रकारिणा शु
क्रेणचवरोदत्तःकाव्येनोशनसास्वयं पुत्रोयस्त्वानुवर्तेतसराजातेमहामते भवतोनुम
तेप्येवंपूरूराज्येभिषिच्यतां यःपुत्रोगुणसंपन्नोमातापित्रोर्हितःसदा सर्वमर्हतिक
ल्याणंकनीयानपिसप्रभुः अर्हःपूरुरिदंराज्यंयःप्रियःप्रियकृत्तव वरदानेनशुक्रस्यन
शक्यंवक्तुमुत्तरं पौरजानपदैस्तुष्टैरित्युक्तोनाहुषस्तदा अभिषिच्यततःपूरुंस्वराज्येसुत
मात्मनः दिशिदक्षिणपूर्वस्यांतुर्वसुंपर्यवेशयत् दक्षिणापरतोराजायदुंज्येष्ठंन्यवेशयत् प्रती
च्यामुत्तरस्यांचद्रुह्यंचानुंचतावुभौ सप्तद्वीपांययातिस्तुजित्वापृथ्वींसमागरां व्यभजत्पंचधा

श्री॰
३३१

राज्यपुत्रेभ्यानुं कुरुषस्तदा तदा नैरियं पृथिवी सर्वा ससमुद्रीपा सपत्तना यथाप्रदेशं धर्मज्ञे धर्मे
ण प्रतिपाल्यते एवं विभज्य पृथिवीं पुत्रेभ्यो नाहुषिस्तदा पुत्रसंक्रामितश्रीस्तु प्रीतिमानभव
नृपः धनुर्न्यस्य प्रयत्नाश्च राज्यं चैव सुते पुरौ प्रीतिमानभवद्राजा भारमावेश्य वंधुषु अत्र
गाथा महाप्राज्ञा पुरा गीता ययातिना यो ति प्रत्याहरन्कामान्कर्मांगानुषिपर्वशः न जातु का
मः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते यत्पृथिव्यां व्रीहि।
यवं हिरण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति यदा न कुरुते भावं।
सर्वभूतेषु पापकं कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा यदा परान्न बिभेति यदा न भ
बिभ्यति यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः
यो सौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखं जीर्यंति जीर्यतः केशा दंता जीर्यंति जीर्यतः
जीविताशा धनाशा च जीर्यतोपि न जीर्यति यच्च काममुखं लोके यच्च दिव्यं महत्सुखं तृ
ष्णाक्षयसुखस्यैते नार्हतः षोडशीं एवमुक्त्वा स राजर्षिः सदारः प्रस्थितो वनं भ

राम॰
३३१

गुर्तुंगेतपसयातत्रैवच महायशाः पालयित्वाव्रतशतंतत्रैव स्वर्गमाप्नुयात् तस्यवंशास्तुपंचै
तेपुण्यादेवर्षिसत्कृताः यैर्व्याप्ताश्रपृथिवीकृत्स्नाभूर्यसेवगभस्तिभिः धनप्रजावनायुष्मान्कीर्ति
मांश्चभवेन्नरः ययातेश्चरितंसर्वंपठन्शृण्वन्द्विजोत्तमाः ॥ इत्यादिपुराणेवायुप्रोक्तेप्रभवः
सूतउवाच यदोर्वंशंप्रवक्ष्यामिज्येष्ठस्योत्तमतेजसः विस्तरेणानुपूर्व्याचगदतोमेनिबोधत
यदोःपुत्राबभूवुर्हिपंचदेवसुतोपमाः सहस्रजिदथश्रेष्ठःक्रोष्टुर्नीलोजितोलघुः स
हस्रजित्सुतश्रीमान्शतजिनामपार्थिवः शतजित्सुताविख्यातास्त्रयःपरमधार्मिकाः
हैहयश्चहयश्चैवराजावेणुहयश्चयः हैहयस्यतुदायादोधर्मनेत्रइतिश्रुतिः धर्मनेत्रस्य
कीर्तिस्तुसंजज्ञेस्तस्यचात्मजः संज्ञेयस्यतुदायादोमहिष्मानामपार्थिवः आसीन्माहि
ष्मतःपुत्रोभद्रश्रेण्यःप्रतापवान् वाराणस्याधिपोराजाकथितःपूर्वएवहि भद्रश्रेण्य
स्यदायादोदुर्दमोनामपार्थिवः दुर्दमस्यसुतोधीमान्कनकोनामविश्रुतः कनकस्यतु
दायादाश्चत्वारोलोकविश्रुताः कृतवीर्यःकार्तवीर्यःकृतकर्मातथैवच कृतोजानश्चतु

ब्रा॰
३३२

र्योभूत्कृतवीर्यात्ततोर्ज्जुनः जज्ञेबाहुसहस्रेणसप्तद्वीपेश्वरोनृपः सहिवर्षायुतंतप्त्वातपःपरम
दुश्चरं दत्तमाराधयामासकार्त्तवीर्योत्रिसंभवं तस्मैदत्तोवरान्प्रादाच्चतुरोभूरितेजसः पूर्वं
बाहुसहस्रंतुसवव्रेप्रथमंवरं अधर्मेध्रीयमानस्यसद्भिस्तस्मान्निवारणं धर्मेणपृथिवींजित्वा
धर्मेणैवानुपालनं संग्रामांस्तुबहूंजित्वाहत्वाचारीन्सहस्रशः संग्रामेयुध्यमानस्यवधा
स्यादधिकाद्रणे तेनेयंपृथिवीकृत्स्नासप्तद्वीपासपत्तना समोदधिपरिक्षिप्ताक्षात्रेणविधिना
जना: तस्यबाहुसहस्रंतुयुध्यतःकिलधीमतः योगाद्योगीश्वरस्येवप्रादुर्भवतिमायया दे
शेयज्ञसहस्राणितेषुद्वीपेषुसप्तसु निरर्गलानिवृत्तानिश्रूयंतेतस्यधीमतः सर्वयज्ञामहा
बाहोस्तस्यासन्भूरितेजसः सर्वेकांचनवेदीयाः सर्वेयूपैश्चकांचनैः सर्वेदेवैर्महाभागैर्वि
मानस्थैरलंकृताः गंधर्वैरप्सरोभिश्चनित्यमेवोपशोभिताः तस्यराज्ञोजगौगाथांगंधर्वोना
रदस्तथा चरितंतस्यराजर्षेर्महिमानंनिरीक्ष्यच ननूनंकार्त्तवीर्यस्यगतिंयास्यंतिपार्थि
वाः यज्ञैर्दानैस्तपोभिश्चविक्रमेणश्रुतेनच द्वीपेषुसप्तसुसर्वखड्गीचर्मीशरासनी रथी

राम॰
३३२

राज्ञाप्यनुचरान्यागान्वैवान्नदक्षिणे अनष्टद्रव्यानाचासीन्न शोको न च विभ्रमः प्रभावेन महा
प्राज्ञप्रजाधर्मेण रक्षतः पंचाशीतिसहस्राणी च वर्षाणां स नराधिपः सप्तद्वीपान्स सम्राट्चक्र
वर्त्ती बभूव ह स एव पशुपालो ऽभूत्क्षेत्रपालः स एव च स एव वृष्ट्या पर्जन्यो योगित्वादर्जुनो
भवत् स वै बाहुसहस्रेण ज्याघातकठिनेन च भाति रश्मिसहस्रेण शारदेनेव भास्करः स
हि नागसहस्रेण माहिष्मत्यां नराधिपः कर्कोटकसभां जित्वा पुरीं तत्र निवेशयत् स वै वेगात्
समुद्रस्य प्रावृट्कालांबुजेक्षणः क्रीडन्निव मुखोद्विग्नः प्रावृट्कालं चकार ह ललिताक्रीड।
मानेन हेमस्रग्दाममालिनी ऊर्मिभ्रुकुटिसंत्रासा शंकिताभ्येति नर्मदा तुरासतामहा।
सरन्वगाहे महार्णवं चकारोद्धतवेलांतं सकालं प्रावृषोद्धतं तस्य बाहुसहस्रेण क्षोभ्य
माने महोदधौ भवंति लीना निश्चेष्टाः पातालस्था महासुराः चूर्णीकृतमहावीचीलोल
मीनमहातिमिं पतिनाविद्धफेनौघमावर्त्तक्षिप्तदुःसहं चकार क्षोभयन्राजा दोःसहस्रेण
सागरं मंदरक्षोभचकिता ह्यमृतोत्पादशंकिता देवासुरयरिद्धिर्महीरोदमिव सागरं सह।

ब्रा°
३३२

सोत्यादित्याभीतभीमं दृष्ट्वा नयोत्तमं ननन्निश्चितमूर्द्धानावभूत्त्वमहोरगाः सायांकेकट
लीषंडवित्वा नैस्त्वमितार्इव सैवैवधाय तुर्यानामुत्सितः पंचभिश्शतैः लंकायां मोहयित्वा
तु सबलं रावणं बलात् निर्जित्य बध्वा चानीय माहिष्मत्यां बबंधतं ततोगत्वा पुलस्त्यस्तु
अर्जुनं च प्रसादयत् मुमोच राजा पोलस्त्यं पुलस्त्येनानुपालितः तस्य बाहुसह
स्रस्य बभूव ज्यातलस्वनः युगांते तु दवहस्य स्फुटितस्याशनेरिव अहो मृधे महावीर्यो भा
र्गवो यस्य सोक्रिनत् मृधे सहस्रबाहूनां हेमतालवनं यथा तृषितेन कदाचित्स भिक्षित
श्चित्रभानुना सप्तद्वीपांश्चित्रभानोः प्रादाद्भिक्षां विशांपतेः पुराणि घोषान्ग्रामांश्च पत्त
नानि च सर्वशः जज्वाल तस्य बाणेषु चित्रभानुर्दिधक्षया स तस्य पुरुषेंद्रस्य प्रभावेन
महायशाः ददाह कार्त्तवीर्यस्य शैलान्वनानि च सशून्यमाश्रमं सर्वं वरुणस्या

सम°
३३२

त्मजस्य वै ददाह सवनद्वीपां चित्रभानुः सहैहयः सलेभे वरुणः पुत्रं पुरा भास्वान्महोत्त
मं वसिष्ठनामा स मुनिः ख्यात आपव इत्युत तदापवस्त्वं क्रोधाद्जर्जुनं शप्तवान्विभुः

यस्मान्नवर्जितमिदंवनंतेममहैहय तस्मात्तेदुष्करंकर्मकृतमन्योहनिष्यति अर्जुनोनाम।
कौन्तेयोनचराजाभविष्यति अर्जुनस्त्वांमहावीर्योरामःप्रहरतांवरः छित्वाबाहुसहस्रं
वैप्रमथ्यतरसाबली तपस्वीब्राह्मणश्चत्वांवधिष्यतिमहाबलः तस्यरामस्तदाह्यासीन्मृ
त्युःशापेनधीमतः वरश्चतेनवव्रेहिस्वयमेववृतःपुरा तस्यपुत्रशतंत्वासीत्पंचतत्रमहार।
थाः कृतास्त्राबलिनशूराधर्मात्मानोयशस्विनः शूरश्चशूरसेनश्चधृष्टोक्तःकृष्णएवच
जयध्वजस्ववैकर्त्ताअवंतिषुविशांपतिः जयध्वजस्यपुत्रस्तुतालजंघःप्रतापवान् त
स्यपुत्रशतंत्वेवतालजंघाइतिस्मृताः तेषांपंचगणाख्याताहैहयानांमहात्मनां वीर
होत्रास्संयातानाभोजाश्चावन्तयस्तथा तुंडिकेराश्चविक्रांतातालजंघास्तथैवच वी
रहोत्रसुतश्चापिअनर्त्तोनामपार्थिवः दुर्जयस्यतस्यपुत्रस्तुबभूवामित्रकर्शनः अनष्ट
द्रव्यताचैवतस्यराज्ञोबभूवह प्रभावेनमहाराजप्रजास्ताःपर्यपालयत् नतस्यवित्तना
शस्यनष्टंप्रतिलभेच्चसः कार्त्तवीर्यस्ययोजन्मकथयेदिहधीमतः वित्तवान्भवतेचैव

प्रा॰
२२४

धर्मस्यांशं विवर्धिते यथायत्नं ह्यायथादानात्तथास्वर्गे महीयते ॥ इत्यादिपुराणे वायुप्रो
क्तो कार्त्तवीर्यसंभवः ऋषयऊचुः किमर्थं भुवनंदग्धमायस्तन्महात्मनः कार्त्तवीर्येणवि।
कस्यतन्नः प्रभूहि प्रकृतां रक्षितामतुराजर्षिप्रजानामितितः श्रुतं कथं सरक्षिताभूत्वानाश
येनतपोवनं सूतउ आदित्योविप्ररूपेणकार्त्तवीर्यमुपस्थितः तृप्तिकामप्रयक्तान्नःमादि
त्योहंनसंशयः राजोवाच भगवन्केनतत्प्रिभवेद्वदि दिवाकरः कीदृशंभवनंदद्मिश्रु
त्वाचविदधाम्यहं सूर्यउ स्थावरंदेहिमेसर्वमाहारंददतोवर तेनतृप्तोभवेयंवैनतृप्तिहि
नपार्थिव राजाउ नशक्यंस्थावरंसर्वंतेजसामानुषेणतु निर्दग्धुंतपसांश्रेष्ठत्वामेवशरणं
माम्यहं सूर्यउ तुष्टोहंचशरानदद्मिअक्षयान्सर्वतःमुखान् येक्षिप्ताप्रज्वलिष्यंतिममते
जःसमन्विताः आदिष्टंतेनमासेमेसमाचरंग्रीष्मेशोषयिष्यति शुष्कंभस्मकरिष्यामितेनप्रीतिनरा
धिप ततःशरानथादित्यस्त्वर्जुनायप्रयच्छत ततःसंप्राप्यसर्वंमरुस्थावरंसर्वमेवहि

आश्रमानथग्रामांश्चघोषांश्चनगराणिच तपोवनानिरम्याणिवनान्युपवनानिच एवं

राम॰
२२४

प्राचीनमर्हंततः सर्वाप्रदहतां निर्दहद्दाणि सूणां भूमीदग्धा स्वेर्येण तेजसा एतस्मिन्नेवका
लेतुम्रायोनिलयमात्मनः वशावर्षसहस्राणि जलवासमहानृषिः क्रोधात्स्म प्राणराजर्षि
कीर्तितं योयध्यामया सूतउ क्रोधेभृणुतराजर्षिवंशमुत्तमपूरुषं यस्यान्ववायेस
भूताहस्तिवृस्तिर्उर्लोहहः क्रोधोरोकाभवत्पुत्रो रुजिवान्महायशाः वार्जिनीवतमि
क्रंतिस्वाहिस्वाहोचतांवरः स्वाहेः पुत्रोभवद्राजारुषाद्गुर्दहतांवरः सूतप्रसूतमिक्षं
तिरुषगुहोरग्रुमात्मजं महाक्रतुभिरीजेसविविधैराप्तदक्षिणैः चित्रेश्चित्ररथस्तस्य
पुत्रकर्मभिरन्वितः एवंचित्ररथोवीरोयज्वाविपुलदक्षिणान् शशविंदुपरंवृत्तरा
जर्षीणामनुष्ठितः चक्रवर्तिमहासत्वोमहावीर्योवहुप्रभः तत्रानुवंशश्लोकोयंय्या।
स्मिन्गीतः पुराविदैः शशविंदोस्तुपुत्राणांशतानामभवच्छतं धीमतामनुरूपाणां
भूरिद्रविणतेजसां तेषांषट्चप्रधानानांपृथुसाह्वामहाबलाः पृथुश्रवाश्चपृथुय
शाश्चपृथुधर्माश्चपृथुंजयः पृथुकीर्तिःपृथुदानोराजानःशाशविंदवः शंसंतीचपुराणा

ब्रा·
३३९

निपार्थेश्रुवसमंतरं अनिशास्य प्रणयस्तु पत्रस्य तनयोभवत् उशनाः स तु धर्मात्मामवाप्य
पृथिवीमिमां आजहाराश्वमेधानां शतमुत्तमधार्मिकः मरुत्तस्तस्य तनयो राजर्षीणामनु
त्तितः वीरः कंवलवर्हिस्तु मरुत्ततनयः स्मृतः पुत्रस्तु रुक्मकवचो विद्वान् कंवलवर्हिषः
विनिहत्य रुक्मकवचः पिनाकवचितोरणे धन्विनोनिशितैर्वाणैरवाय श्रियमुत्तमां आल
ोभ्योटदौ वित्तमश्वमेधे महायशाः राजन्स्तु रुक्मकवचात्परावृत्परवीरहाः जज्ञिरे पंच पु
त्रास्तु - - - - महावलः रुक्मेषुः पृथुरुक्मश्च ज्यामघः परितोहरिः परिघं च हरिं चै
व विदेहे स्थापयत्पिता रुक्मेषुरभवद्राजा पृथुरुक्मस्तदाश्रयः तेभ्यः प्रवर्जितो राज्याज्ज्या
मघोभवदाश्रम प्रशांतस्तु वने घोरे ब्राह्मणेनानुवोधितः जगाम धनुरादाय देशमन्यं र
थी ध्वजी नर्मदां नृपएकाकी मेकलां मृत्तिकावती ऋक्षवंतं गिरिं गत्वा भुक्तिमन्यामथावि
शत् ज्यामघस्याभवद्भार्या शैब्या च बलवती भृशं अपुत्रोपि स वै राजा भार्यामन्यां न विंदत
तस्यासीद्विजयो युद्धे ततः कन्यामवाप सः भार्यामुवाच राजा स स्नुषेतीति नरेश्वर एवमु

राम·
३३९

मुक्त्वाब्रवीदेनं कामयेयं तेस्त्वयेति सा अजेजनिष्यते पुत्रस्तस्य भार्या भविष्यति तस्य सा
तपसोग्रेण सैव्या पुत्रं प्रसूयत पुत्रं विदर्भं सुभगा सैव्या परिणता सति राजपुत्रौ तु वि
द्वांसौ स्नुषायां क्रथकैशिकौ पुत्रौ विदर्भोजनयच्छूरौ रणविशारदौ लोमपादं तृतीयं तु
पश्चाज्जज्ञे सुधार्मिकं लोमपादात्मजो बभ्रुराहृतिस्तस्य चात्मजः कौशिकस्य चिदि पुत्र
स्तस्माच्चैद्या नृपाः स्मृता क्रथो विदर्भपुत्रस्तु कुंतीस्तस्यात्मजोभवत् कुंतेर्धृष्टस्ततो जज्ञे पु
रोधृष्टः प्रतापवान् धृष्टस्य पुत्रो धर्मात्मा निर्वृतिः परवीरहा तस्य पुत्रो दशार्हस्तु बलावल
पराक्रम दशार्हस्य सुतो व्योमगतो स्तनच उच्यते जीमूतपुत्रो विकृतिस्तस्य भीमरथः सु
तः भीमरथस्यापि पुत्रो रथवरः किल दानधर्मरतो नित्यं सत्यशीलपरायणः तस्य पुत्रो
नवरथस्ततो दशरथः स्मृतः तस्य चासीद्दशरथः शकुनिस्तस्य चात्मजः तस्मात्करंभ
क्रोधनो देवरातोभवत्ततः देवक्षत्रोभवद्राजा देवरातिर्महायशाः देवक्षत्रसुतो जज्ञे दे
वनक्षत्रनंदनः देवनात्स मधुर्जज्ञे यस्य मेधार्थसंभवः माधोश्चापि महातेजा मनुर्मनुव।

प्राल्तथा सनंदनस्यच मजोमहापुरुषतस्तथा आसीत्पुरुवशात्पुत्रात्पुरुहद्वात्पुरुषोत्तमः
जज्ञे पुरुहद्वतः पुत्रो भद्रवत्यां पुरुहद्वतः ऐक्ष्वाकीत्वभवद्भार्या सत्वतस्तस्यामजायत सत्वा
न्सत्वगुणोपेतः सात्वतः कीर्तिवर्द्धनः इमां विसृष्टिं विज्ञाय आमधुस्य महात्मनः प्रजा
यानेतिसायोज्यराज्ञः सोमस्यधीमतः सुतउ सात्वतीरूपसंपन्नं कौशिल्यासुषुवेसु
तं भजिनं भजमानं तु दिव्यं देवावृधं नृपं अंधकं च महाभोजं वृष्णिं च यदुनंदनम् तेषां
हि सर्गाश्चत्वारः शृणुध्वं विस्तरेणवै भजमानस्य संजय्यां बाह्यस्योपबाह्यमो शृंज
यस्य सुतेद्वेतु बाह्यकस्तु उदाहृत तस्य भार्ये भगिन्यौ ते प्रसूते पि सुतान्बहून् निमिंश्च
पणवंश्चैव वृष्णिं परपुरंजयः वैवाह्यकायां शृंजय्यां भजमानाद्विजज्ञिरे अयुताजुत
साहस्राक्षशताजिद्दर्थवामकाः बाह्यकायां भगिन्यां सौ भजमानाद्विजज्ञिरे तेषां देवा
वृधो राजा चचार परमं तपः पुत्रः सर्वगुणोपेतो मम भूयादिति स्मह संयोज्यात्मान
मेवं सा पर्णाशाजलमस्पृशत् सा वा पस्पर्शनान्नस्यच कारप्रियमापगाः कल्याणं

च नरपतेस्तस्य सा निम्नगोत्तमा चिंतयाभिपरीक्षांगा मथ्याप्य च विनिश्चयं नाभिगकामि
तानारीयस्यामेवंविधस्तनः भवेत्सर्वगुणोपेतो राज्ञो देवावृधस्यहि तस्माद स्वयं चाहं भ
वास्य यसरूवता यद्रेतस्यास्वयं रूलोभावस्तस्य यञ्चोरितः अथ भूत्वा कुमारी तु सा विज्ञी।
परमं वचः चिंतयामास राजानं नामियेषसपार्थिवः तस्मामाधत गर्भं तु तेन स्त्रीनमुदा
रधीः अथ सा नवमे मासि सुषुवे सरितां वरा पुत्रं सर्वगुणोपेतं तं वदेवावृधं तदा
तत्र वंशे पुराणज्ञा गाथां गायंति वै द्विजाः गुणान्देवावृधस्यापि कीर्तयंतो महात्मनः
यथैव शृणुते दूरात्संपश्यामि तथांतिकात् बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः
पुरुषाः पंच षष्टिश्च सहस्राणि च सप्ततिः येमृतत्वमनुप्राप्ता बभ्रुर्देवावृधादपि यज्वादा
नपतिर्धीरो ब्रह्मण्यः सत्यवान्बुधः कीर्तिमांश्च महाभागः सात्वतानां महारथः तस्या
न्ववाये सुमहान्भोजयेन्मार्तिकावताः गांधारी चैव माद्री च ह्यस्य भार्ये बभूवतुः गांधारी
जनयामास सुमित्रं मित्रनंदनं माद्री युधाजितं पुत्रं माता वै देवमीढुषं अनमित्रं शतं चै

श्री·
३३२

वनावुभौपुरुषोत्तमौ अनमित्रसुतोनिघ्नोनिघ्नस्यद्वौवभूवतुः प्रसेनश्चमहाभागसत्राजिच्च
सुतावुभौ तस्यसत्राजितः सूर्यः सखाप्राणसमोभवत् सकदाचिन्निशापायेरथेनरथिनां
वरः तोयकूलादपस्प्रष्टुंउपस्थातुंययौरविं तस्योपतिष्ठतः सूर्योविवस्वानागतः स्थितः
अस्पष्टमूर्तिर्भगवान्तेजोमंडलवान्विभुः अथराजाविवस्वंतमुवाचस्थितमग्रतः अद्य
वसोम्निपश्यामित्वामहंज्योतिषांपते: तेजोमंडलिनंचैवतथैवाप्यग्रतस्थितं कोविशेषो
विवस्वंस्तेसख्योनपगतेनवै एतच्छ्रुत्वासभगवान्मणिरत्नस्यमंतकं स्वात्कंठादवमुच्या
पववंधनपतेस्तथा ततोविग्रहवंतंतंददर्शनपतिस्तदा प्रीतिमानथतांदृष्ट्वामुहूर्तंकृत
तवांस्तथा तमभिप्रस्थितंभूयोविवस्वंतंससत्राजित् प्रोवाचाग्निसवर्णीत्वंयेनलोका
न्प्रकाशसि तदेवंमणिरत्नंभवान्दातुमर्हति स्यमंतकंनाममणिंदत्तवांस्तस्यभास्करः
सतमावध्यनगरींप्रविवेशमहीपतिः तंजनापर्यधावंतः सूर्योयंगच्छतीतिह सतांविस्मा
पयित्वाथपुरीमंतःपुरंतथा तंप्रसेनजितेदिव्यंमणिरत्नस्यमंतकं ददौभ्रात्रेनरपतिः

हरि·
३३२

प्रमणा सत्राजितुनमं स्यमंतकमणिरत्नं धृष्यकं स्वनिवेशने कालवर्षी च पर्जन्यो न च व्याधि
भयं तदा लीप्सां चक्रे प्रसेनांनु मणिरत्नस्यमंतकं गोविंदो न च तं लेभे शक्तोपि न जहार च क
दाचिन्मृगयां यातः प्रसेनेन तेन भूषितः स्यमंतकृते सिंहाद्वधं प्राप्य तत्र कानने जांबवानृक्ष
राजस्तं सिंहं निजघान वै आदाय च मणिं दिव्यं स्वं बिलं प्रविवेश ह तत्कर्म कृष्णस्य ततो वृ
ष्ण्यंधकमहत्तराः मणौ गृद्धं तु मन्वाना नात्मैव दिग्धाशंकिरे मिथ्याभिशस्तितेभ्यस्तावल्यपा
नतिसूदनः आमघ्नमाणे भगवान्वनं संविचचार ह प्रसेनस्य पदं गृह्य पुरुषैराप्तकारिभिः
ऋक्षवंतं गिरिवरं विंध्यं च नगसत्तमं अन्वेषणपरिश्रांतः स ददर्श महामनाः साश्वं हतं प्र
सेनं तं नाविंदत्तत्र वै मणिं अथ सिंहः प्रसेनस्य शरीरस्याविदूरतः ऋक्षेण निहतो दृष्टः पदै
रृक्षस्य सूचितः पदैरन्वेषयामास गुहां ऋक्षस्य यादवः महत्यपि बिले वाणीं शुश्राव प्रमदेरितां
धात्र्या कुमारमादाय सुतं जांबुवतो द्विजाः प्रीतिमन्त्यायमणिना मा रोदीरिति वादीरितां धात्र्या
वाच प्रसेनमवधीत्सिंहः सिंहो जांबुवता हतः सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः व्य

क्षिहतं स्प्रबानृः सन्नूर्मार्गा चापि ययौ बिलं अपश्यच्च बिलाभ्यासे प्रसेनमवदारितं प्रविश्य चापि
भगवांस्तत्तद्बिमलं जसा ददर्श ऋक्षराजानं जांबुवंतं उदारधीः युयुधे वासुदेवस्तु बिले
जांबुवता मह वाहुभ्यामेव गोविंदो दिवसानेकविंशतिं प्रविष्टे च बिले कृष्णे वसुदेवपु
रस्सराः पुनर्द्वारवतीं चेत्य हतं कृष्णं न्यवेदयत् वासुदेवस्तु निर्जित्य जांबवंतं महावलं ले
भे जांबवतीं कन्यां ऋक्षराजस्य सम्मतां भगवत्तेजसा ग्रस्तो जांबवानासभा मणिं सुतां जांबु
वतीमायुविष्वकसेनाय दत्तवान् मणिं स्यमंतकं चैव जग्राहात्मविशुद्धये अनुनीय ऋक्ष
राजानं निर्ययौ च तदा बिलात् एवं स मणिमाहृत्य विशोध्यात्मानमात्मना ददौ सत्रा
जिते तं च मणिं सात्वतसंनिधौ कन्यां पुनर्जांबवतीमुवाह मधुसूदनः तस्मान्मिथ्याभिशा
पात्सव्यमुच्यात जनार्दनः इमां मिथ्याभिशस्तिं यः कृष्णस्येह व्यपोहितां वेद मिथ्याभि
शस्तिं स नाभिशस्यति कर्हिचित् दशास्वसारः सत्राजितः शोभा याभार्याः शतसहस्राः ख्याति
मंतस्तु यस्तेषां भगकारस्तु पूर्वजः वीरो व्रतपतिश्चैव अपस्वानां च यस्तु प्रियः अपघ्नार

वतीनामभंगकारस्यसुप्रजाः सुषुवेसाकुमारीस्तिस्रोरूपगुणान्विताः सत्यभामो
त्तमास्त्रीणांव्रतिनीचदृढव्रता तथाप्रस्विनीचैवपिताकृष्णस्यतांददौ यत्तुकृत्वाजि
तेकृष्णेनामणिरत्नस्यमंतकं अक्रूरात्तदारयद्बभ्रुभोजेनशतधन्वना तदाहिप्रार्थया
मासस्त्यभामामनिंदितां अक्रूरोजममन्विच्छन्मणिंचैवस्यमंतकं भङकारिंततोह
त्वाशतधन्वामहाबलः रात्रौतंमणिमादायततोऽक्रूरायदत्तवान् अक्रूरस्तदारत्न
मादायसनरर्षभः समयंकारयांचक्रेदोध्योनाभ्यस्त्वयेत्युत वयमभ्यर्थयिष्यामः
कृष्णेनत्वांप्रधर्षितं ममैवद्वारकासर्वावशेतिह्यत्रसंशयः हतेपितरिदुःखार्तासा
त्यभामायशस्विनी प्रययौरथमारुह्यनगरंवारणावतं सत्यभामातुतद्वृत्तंभोज
स्यशतधन्वनः भर्तुर्निवेद्यदुःखार्तापार्श्वस्थाश्रुण्यवर्तयत् पांडवानांतुदग्धानां
हरिःकृत्वोदकक्रियां कुल्यार्थेचैवभ्रातॄणांन्ययोजयतसात्यकिं ततस्त्वरितमागत्य
द्वारकांमधुसूदनः पूर्वजंहलिनंश्रीमानिदंवचनमब्रवीत् हतःप्रसेनःसिंहेनश

ब्रा॰
३३९

कश्चित्कृतधन्वना स्यमंतकमहं मार्ग्रितस्वप्रहरहेप्रभो ततारोहरथं शीघ्रं भोजं स्त्वाम
हावले स्यमंतकं महावाहो मम चैवास्तु ङ्गविष्यति अत: प्रवृत्ते युद्धे तु तुमले भोजकुल
यो: शतधन्वानमक्रूरमवैज्ञस्सर्वतो दिश: अनाद्यावहारोत कृत्वा भोजनार्दनौ श
क्रोधिमाध्याहार्द्दिक्यो नाक्रूरो: भ्यपपयत अपयानेन तौ वुद्धिं भूयश्चक्रे भयार्दित: वि
ज्ञानं हृदया नाम शतयोजनगामिनी भोजस्य वडवा योयया कृष्णमयोधयत क्षीणां
जवां तु सहृदयां अध्वानं शतयोजनं दृष्ट्वा रथस्य तां वुद्धिं शतधन्वानमर्हयत् ततस्तस्या
हयायास्तु श्रमात्स्वेदात्ल वैद्विजा: खमुत्पेतुरथ प्राणा: कृष्णोराममथाव्रवीत् तिष्ठस्वे
ह महावाहो दृष्टदोषा मयाहय पद्भ्यां गत्वा हनिष्यामि शमणिं छिन्नं स्यमंतकं पद्भ्यामेवत्ता
तो गत्वा शतधन्वानमच्युत: मिथिलाधिपतिं तं वै जघान परमास्त्रवित् स्यमंतकं न चा
पश्यद्धत्वा भोजं महावले निवृत्तं चाव्रवीत् कृष्णं रत्नं देहीति लांगली नास्तीति कृष्णस्ता
वाचत तो रामोरुषान्वित: धिक शब्दमसकृत्पूर्वं प्रत्युवाच जनार्दनं भ्रातृत्वान्मर्षयाम

राम॰
३३९

मेघस्वनिते लब्धजन्मरं कृत्स्नं न मे द्वारकया न त्वया न च वृष्णिभिः प्रविवेश ततो रामो मिथि
लामरिमर्दनः सर्वकामैरुपहृतैर्मिथिलेनैव पूजितः एतस्मिन्नेव काले तु बभ्रुर्मतिमतां वरः
नानारूपान् क्रतून् सर्वानाजहार निरर्गलान् दीक्षामयं सर्वकवचं रक्षार्थं प्रविवेश ह स्यमंत
ककृते राजा गाधिपुत्रो महायशाः अथ रत्नानि चाग्र्याणि द्रव्याणि विविधानि च षष्टिं वर्षाणि
ते काले यज्ञेषु विनियोजयेत् अक्रूरयज्ञा इत्येते ख्यातास्तस्य महात्मनः बहून्नदक्षिणाः सर्वे सर्व
कामप्रदायिनः अथ दुर्योधनो राजा गत्वा स मिथिलां प्रभुः गदाशिक्षां ततो दिव्यां बलभ
द्रादवाप्तवान् प्रसाद्य तु ततो रामो वृष्ण्यन्धकमहारथैः आनीतो द्वारकामेव कृष्णेन च म
हात्मना अक्रूरः सान्धकैः सार्द्धमपायात्पुरुषर्षभः युद्धे हत्वा तु शत्रुघ्नं सहबन्धुं महाबली
स्वफल्कतनयायां तु नरायां नरसत्तमौ भंगकारस्य तनयौ विख्यातौ सुमहाबलौ जनश्रा॥
तेऽन्धकमुख्येभ्यः शत्रुघ्नो बन्धुमांश्चैव वधात् भंगकारस्य कृष्णो न प्रीतिमानभवत् ज्ञातिभेदभ
याद्भीतः समुपेक्षितवान् तथ अपयाते ततोऽक्रूरे नावर्षत्पाकशासनः अनावृष्ट्या हतं राष्ट्र

मभवत्तद्यथायतः ततःप्रसादयामासुरक्रूरंकुकुरांधकाः पुनर्द्वारवतीप्राप्तेन दानप-
तौतथा प्रववर्षसहस्राक्षः कृष्णोजलनिधेस्ततः कन्यांचवासुदेवाय स्वसारं शीलसं-
मितां अक्रूरःप्रददौधीमान्प्रीत्यर्थयदुपुंगवः अथविज्ञाययोगेनकृष्णोबभ्रुगतिंम-
णिं सभामध्येतदाप्राह तदाक्रूरंजनार्दनः यत्तद्रत्नंमणिवरंतवहस्तगतंप्रभो तत्प्रयच्छ
स्वमानार्हमन्यमानाययाकृपाः बह्विर्वर्षगतेकालेयद्गोपोभूज्जदामम सुसंसृष्टोसे
कृत्वामत्सरकालाग्निस्त्वयोमहान् ततःकृष्णस्यवचनात्सर्वसात्वतसंसदि प्रददौतंम-
णिंबभ्रुरक्लेशेनमहामतिः ततस्तमार्जवप्राप्तंबभ्रुहस्ताद्धरिर्दम ददौप्रहृष्टमनास्स्वयं:
तंमणिंबभ्रवेपुनः सकृष्णहस्तात्संप्राप्यमणिरत्नंस्यमन्तकं आबध्यगांदिनीपुत्रो
विरराजांशुमानिव इमांमिथ्याभिशस्तिंयो विशुद्धमपिचोत्तमां वेदमिथ्याभिश-
स्तिः नव्रजेच्च कथंचन अनिमित्राक्लितिर्जन्तेकतिष्ठाद्विष्टिनंदनात् सत्यवाक्य।
त्वसंपन्नःसत्वकृष्णस्यचात्मनः सात्विकिंप्रधानस्यतस्यभूतिः कृतोभवत् भूति।

युगंधरः शूरः इति भौत्याः प्रकीर्त्तिताः माद्र्याः सुतस्य जज्ञे तु सुतः पृश्निर्युधाजितः जज्ञा
ते तनयः पृश्नेः स्वफल्कश्चित्रकस्तथा स्वफल्कस्तु महाराजो धर्मात्मा यत्र वर्त्तते ना
स्ति व्याधिभयं तत्र नचावृष्टिभयं तथा कदाचित्काशिराजस्य विभोस्तु द्विजसत्तमाः त्री
णि वर्षाणि विषये नावर्षत्पाकशासनः स तत्र वासयामास स्वफल्कं परमार्चितं स्वफ
ल्कपरिवासेन प्रववर्षत्पाकशासनः स्वफल्कः काशिराजस्य सुतां भार्यामविंदत गां
दिनीं नाम गां सा हि ददौ विप्रेषु नित्यशः सा मातुरुदरस्था वै बहून्वर्षगणान्किल
निवसंती न वै जज्ञे गर्भस्थां तां पिताब्रवीत् जायस्व शीघ्रं भद्रं ते किमर्थं चापि तिष्ठसि
प्रोवाच चैनं गर्भस्था सा कन्या गां दिने दिने यदि दद्यास्ततोस्याहं यदि स्यामिह ते पितः
तथेत्युक्त्वा च तां तस्याः पिता काममपूरयत् दाता यज्वा च शूरश्च श्रुतवानतिथिप्रियः
तस्याः पुत्रः स्मृतोक्रूरः स्वफल्काद्भूरिदक्षिणः उपमंगुः तथा मंगुः मृदुरश्चारिमेज
यः गिरिरक्षस्तथोपेक्षः शत्रुघ्नोथारिमर्दनः धर्मभृद्यतिधर्मा च गंधमोजस्तथान्ध
कः

ब्रा॰
२७१

आवाहप्रतिवाहौ च वसुदेवाद्वरांगना अक्रूरादुग्रसेन्यां तु द्वौ सुतौ कुलनंदिनौ देववा
नुपदेवश्च जज्ञाते देवसंमितौ चित्रकस्याभवन्पुत्राः पृथुर्विपृथुरेव च अश्वग्रीवो
ऽश्वबाहुश्च सुपार्श्वकगवेषणौ अरिष्टनेमिरश्वश्च सुधर्मा धर्मभृत्तथा सुबाहुर्ब्बहु
भूमिश्च श्रविष्ठाश्रवणे स्त्रियौ सत्यकात्काशिदुहिता लेभे सा चतुरात्मजान् ककुदं भ
जमानं च शमीकं बलबर्हिषं ककुदस्य सुतो वृष्टिर्वृष्टेस्तु तनयोऽभवत् कपोतरो
मा तस्याथ रेवतोऽभवदात्मजः तस्यासीत्तुंबुरुसखा विद्वान्पुत्रोऽभवत्किल ख्याय
ते यस्य नाम्नासौ चंदनोदकदुंदुभिः तस्याच्चाभिजितः पुत्रं उत्पन्नस्तु पुनर्वसुः
अश्वमेधं तु पुत्रार्थमाजहार नरोत्तमः तस्य मध्येऽतिरात्रस्य सदोमध्यात्समुत्थि
तः ततस्तु विद्वान्धर्मज्ञो दाता यज्वा पुनर्वसुः अश्वमेधं तु पुत्रार्थमाजहार नरोत्त
मः तस्य मध्येऽतिरात्रस्य सदो मध्यात्समुत्थितः ततस्तु विद्वान्धर्मज्ञो दाता तस्या
पि पुत्रमिथुनं चाहूवानजितः किला आहुकश्चाहुकी चैव ख्यातौ मतिमतां वरः

राम॰
२७१

इमांश्चोदाहरंत्यत्र श्लोकान्प्रतितमाहुकं सोपसंगानुकर्षाणां सध्वजानां वरूथिनां र

थानां मेघघोषाणां सहस्राणि दशैव तु नसत्यवादी तत्रासीन्नायज्वा सहस्रदः ना

शुचिर्नाप्यधर्मात्मा नाविद्वान्नकृशोभवत् आहुकस्य धृति पुत्र इत्येवमनुशुश्रुमः

श्वेतेन परिवारेणकिशोरप्रतिमान्हयान् अशीतिं चर्म्मनियतानाहुकप्रतिमौव्र

जत् पूर्वस्यांदिशिनागानांभोजस्यप्रतिमोभवत् रूप्यकांचनकक्ष्याणां सहस्राण्ये

कविंशति तावत्येव सहस्राणि उत्तरस्यां तथादिशि भूमिपालस्यभोजस्य उत्तिष्ठे।

त्किंकिणीकिल आहुकस्याप्यवंतिभ्यस्त्वसारत्वाहुकीं ददौ आहुकात्काश्यदुहिता द्वौ

पुत्रौसंवभूवतुः देवकश्चोग्रसेनश्च देवगर्भसमावुभौ देवकस्यसुता वीरा जज्ञि

रेत्रिदशोपमाः देवानामपि देवश्च सुदेवो देवरंजिता तेषांस्वसारः सप्तासन्वसु

देवाय सा ददौ वृकदेवोपदेवा च तथान्या देवरक्षिता श्रीदेवा शांतिदेवा च महादे

वनपालपरा सप्तमी देवकी तासां सुतनामाचारुदर्शना नवोग्रसेनस्य सुताः कंसस्तेषां
तु पूर्वजः न्यग्रोधश्च सुनामा च कंकः शंकुश्च भूमयः सुतनुराष्ट्रपालश्च युद्धतुष्टिः सु
तुष्टिमान् तेषां स्वसारः पंचैव कर्मधर्मवतीतथा शतांन्कराष्ट्रपाली च कंका चैव वरां
गना उग्रसेनो महापत्यो व्याख्यातः कुकुरोद्भवाः कुकुराणामिमं वंशं धारयन्नमितौ
जसं आत्मनो विपुलं वंशं प्रजावांश्च भवेन्नरः भजमानस्य पुत्रस्तु रथमुख्यो विदूर
थः राज्याधिदेवः शूरश्च विदूरस्य सुतोभवत् तस्य शूरस्य सुता जज्ञिरे बलवत्तराः वा
तश्चैव निवातश्च शोणाश्वः श्वेतवाहनः शमी च गदवर्मा च निदान्तः शत्रुशक्रजि
त् शमीपुत्रः प्रतिक्षत्रप्रतिक्षत्रस्य चात्मजः स्वयंभोजस्वयंभोजाद्धृदीकः संबभूव ह
हृदिकस्य सुतास्त्वासन् दश भीमपराक्रमाः कृतवर्माग्रजस्तेषां शतधन्वा तु मध्यमः
देवार्हश्चैव नाभश्च भिषक्वैतनरथस्य यः सुदांतश्चाधियोतश्च कनकवान्कनकोद्भ

वः देवाईश्चसततो विद्वान्नेकेवलवर्हिषः असमौजाश्चतलस्यतसमौजाश्च विक्रांतः
अजातशत्रुर्यतनतप्रददावसमौजसे हृद्धेवमस्त्रपंचकुलस्यानुकाम्लताः अंधका
नामिमंवेशाकीर्णियानस्तुनित्यशः आत्मनो विपुलंवंशा लभते नात्रसंशयः असमका
जनयामासस्पृशैवेदेवमीढ्वं मास्यानुजनयामासस्पृशैवेदेवमीढ्वं मास्यानुज
ज्ञिरेस्वराड्डोजायांपुरुषाद्विशा वसुदेवो महावाहुः पूर्वमानकदुंदुभिः जज्ञेन स प्रसू
तस्यदुंदुभिः प्राणदद्दिवि आनकांचनसंह्रादः सुमहानभवद्दिवि पपातपुष्पवर्षंच
शूरस्यतनवेमहत् मनुष्यलोकेकृत्स्नेपिरूपेनास्तिसमोभुवि यस्यासीत्पुरुषाग्र
स्यकीर्तिश्चंद्रमसोयथा देवभागस्ततोजज्ञे ततो देवश्रवाःपुनः अनाधृष्टिकदृश्चै
वनंदश्चैवसभृंजितः श्यामस्शमीकोगंडूकः श्वस्तारस्त्ववरांगनाः पृथ्वाचश्रुतदे
दाचश्रुतकीर्तिःश्रुतश्रवाः राजाधिदेवीचेतस्यापृचैतावीरमातरः पृथां दुहितरं
चक्रे कुंतिस्तांपांडुरावहत् तस्मात्सायहवंशायकुंतिभोजायतादद‍ौ तस्मात्कौंतीति

विख्याता कुंतिभोजात्मजा पृथा कुरुवीरः पांडुमुख्यः तस्माद्भार्यामविंदित पृथा जज्ञे
ततः पुत्रान् त्रीनग्निसमतेजसः लोके प्रतिरथान्वीरान् शक्रतुल्यपराक्रमान् धर्मा
द्युधिष्ठिरं पुत्रं मारुताच्च वृकोदरं इंद्राद्धनंजयं चैव पृथा पुत्रानजीजनत् माद्रवत्यंतु
जानीतावश्विनाविति नश्रुतं नकुल सहदेवश्च रूपसत्वगुणान्वितौ जज्ञे तु श्रुत
देवायां तनयो वृद्धशर्मणः करूषाधिपतिर्वीरो दंतवक्रो महाबलः केकेय्यां श्रुत
कीर्त्यां तु जज्ञे संतर्दनः पुनः चैकितानबृहत्क्षत्रौ तथैवान्यौ महाबलौ विंदानुवि
दावावंत्यौ भ्रातरौ तु महाबलौ श्रुतश्रवायां चैद्यस्तु शिशुपालो बभूव ह दमघोष।
स्य राजर्षेः पुत्रो विख्यातपौरुषः यः पुरासीद्दशग्रीवः संबभूवारिमर्दनः पडुश्रवा।
नुजस्तस्य रुजकन्या रुजस्तथा पत्न्यस्तु वसुदेवस्य त्रयोदश वरांगनाः पौरवी रो
हिणी चैव मदिरा चापरा तथा तथैव रुद्रवैशाखी देवकी सप्तमी तथा सुगंधी वन
राजी च द्वे चान्ये परिचारके रोहिणी पौरवी चैव बाह्लीकस्यात्मजाभवत् ज्येष्ठा।

त्वीमहाभागादयितानकदुंदुभेः श्रेष्ठं लेभे सुतं रामं सारणं निशठं तथा दुर्दमं दमनं शुभ्रं पिं
डारकं कुशीनकौ चित्रांनाम कुमारी च रोहिण्यपि प्रोव्य जायत पौत्रो रामस्य जज्ञाते विज्ञा
तौ निशितोल्मुकौ पार्श्वी च पार्श्वमर्दी च शिशुः सत्यधृतिस्तथा मंदवाहो वरमानोगि
रिकौ गिरिरेव च शुक्लगुल्मोतिगुल्मश्च दरिद्रान्तकएव च कुमार्यश्चापि पंचाधानामत
स्तानिबोधत अर्चिष्मती सुनंदा च सुरसा सुवचास्तथा नयाशतनवलाचैव सारणस्य सु
तास्त्विमाः भद्राश्वो भद्रगुप्तिश्च रोहिताश्च सुभद्रकः दुर्मदश्चाभिभूतश्च रोहिण्याः कु
लजाः स्मृताः नंदोपनंदो मित्रश्च कुक्षिमित्रस्तथाचलः चित्रोपचित्रकौ नैवचास्थितः पुष्टि
स्थापरः मदिरायाः सुतानेतान् सहदेवाव्यविजज्ञिरे उपबिंबोथबिंबश्च सत्वदंतो महौज
सौ चत्वार एते विख्याता भद्रापुत्रा महाबलाः वैशाख्या मम मदाकौशिः सुषेणः कीर्तिमा
नपि तदायो भद्रसेनश्च यजुदायश्च पंचमाः पुष्टिभद्रविदेकश्च कंसः सर्वान् जघान ता
न् अथ तस्यामवस्यायां प्राभुप्रान्सवभूवर लोकनाथ पुनर्विभुः सर्वं कृत्सः प्रजाप

श्रा॰
२५४

तिः अवुक्तानामभवत्कस्यासुभद्रायभद्रभाषिणी कस्यासुभद्रेतिपुनःव्याख्यातावसीनंद
नी सुभद्रायायरथीपार्थादभिमन्युरजायत सदेवस्यभार्यामहाभागासुसमस्तुयेपुत्रा
जज्ञिरेसूरानामतस्तांन्निबोधत अतोस्यसहदेवायांशूरोजज्ञेमयोसवः शाई॰देवाग्ने
नस्तनुंशौरेर्जज्ञेकुलोद्वहे उपसंगंवसंचापितनयौदेवरक्षितो पर्वदशास्वतास्तस्यक
सस्यावध्यघातयत् विजयंरोचनंचैववर्द्धमानंतथैवच एतान्सर्वान्महाभागानुपदे
वाविजायत अगाहीचसस्याचैवसहदेवाशिशिरायनी सप्तमंदेवकीपुत्रंसुनामास्तुवे
स्तुतं गवेषणंमहाभागंसंग्रामेचित्रयोधिनं श्राद्धदेवंपुरावेनवनेविचरितेद्विजाः ते
वायामदद्यात्कौशिरिः पुत्रकौशिकमव्यय सुगांधिवनराजीचशौरेराभ्यापरिग्रहः पुंडूश्च
कपिलश्चैववसुदेवात्मजौ तौ तयोराजाभवत्पुंडूः कपिलस्तुवनंययौ तस्यांसमभ
वद्वीरोवासुदेवात्मजोवली राजानामनिषादोसौप्रथमःसधनुर्द्धरः विख्यातोदेवभा
जस्यमहाभागसुतोभवत् पडितानांमतंप्राहुर्देवश्रवसमुद्भवं अश्मकाल्भनेपुत्रमना

राम॰
२५४

हर्षिंयशस्विनं जितवंतं नक्रशत्रुघ्नं प्राहुर्देवमहावलं अजायत अग्राह्यदेवो नैषाद्वाधिर्यतः
स्मृतः एकत्वगोमहावीर्यो निष्कैः परिवर्जितः गंडूषायानयत्यायकुसलत्वाद्दौह
तः चारुदेष्णंच सांवंच -- पंचासृलहत्तो ननिजः नतिमालस्य स्वपुत्रोकनकस्य च वका
वनेषुपुत्रायवसुदेवप्रतापवान् सोभिद्रदौस्तनंवीरं शौरिकैशिकमेवच उपाश्वकोपवृश्नि
ववरुणस्यामसंजितः अनयत्यो भवत्स्यामसुपामकलत्ववतंयुयो नगुरुसमानो भोजेवंशज
क्षितिवमवाप्नुयात् यदंजन्मकृत्स्नस्य पठेननियतव्रतः श्रावयेद्ब्राह्मणंत्वापिसमहन्मुखा
माप्नुयात् देवदेवो महातेजाः पूर्वंकृत्स प्रजापतिः विहारार्थं मनुष्येषु जज्ञे नारायणः प्रभुः
देवक्यां वसुदेवेन तपसा पुष्करेक्षणः चतुर्बाहुस्तु संजज्ञे दिव्यरूपश्रियान्वितः प्रकाशे
भगवान्योगी कृष्णो मानुषमागतः अव्यक्तो व्यक्तलिंगस्थः स एव भगवान्प्रभुः नाराय
णो यतश्चक्रे प्रभवं चाव्ययं हि यत् देवो नारायणो भूत्वा हरिरासीत्सनातनः यो सृजत्सा
दिपुरुषं पुरा चक्रे प्रजापतिः अदितेरेव पुत्रत्वमेत्य यादवनंदनः देवो विष्णुरिति [illegible]

क्रादनवरोभवत् प्रसादजं यस्य विभोरदित्याः पुत्रकारणं वधार्थं हर शत्रूणां दैत्यदानवरक्ष
सां ययातिर्वंशजस्याथ वसुदेवस्य धीमतः कुलं पुण्यं यतः कर्मभेजे नारायणः प्रभुः सा
गराः समकंपंत चेलुश्च धरणीधराः जज्वलुश्चाग्नयो शांता जायमाने जनार्दने शिवा
श्च प्रववुर्वाताः प्रशांतमभवद्रजः ज्योतिष्यभ्यधिकं रेजुः जायमाने जनार्दने अभिजिन्ना
म नक्षत्रं जयंती नाम शर्वरी मुहूर्तो विजयो नाम यत्र जातो जनार्दनः अव्यक्तः शाश्वत
ऋषय ऊचुः कस्मादेष परार्द्धश्च कश्चैष पर उच्यते एतद्वेदितुमिच्छामस्तत्त्वतो निगद्य
सत्तम सूत उ॰ शृणुध्वं मे परार्द्धस्य परिसंख्या परस्य च एकं दश शतं चैव सहस्रं चैव सं
ख्यया विज्ञेयमासहस्रं तु सहस्राणि दशायुतं एकं शतसहस्रं तु नियुतं प्रोच्यते बु
धैः तथा शतसहस्राणामर्बुदं कोटिरुच्यते अर्बुदं दशकोट्यस्तु अब्जं कोटिशतं वि
दुः सहस्रमपि कोटीनां खर्वमाहुर्मनीषिणः दश कोटिसहस्राणि निखर्वमिति तं
विदुः शतं कोटिसहस्राणां शंकुरित्यभिधीयते सहस्रं तु सहस्राणां कोटीनां दशधा
पुनः गुणितानि समुद्रं वै प्राहुः संख्याविदो जनाः कोटीनां सहस्रमयुतमित्ययं मध्य
उच्यते कोटीसहस्रनियुतानसंचान्त इति संज्ञितः कोटीकोटिसहस्राणां परार्द्ध इति की
र्त्यते परार्द्धं द्विगुणं चापि परमाहुर्मनीषिणः शतमाहुः परिवृद्धं सहस्रं परिपल्लके
विज्ञेयमयुतं तस्मान्नियुतं प्रयुतं ततः अर्बुदं न्यर्बुदं चैव वृन्दं चैव समुद्रकं खर्वं चै
व निखर्वं च शङ्कुं पद्मं तथैव च समुद्रं मध्यमं चैव परार्द्धमपरं ततः एवमष्टादश

बृ॰
२९६

तानिस्थानानिगणनाविधौ ज्ञानानीतिविजानीयात्तंसंज्ञितानिमहर्षिभिः कल्पसंख्याप्र
वृत्तस्यपरार्द्धेब्रह्मणस्ततः तावकेषोपिकालेस्यतस्थानेप्रतिसृज्यते परपघपरार्द्धस्य
संख्यानेचसंख्यया यस्मादस्यपरंवीर्यंपरमायुःपरंतपः तावकेषोपिकालेस्यतस्थानेप्र
तिसृज्यते पराशक्तिःपरोधर्मःपराविद्यापराधृतिः परंब्रह्मणःज्ञानंपरमैश्वर्यमेवच
तस्मात्परतरंभूतंब्रह्मणोऽन्यन्नविद्यते परेस्थितोह्येषपरःसर्वार्थश्रुतनः परं संख्यात
स्तुपरोब्रह्मातस्मार्द्धंतुपरार्द्धता संख्येयंवाप्यसंख्येयंसततंचापिनित्रिकं संख्येयंसं
ख्यायादृष्टंअप्रार्द्धाद्विभाष्यते राशौदृष्टेनसंख्यास्तितदसंख्यस्यलक्षणं ज्ञानंत्य
सिक्तायिषुदृष्टेचानंत्यलक्षणं इत्येरलनसंख्यानंभुइत्वादिव्यदृष्टिभिः एवंज्ञा
जानविन्नत्वासर्वंब्रह्मानुपश्यति यतःकुत्रात्तुरोसर्वेनैमिषेयास्तपस्विनः वा
धायीद्कुलाख्यास्त्रसर्षाहृहरस्वराः यस्त्रैमातरिश्वानंसाधनंयोजनस्यतुको
शायपरिमाणंतुक्रोशमिकाभिनतस्ततः तेषांतद्वचनंश्रुत्वामातरिश्वाविनीत

राम॰
२९६

वाक् उवाच मधुरं वाक्यं यथावृत्तं यथाक्रमं वायुरुवाच एतद्वोहं प्रवक्ष्यामि शृणु।
ध्वं से विवक्षितं अव्यक्ताव्यक्तभागौ वै महास्थूलौ विभाव्यते दशैव महतां भागं भूतादि
स्थूल उच्यते दशभागाधि पंचापि भूतादेः परमाणकं परिमाणं सुसूक्ष्मस्तु भावग्रा
ह्यो न चक्षुषा यदभेद्यतमं लोके विज्ञेयं परमाणु तत् जालांतरगते भानौ यत्क्षुद्रं।
दृश्यते रजः प्रथमं तत्प्रमाणानां परमाणुं प्रचक्षते त्रसरेणवस्त्वाय यच्चाष्टौ परमाणवः
समस्तः तेनाष्टौ समवायस्याद्बालाग्रं तत्स्मृतं बुधैः बालाग्राण्यष्ट लिक्षा स्याद्यूका
चाष्टकं भवेत् एकाष्टक यवं प्राहुरंगुलं तु यवाष्टकं द्वादशांगुलपर्वाणि वितस्ति।
स्थानमुच्यते रत्निश्चांगुलिपर्वाणि विज्ञेयो ह्येकविंशतिः चत्वारो विंशतिश्चैव ह
हस्तस्यादंगुलानि तु विष्कु द्वित्रि विज्ञेयो द्विचत्वारिंशदंगुलः षण्णवत्यंगुलं वै
व धनुराहुर्मनीषिणः एतद्भूतिसंख्यायां पादानं धनुः स्मृतं धनुर्दंडो युगं नाली
तुल्यान्येतान्यथांगुलैः धनुषां त्रिशतं नल्वमाहुः संख्याविदो जनाः धनुः सहस्रे द्वे

पु॰
३९८

पिंगाख्यतिस्मुपदिश्यते अष्टौ धनुःसहस्राणि योजनं तु विधीयते एतेन पञ्चमाचैव योजनेन तु स
माप्यते एतत्सहस्रं विज्ञेयं शक्रकोशान्तरं तथा योजनानां तु संख्याते संख्याज्ञानविशारदैः
एतेन योजनाग्रेण श्रूणु धंब्रह्मणोऽन्तरे महीतलात्सहस्राणां शतादूर्द्ध्वे दिवाकरः दिवा
करात्सहस्रे तु तावद्वोर्द्ध्वे निशाकरः पूर्णे शतसहस्रे तु योजनानां निशाकरात् नक्षत्रमंड
लं कृत्स्नमुपरिष्टात्प्रकाशते शते सहस्रे विस्तीर्णं मेरुं द्विगुणितं पुनः ग्रहान्तरमथैके
कमूर्द्ध्वं नक्षत्रमंडलात् ताराग्रहाणां सर्वेषामधस्ताच्चरते बुधः तस्योर्द्ध्वे चरते शुक्रस्तस्मा
दूर्द्ध्वे च लोहितः ततो बृहस्पतिश्चोर्द्ध्वे तस्मादूर्द्ध्वे शनैश्चरः ऊर्द्ध्वे शतसहस्रं तु योजनानां
शनैश्चरात् सप्तर्षिमंडलं कृत्स्नमुपरिष्टात्प्रकाशते ऋषिभ्यस्तु सहस्राणां शतादूर्द्ध्वे
विभाव्यते यासौ तारामये दिव्ये विमाने ह्रस्वरूपके उत्तानपादपुत्रोऽसौ मेढीभूतो ध्रुवो
दिवि त्रैलोक्यस्य षडन्ते धोव्याख्यातो योजनैर्मया मन्वन्तरेषु देवानामीज्याय चैव लौकि
की वर्णाश्रमभ्यईज्या तु लोकेऽस्मिन्या प्रवर्तते सर्वे सा देवयोनीनां स्थितिहेतुः सर्वस्य

राम॰
३९८

तः त्रैलोक्यमेतद्धि याम्योत्तमतऊर्द्ध्वं निबोधत ॥ ध्रुवादूर्द्ध्वं महर्लोको यस्मिंल्लोके कल्पवासिनः ए
कयोजनकोटीसाहस्रैवं निश्चयोगतः द्वेकोट्यौतुमहर्लोको यस्मिंल्लोके कल्पवासिनः ए
कयौ यत्रैते ब्रह्मणः पुत्रा दक्षाद्याः साधकात्मताः चतुर्गुणोजनाद्द्ध्वं जनलोकात्तपस्त
तः वैराजा यत्र ते देवा भूतदाहविवर्जिताः षड्गुणस्तु तपोलोकात्सत्यलोकांतरस्मृतं अ
पुनर्मारकामानां ब्रह्मलोकस उच्यते यस्मिन्नच्यवते भूयो ब्रह्मणान्तत्र पासते एककोटि
रियोजनानां पंचाशान्नियुतानि च ऊर्द्ध्वंभागस्तितोऽस्य ब्रह्मलोकात्परस्मृतः चतुर
चैव कोट्यस्तु नियुतानि पंचषष्टिश्च एषोर्द्ध्व — प्रचारोस्यगंता नापरस्मृतः ॥ ध्रुवाग्रमेत
द्व्याख्यातं योजनाग्रां यथास्थितं अधोगतीनां वक्ष्यामि भूतानां स्थानकल्पना ॥ गावैतिवो
र कर्माणि प्राणिनो यत्र कर्मभिः नरको रौरवो रोधः सूकरस्तालएव च तप्तकुंभो महाज्वा
ल शाबलात्यविमोचनः कृमीच कृमिभक्षश्च लालाभक्षोविशासनः अधःशिराःपूय
वहो रुधिरोपलएव च तप्ताचतरन्मश्च असिपत्रवनंतथा अग्निज्वालो महाघोरसंदंशो

पक्वभोजनः नरकश्च कृमिसूत्रश्च लाहश्चाप्यभिजलस्था अप्रतीरोधश्च बीभत्सश्च नरकाश्च
वमोदयः तामसा नरकाः सर्वे यमस्य विषये स्थिताः येषु दुष्कृतकर्माणः पतंतीह अथ वक्ष्य
कृ भूमेरधस्तात्ते सर्वे रौरवाद्याः प्रकीर्तिताः रौरवे कूटसाक्षी तु मिथ्या यः पक्षानि शंसति कू
रग्रहे यस्तु वादी स्यात् स न्याय पतते नरः रोधे गोघ्नो वृत्रहा च अग्निदानस्तथैव च सूकरे ब्रह्महा
मद्यपस्तगापस्वर्णतस्करः तालेपते नृदत्तिहा हत्वा वैश्यं च दुर्गनि ब्रह्मस्त्रयाचयस्तु यो
योवस्याद्गुरुतल्पकः तप्तकुंभी स्वसागामी तथा राजभटघ्नयः तप्तलोहे चाप्य वालिक
नस्यावंधनरक्षिता साध्वीविक्रयकर्ता च यस्तु भक्तं परित्यजेत् महाज्वाले दुहितरं स्नुषां
गच्छति यस्तु वै वेदविक्रीणते यश्च वेदं दूषयते च यः गुरुश्चैवावमन्यात वाक्रूरे लाडयंति
च अगम्यागामिच नरा नरके शवले प्रजेत विमोहे पतति चौरमर्यादां योभिनत्ति वै दु
रष्टं कुरुते यस्तु कीटलोहं प्रपद्येत देवब्राह्मणविद्वेष्टा ब्राह्मणान्मुरुद्रसतो लालाभ
क्षे पतति तेऽपि नरके गतः कांडकर्ता कुलालश्च निष्ठुरनोचिविकित्सकः आरामघ्न

ग्निदानायः पतते मनविश्वासने अस्य निग्रही यश्च तस्यैवायाज्ययाजकः नक्षत्रैर्जीवते
यश्च नरो गकुंत्यधोमुखे हरिं सुरां च मांसं च लाक्षां गंधरसं तिलान् एवमादीनि विक्रीण
न घोरे सू पूयवहे पतेत यश्च कुक्कुटान् विभाति मार्जारान् शूकरांश्च नाम् पक्षिणश्च मृगान्
छागान्सोप्येनं नरकं व्रजेत् अजीविको माहिषिकस्य थाचक्रधर्जेश्च सः रंगोपजीवि
को विप्रः शाकुनिग्रामयाजकः अगारदाही गरदः कुंडाशी सोमविक्रयी सुरापो मांसभ
क्षश्च तथा च पशुघातकाः विशस्ता महिषादीनां मृगाणां तातथैव च पर्वकारश्च सूची
च यश्च स्यानिमित्रघातकः रुधिरांधे पतंत्येते एवमाहुर्मनीषिणः उपविष्टुमेकपात्रांनां वि
षमं भोजयंति ये पतंते नरके घोरे विड्भुजे नात्र संशयः मृषावादी नरो यश्च तथा योकोशु
भाशुभः पतते नरके घोरे मूत्राकीर्णे मया प्रकृत मधुग्राहाभिहतारो यांति वै नराणीन
राः उन्मक्ताश्चित्रमर्यादाश्च शौचाचारविवर्जिताः क्रोधनाद वा राज्ञश्च कुहकाः कलामि
नः असीपत्रवने के दीनमासोरश्मिकाश्चये कर्तनश्च विकेन्यते मृगव्याधाहुतास्तुलेः

बृं
३९९

आश्रमेप्रत्यवसिता यग्निज्वालेपतंतिवै भोऽन्यैते रुपा मम सबुलेर यस्तु इच्छ गायसेः इज्यायो।
व्रतमालोपान्संदंशे नरके पतेत स्कंदते यदिवास्य मेध्रमिनो व्रतस्य चारिणः पुत्रैराज्ञापिता
ये च पुत्रैराज्ञापिता ह्यमे ते सर्वे नरकं यांति नियतं तत्स्वभोजने वर्णाश्रमविरुद्धानि क्रोधह
र्षसमन्विताः कर्माणि ये तु कुर्वंति सर्वे निरयवासिनः उपरिष्टास्थिते घोरे ह्यस्मात्माघोर
वो मस्तान् सुदारुणास्तु श्रोतात्मा तस्याधस्तात पस्मृतः एवमादिक्रमेणैव वर्ण्यमानान्नि
बोधत भूमेरधस्तात्तेसुव नरकाः परिकीर्तिताः अधर्मस्य तु वसेरौरवंत भूमिश्रकादयः
रौरव प्रथमस्तेषां महारौरव एव च अपाधः पुनरप्यन्यः शीततप इति स्मृतः तृतीयका
लसूत्रश्च महारहविविधिस्मृतः अप्रतिष्ठश्च तत्षष्ठ्यादवीचीचापंचमस्मृतः लोहपृष्ठस्तु
मस्तेषां सविधेयस्तु सप्तमः घोरवाद्वारवः श्रोक्रोमोहकः दहनस्मृतः सुदारुणस्तु शी
नात्मा तस्याधस्तात्तमोपमः सर्पनिकृंतनः श्रोतकालसूत्रेति दारुणः अप्रतिष्ठस्तिता
नाभिभ्रमसाल्मलिमहास्मृतः अवीचिर्दारुणाश्राक्रोसयंत्रपीडनाचमः तस्मात्सदा

राम·
३९९

त्रैणालोहः कर्मणां पद्गलानां च यः तथाभूतो शरीरत्वाद् विवेभ्यस्तु स स्मृतः पीडवंधवधा
संगाद्दुर्वीकारलक्षणः ऊर्ध्वे शेषाभिनालेत्तु निरालोकास्तु ते स्मृताः दुःखोत्कर्षस्तु।
सर्वेषु च धर्मस्य निमित्ततः सुखोत्कर्षस्तु सर्वधर्मस्य इति निमित्ततः ऊर्द्धलोकेः समा
वेतौ निरालोकौ च ताङ्गभौ क्रूटागारश्च मालेश्च शारीरि सूत्रनायकः उपरागसमर्पि
तस्य योज्ञायंति कर्मभिः दुःखप्रकर्षिणश्चाग्रस्तु तेषु सर्वेषु वे स्मृतः यातनाश्चाप्यसंख्ये
या नारकाण्यतथा स्मृताः तत्रानुभूत दुःखेन क्षीणकर्माणि वे पुनः तिर्यग्योनौ प्र
सूयंते कर्मशेषितगो ततः देवाश्च नारकाश्चैव ऊर्द्ध्वाधश्च संस्थिताः धर्माधर्मनिमि
त्तस्य योज्ञायंति मूर्तयः उपभोगार्थमुत्पत्ति रोपपत्तिश्च कर्मतः पश्यंति नरकान्दे
वा यंधो च कास्तु धोगतान् नारकाश्चतथा देवान्सर्वान्यश्यतथा मुखान् अनंतप्रम्क्ले
तायुस्माहारणाश्च स्वभावतः तस्मात् दृद्धमधोभावो लोकालोके न विद्यते पञ्चास्वाभ
विको सास्त्रालोकालोकप्रवर्त्तते स्वपाक वस्तु नवांघ्रि ब्राह्मणास त्रिणासदा श्रेष्ठय

वृ·
५००

उचुः सर्वेषामेवभूतानांलोकालोकनिवासिनां संसारेसंसरंतीह्यावंतप्राणिनुच्यते संख्य
यापरिसंख्यायततः कुतूहिलात्तपाः ऋषीणांतद्वचश्रुत्वामारुतोवाक्यमब्रवीत् वायुरु
नशक्यंजंतवक्तुंत्वाः प्रसंख्यानेकपंचव अनायंताह्वसंकीर्त्याहूपूर्णेनव्यवस्थिताः
गणनाविनिवृत्तेषामानंत्येनप्रकीर्तिताः नशक्यंपदितुंचतेषांज्ञातेज्ञानेनवायुनः
चतुर्णांवैप्रसंख्यानुअनोहंतेनराधिपः अनाख्यानाद्देवोयत्वानैवप्रश्नोविधीयते
ब्रह्मलोकेस्थितेयत्तसंख्ययातंनिबोधत यसहस्रतमोभागस्थावराणांभवेदिह पार्थि
वाकृमयस्तावत्संसेकायेभुसंभवाः संमेकज्ञानांज्ञावेनसहस्रेणैवसंमिताः ओदकाजं
तवसर्वेनिश्चपतहिचारिनं सहस्रेणेवभागेनसत्वानांसलिलौकसां विहंगमास्तुवि
ज्ञेयालौकिकांतेवसर्वेषाः यसहस्रमतोभागस्तेषांवैपक्षिणांभवेत् पशावस्तत्समा राम·
ज्ञेयालौकिकास्तुचतुष्पदा चतुष्पदानांसर्वेषांसहस्रेणैवसंमिताः भागेनद्विपदा धु··
ज्ञेयालौकिकास्तुचतुष्पदाः चतुःपदानांसर्वेषांसहस्रेणैवसंमिताः भागेनद्वि

पदार्थेयाः लौकिकेस्मिन्सर्वशः यस्मात्तस्मोभागोभागोत्र द्विपदाश्चनः धार्मिका
स्तेनभागेनमो हिणस्तानदेवहि स्वर्गापपादकैस्तत्स्यायानतास्थानवासिनः पति
तास्थूलस्मृद्दुष्टाडरात्मानोधियंतिये गोप्रेवतामसेहितेशीतोसंप्रापुवंतिते वेदकंटका
स्तिर्यग्यायानतास्थानमागताः उक्तस्वर्गोरवान्नेयस्तेजाघोररस्तात्मिकः ततोघनाः
त्मकस्त्रापिशीतात्मासततंतपः एवंसदुर्लभात्मतः स्वर्गेवाधार्मिकाजनाः एषांसंख्या
कृतासंख्याहव्यैस्तास्वयंभुवा मणनाविनिवत्तेषांसंख्यावासीनमानुषी ऋषयश्चैः
महान्तमनंतयसत्योभूतोभव्योभवस्सदा उक्तोहितोन्वयालोकालोकानामंतरेणच लोका
न्तरंचयाहृक्तच्चतन्नोश्रुतिर्यथातथं तेषांतद्वचनंश्रुत्वाऋषीणांमूर्द्धरेतसां सवायुरहष्ट
त्वायंइदंवत्स्वमवाचह वायुरुवाच व्यक्तंतत्केणपश्यंतियोगाव्रव्यत्तदर्शिनः प्रत्या
हारेणध्यानेनतपसाज्ञियथात्मनः अनुसृत्यमायाः संवृहाशुद्धवृद्धयः व्यपेतशो
काविरजाःकेनोब्रह्मलेवसत्तमाः सूक्ष्मयाप्रतिसंयुक्ताब्रह्मनिष्ठाःतियोगिनः ऋषीणावालि

रिवल्पानां तैर्यथा कृतमीश्वरैः यथा चैव मया दृष्टं सांनिध्यं तत्र कुर्वतः स्वकृष्णमतं कृतार्थेन माल
यं चेश्वरस्य यत् ईश्वरः परमाणुत्वाद्भावग्राह्यो मनीषिणां ज्ञानवैराग्यमैश्वर्यं तपः सत्यं क्षमा धृ
तिः द्रष्टृत्वमात्मसंबोधमधिष्ठातृत्वमेव च अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे विभुत्वान्न
त्वयोगाग्निर्ब्रह्मणोनुग्रहे रतः सलोकविग्रहो भूत्वा साहाय्यमुपतिष्ठते अहं धर्मव्ययश्च
ष्टमत्वापसर्गिकं तस्येश्वरस्य यत्राज्ञस्यानेमायामयेपरे मायाकृतमावेष्टमायीदेवा महेश्वरः देवा
नामुपसंहारं स्वतन्त्रमारिकीर्त्यते विस्तरेणानुपूर्व्या च वक्ष्यते मे निबोधत त्रयोदशैव कोयस्त
निषुतानि दशापं च च भूर्भूलोकाद्ब्रह्मलोको वै योजनैः संप्रकीर्त्यते एकयोजनकोटीतु पंचाशाब्धि
युतानि च ऊर्ध्वं भगवतो नन्तु ब्रह्मलोकान्मरे स्मृतं एषोहं गः प्रचारस्तु गत्यन्तस्त्वन्तस्मृतः नित्या
लापरिसंख्यानापरस्यरगुणस्वभावात् सूक्ष्मात्सूक्ष्मसर्वपर्मिर्णय स्वतन्त्रकृत यस्मृताः येभ्योधिकर्त्तासे
नेहैवेत्रवेद्ब्रह्मसंस्थितः नाहृप्रकृतिमस्यस्य त्मात्मधिष्ठातृत्वमव्ययं अनुत्तमायोश्रियधामपर
माधेःपरेमाय अनयपश्याप्यन्नयस्त्र स्वमूर्तिमूर्तिमानसौ प्रादुर्भावस्थिरो भावास्थितिश्चैवा

प्यनुग्रहः विधिरन्यैरनौपम्यः परमात्मेश्वरः सतेजाप्रघनमसोध्यः पुरस्तात्प्रकाशकः
यहंडमासीन्सोत्रिपथमन्वौपसर्गिकं वृहंतं सर्वतो वृत्तमीश्वराद्धिवजायत ईश्वराद्विजनिर्मे
भः क्षेत्रज्ञोबीजहंस्थाने योनिं प्रकृतिमाचक्षे साच नारायणात्मिका किंभुर्लोकस्य तस्मापर्षलो
कसंस्थानमेवच सन्निसर्गाः सतत्वाच्चलोकपातु महात्मनः पुरस्ताद्ब्रह्मलोकस्यांडादूर्ध्वा
क्चब्रह्मणः तयोर्मध्ये पुरेदिव्यं - - - - मनोमयं नहि ग्रहवत्तस्थानमीश्वरस्यमितौ।
जसः शिवंनामपुरंतत्रप्राणंजनमभीरुणं सहस्राणांशतानिपंचसंयोजनानां द्विजोत्तमः
सर्वत्रनरोत्रविस्तीर्णंसामहीमंडलसंस्थितं मध्यान्हार्कप्रकाशेनपरतेजोभिमर्दिना प्राप्तनकोपे
नमहताप्रकाशेनार्कवर्चसा द्वारैश्चतुर्भिस्सौवर्णैर्मणिरत्नादामविभूषितैः तपनीयनिर्मे
शुभ्रैर्गाढंहसकृतवेष्टने तद्वकाशपुरंरम्यंदिव्यंघंटादिनादितं नतत्रक्रममेतेमन्यकृतातपा
नजराधमाः नदैन्यपुराचाराः रूपमासोछमस्ति सहस्राणांशतेपंचसंयोजनानांदशो
दश्या नसुरगोवृषाकस्येतेजसाव्याप्यतिष्ठति भवेनमनसाभूमीविन्यस्ताकनकामयीर

ब्र॰
५०२

न्नवालुकथातत्रब्जन्यलास्तुशुभेधिकं शारदेंदुप्रकाशानि वालसूर्यनिभानि च अईन्द्रेतादृश
क्षानि सौवर्णानि तथैव च रथचक्रप्रमाणानि नीलेमरिकतप्रभैः सौकुमारेणारूपेणागंधिनाय
तिमेन च तत्रदिव्यानि पद्मानि वनेषु पवनेषु च भृंगपत्रनिकाशानि तितपनीयानि यानि च अ
हकस्यादरकानि सत्कुमारानराणि च ख्यातपत्रप्रमाणानि पंकजैसंवृतानि च भूयः सम
महानुपलांसानामानि बोधत वरावरेण्यावरदावाराहावरवर्णिनि व्यमावरभद्रा चरस्मा
स्मिन्सरोवरे पद्मोत्पलदलेर्मिते फेनाढ्यावर्जविग्रहे ज्ञलंमणिदलप्रहंताविंति सवितद
राः न ब्रह्मर्षयो न देवा नाहं सुराः पितरस्तथा नरवल्वन्यप्रभे यस्य विंडुरीशास्य तस्युं तत्रमे
ध्यानयवग्रासेयुक्ता विजितेंद्रियाः पश्यंती हमहात्मानपुरं तस्माद्वृषात्मनः मध्येपुरव
रेंद्रस्य तस्याप्रतिमतेजसा सुमहान्मेरुसंकाशो दिशाभंडप्रियावृतः सहस्रपादशो
भादस्तपनीयमयः शुभः अनुपमामयैरत्नैः सर्वतः समविभूषितः स्फटिकस्तंभसंकाशो।
वैडूर्यैः सोमसप्रभैः बालसूर्यप्रभैश्चैव सोवर्णस्याग्निसप्रभैः राजते व्यापि स्तंभैरैः

राम॰
५०२

ड्रनीलमयैस्तुभैः हैमैर्वज्रमयैश्च वहन्त्येवं स्तमसहस्रितैः जालैश्च विविधाकारैर्दीप्यद्भिरधिवा
सितैः चंद्ररश्मिप्रकाशाभिः पताकाभिरलंकृतं हंसकलघंटानिनादैश्च नित्यप्रमुदितोत्स
वं किन्नराणामधीवासः सध्याभ्राकारराजितैः परिवारसमंतात्तु हेममयप्राकारमंडनैः यथा
हिमेकशैलेंद्रा हिमश्रृंगे विराजते चामीकरमयीभिस्तु पताकाभिश्च पांडुरं एवंप्रसादरा
जासौ भूमिकाभिर्विराजते रमंति प्रतिमा यस्य त्र्यंबकस्य निवेशने लक्ष्मीश्रीश्च वसुमा
या कीर्तिर्या भासरस्वती देव्यो वै महितास्तेन त्र्यंगाधसमन्विता नित्याहारपरिसंख्याता
परस्परगुणाश्रयात् भूषणैः सर्वरत्नानां योन्यकांतिविलासयोः कोटीशतं महाभागावि
भज्यात्मानमात्मना भगवंतं महात्मानं प्रति मोदत्यंतं डिताः नासां सहस्रशास्त्वन्याप्र
हृतः परिचारिकाः रूपिण्यश्च प्रियायुक्ता सर्वा कमललोचनाः लीलाविलाससंयु
क्तैर्भावैरतिमनोहरैः गीतोल्लासहसादैर्वेश्मालापैः पत्रकारणैः ऊर्ध्वावामनिकाश्चैव वर
गात्रारुयाननाः युद्धार्थाविकटोश्च वकरालाश्च पिशाननाः तेवाद्दशारस्त्वं च जाविने

ब्र.
५०३

शङ्कुत्वपादिकाः मेषोष्ट्रवदनाश्चान्या गजवक्त्रोदरास्तथा गजाननास्तथैवान्या सिंहाननैर्वृताः
हूव्याघ्राननास्तथा लोहितोष्ठा महासत्त्वाः सुभगाश्चारुलोचनाः ह्रस्वकेश्चित्रकेशाश्च स्थू
लदेहाश्चारुलोचनाः श्वश्राञ्चकामहापिपाना नेवंरूपास्त्रियः अभ्यन्तरपरिस्कंधा देवावास
गृहाश्रिताः एतामभगवांस्तत्र दशबाहुर्महेश्वरः नंदिनाचगणेशाद्यैर्विश्वरूपैः महात्मभिः
तथा रुद्रगणैश्चापि तुल्योदार्यपराक्रमैः पावकात्मजसंकाशैर्धूपदश्चाक्रूटाननैः त्रिपु
मानेर्विमानश्च पूज्यमानश्चतत्परैः सर्वत्रिकूटमा मालाजितामारणारसिंहस्थितौ नीला
त्पलदलश्यामा हृष्टानान्यायतेक्षणा रक्तकारालवेणीलनीला दंष्ट्रागणाश्चिते षडर्द्धनेत्र दुष्प्रे
क्ष्यं रुचिरं चीरवाससं याहुवेषपरिक्लिष्टे देवानामरिनाशने बाहुवाबाहुमावेष्टपार्श्वे
सव्यापसव्यावस्थिते रोजन्यपद्दिशान्तस्तवामागुरुकरगोचरं महाभैरवनिर्घोषं चलेनाशुविमोजस
दृष्टार्लिवर्लाचधनुर्विचित्रं शोभनेधृकं त्रिशूलेविधृतामारसमोघं शाक्रवाशनं ज्वाज्वल
मानयपुषार्परमंतल्विपाशुतम अमितश्चवोजसाप्रशांतिरश्मिशाशीतथा तेजसावसु

राम.
५०३

घाकोमाटेवेशा प्रपमहात्मनः शुभ्रभेभ्याधिकं तत्र वेयामृग्निशिखाइव स्थितश्चरस्याहेवस्य
शान्तकैभमयामहान् शुभ्रभेहचिरश्रीमान्स्फाटकसकमण्डलुः अतिमावेश्रपचांगोश्रुपाहु
रांवरधारिणी उरके देनमहता मौक्तिकेन विराजता चतुर्भुजा महाभागा विजया लोकसंम
ताः देव्याश्च यत्र नीलारीश्रीरिवापरमापरा विभ्राजती स्थिपमाचे वहुतादेवस्य चांजलिं त
स्याः पृष्ठानुगाश्चान्याः स्त्रियोप्सरगणास्थिताः नारवेल्लभिनवैः कांतेरुपलिखितिशाकरं सव
लदृष्णमंपल्लवादिविरूपवृंहिताः उपगायन्तदेवस्य गणागंधर्वयोनयः अभंफ नतो महा
रस्कः श्रारम्भे घृसमकान्तिः शोभते नंदमानश्चगोपतिस्तस्य वेश्मनि स्कंदश्च सप्तर्षीवारऽ
श्रोस्यामितवीर्यवान रक्तांवरश्रीमाश्च रांवुजस्रजेक्षणः तस्य पार्श्वो विशारवश्च तेजामेय
श्च - कुसा अपेनव्यसनाङ्कुराप्रजानांपालनेरताः तेषांहूसमहावीर्यः शोभत शिखिवा
हनः व्यालक्रीडनकैस्तत्र क्रीडतो विश्वतोमुखः येनपाविवुपेन्द्राणां कंचनस्य प्रदायिनः
पैचस्वायतना विप्रागृहस्याग्रसवादिनः गृहस्वाध्यायतपसः तथाचैवोकवृतयः फे

ब्र॰
४०४

सभासदस्तस्य देवेशस्य च संमताः मन्वन्तराण्यनेकानि व्यावर्त्तयन्मुनः पुनः श्रूयतां देवदे
वस्य भविष्यार्थमुत्तमम् व्याघ्राश्चैवानुगास्तत्र कांचनाभास्तरस्विनः स्वकंदर्पारिणस
र्वे स्वयं देवेन निर्मिताः मत्स्यामत्स्य समासेन त्वयं मदर्पापहारिणः विभूतिमध्यसंख्ये
याकेन खल्वभिधास्यते अतः परमिदं भूयो भवेनाद्भुतमुत्तमम् भूतानामनुकंपार्थं
यत्कृतं तन्निबोधत मंदराडिंबकाशानां बलेनाप्रमितौजसां जहारऊदड्डवर्स्त्रीनां
महाविक्रमशालिनां चूडामणिधराणां चेमघस्तनितभैरवामसां श्रीवत्सांकितवर्णां।
णां रत्नशूलपाणिनां एवं दिशानां देवानां रूपेणोत्तमशालिनां तस्य प्रसादमुख्ये
ष्वस्तेभेषूत्तमेषु भिक्षु नयतामिमैर्यैभिस्तु मृत्खलाभिःप्रपद्यकृशस्पृक् मायासहस्र.
सिंहानां सर्वतत्रविवासिनां सभेषुयास्ततषष्ठंत्रिंबकस्यनिवेशने अपयत्रेतिस
पूज्यवायावोकांश्च विस्मिताः ऋषयः भाष्यतत्तेमिषयास्तपस्विनः भगवान्सर्वभूता
नां प्राणासर्वत्रगाप्रभो केतेसिंहमहाभूताः कतेज्ञाताः किमात्मकाः सिंहाकेनाप्यरा

राम॰
४०४

प्रतिर

धनभूतानां प्रभविष्णुना वैश्वानरमयैः पाशैः संहृत्वा त्वं पृथक् पृथक् तेषां तद्वचनं
श्रुत्वा वायुर्वाक्यं जगाद ह यतस्त्वं रसंसि सा नामीश्वरेण महात्मना ध्यायनीयस्त्वका
देहात्क्रोधात्ते सिंहविग्रहः भूतानामभयं दत्त्वा पुरा हुताग्निवपनैः यज्ञभागानि
मितं च ईश्वरस्याज्ञया तदा तस्मात्त्वयाद्य मुक्तो न हिंसितं नैकेन मस्कृता देव्यामस्य
कृतं कृत्वा तेनाद्य तस्य मस्तकं तु निष्कृताच महादेव्या महाकालीमहेश्वरी त्वामनक
मेसाहित्येणाभूते सार्द्धं वदान्तुगोः सएव भगवान् वज्रडोरुश वामः कृतालयः वीरभ
द्रोपमे यास्मा देव्यामन्यश्रमार्जनः तस्य वेश्मसंस्थे डस्य सर्वगुह्यतमस्य वै संनिवेश
स्त्वतो यस्यो मयावः परिकीर्त्तितः अतः परं प्रवक्ष्यामि येतत्र चिरवासिनः रम्ये
पुरवरश्रेष्ठे तस्मिन्वेश्मायभूमिषु नानारत्नविचित्रेषु पताकाव्याकुलेषु च सर्वका
मसमृद्धेषु वनोद्यानशोभितेषु राजतेषु महांतेषु प्रांतकोटमयेषु च संध्याभ्र

प्रासाद

संनिकाशेषु कैलासाग्रनिभेषु च इत्येवमादिभिर्भागैर्यथाविध्यानुसारिणः प्रसादवरमुख्ये
षु तेषु मोदंति सत्कृताः ब्रह्मघोषैरविरताः कथाश्च विविधाः शुभा गीतवादित्रघोषाश्चाप्यसे
स्सवाश्च समंततः संहताश्चैव मतुलाना नानाश्रयकृताश्रयाः एवमादीनि वर्णितानि तेषां प्रासा
दमूर्द्धनि सहस्रपादस्तंभनीयमयः शुभः श्वेतोऽभ्यर्चैर्वरैस्तैः सर्वतः सुविभूषितः स्फटिके
न्द्रसंकाशैर्वैडूर्यमणिसंप्रभैः बालसूर्यसमप्रख्यामपि सौवर्णैश्चाग्निसमप्रभैः कृत्वा॥
कृत्वा नैमिषेयास्तपस्विनः आपन्नसंशयाश्चैमं वाक्यमूचुः समीरणं अथ यक्ष केतुर्नाम
महात्मानो येन वश्यानुसारिणः अनुग्राह्यतमा माध्यस्य मोदंते पुरोत्तमे ऋषीणां वचनं श्रु
त्वा वायुर्वाक्यमथाब्रवीत् वायुरुवाच श्रूयतां देवदेवस्य भक्तियैरनुकल्पिता ह्रीमंतश्च नी
ता दान्ता शौर्ययुक्ताश्चालोलुपाः मध्याहाराश्च मात्राश्च आत्मारामा यतेन्द्रियाः जितद्वं
द्वा महोत्साहा सौम्या विगतमत्सराः भावस्या सर्वभूतानामव्यापारा स्वल्पयाः कर्मणा

मनसावाचाविशुद्धेनांतरात्मना अनन्यमनसो भक्त्याप्रयत्नाद्यमरेश्वरं तेलीढुंरुद्रसालोकं:
शाश्वतंपरमव्ययं भवस्यरूपमादृश्यंनीतास्त्रैवासनुत्तमं तेभ्राजंतेरमुखासर्वेविश्वरूपाः
कपर्दिनः नीलकंठासितग्रीवासीहस्ताद्दंष्ट्रास्त्रिलोचनाः अर्द्धचंद्राकृतासीषाजटामुकुट
धारिणः सर्वेदशभुजावीराप्पांतरस्तुगंधिनः तरुणादित्यसंकाशासर्वेतेपीतवाससः पि
नाकपाणयसर्वेश्वेतगोवृषवाहनाः श्रियान्विताकुंडलीनोमुक्ताहारविभूषिताः तेजसाभ्य
धिकादेवैः सर्वज्ञाः सर्वदर्शिनः विभज्यबहुधात्मानंजरामत्युविवर्जिताः क्रीडंतेविविधैर्भो
वैभोगान्प्राप्यसुदुर्लभान् सर्वेरुद्रगणमयाः सिद्धासिद्धेश्वरास्तैर्विवर्जिताः एकादशानांरुद्राणां
कोयोनेकमहात्मनो पश्चिमहमहात्मानोदेवदेवोमहेश्वरः भक्तानुकंपीभगवान्मोदते।
पार्वतीप्रियः नाहंतेषांतुरुद्राणांभवस्यचमहात्मनः नानात्वमनुपश्यामिसत्यमद्ब्रवी
मिवः मातरिश्वाप्रवीत्सुणामिस्तेनामीश्वरोद्भुतो अपतेजाश्रयः सर्वेदिवाकरसमप्रभाः
कोत्येमांपरमांपुण्यांकथांश्रेयस्करीनरः भक्तांश्चानुगृह्णातिहर्षेचैवपुष्टतमं संभावा।

वं· ४०९

यित्वा चाप्येनं वायुमस्त्रुर्महाबलं ऋषय ऊचुः समीरण महाभाग यस्माकं च यथा विभो ईश्वर।
स्यो जनमं पुण्यं ब्रह्मणं चाप महर्षिके तस्य स्थाने प्रमाणं च यथावत्परिकीर्तितं योगाधेन स महद्वेवपर
मं परमात्मनः महादेवस्य माहात्म्यं दुर्विज्ञेयं सुरैरपि तेन माहात्म्ययोगेन सहस्रस्य सामिजोजसः
यस्य बुद्धे ह्यसमो लोके मनुकं पार्थमेव वा ब्राह्मी लक्ष्म्यास्तथैव ज्ञ्या यासा प्रतिमशालिनी व्याप्य
येनस्य विंचद्रविव स्वा विश्वरूपिणा विभूतिभ्राजितत्वर्षं देवदेवस्यैव यमनि महादेवस्य रुद्रा
णां रुद्राणां तु महात्मनो तत्सर्वं निखिलेनेव वक्त्राद्गतनिश्रुवे श्रुणीत्वा तत्त्वं सर्वस्य भक्ता।
स्माभिस्तु सुव्रताः नास्ति किञ्चिदविज्ञेयं त्वत्सर्वेवानुगामिनः प्रश्नं देववरे प्राण्य यावदहं ग
मर्हसि सूत उ सत्वस्तु वाच भगवान्किं भूयो वर्णयाम्यहं किमथा चैव वक्तव्यं तद्दद्धि यामि।
सुव्रताः ऋषय ऊचुः आदित्यापरि पार्श्वं पसिं सवैश्रोधविक्रमाः वैश्वानरा भूतगणा व्या
घ्रास्य वानुगामिनः आभूतसंप्लवे घोरे सर्वे प्राणाभतो वेयं किमवस्था भवंत्येते तेन नो ब्रूहि
यथापूर्ववत् एते येव त्वया प्रोक्ता मिह व्याघ्रगणैः सह ये चान्ये सिद्धिं संप्राप्ता मानरिष्या जगा।

गम· ४०८

मह इदंच परमं तत्वं समाख्यास्यामि शृण्वतो विज्ञानेश्वरमज्ञाव मव्यक्तं प्रभवं तथा यत्र सर्वाग
तास्ते शुक्रमाराब्रह्मणः सुताः सनक सनंदनश्चैव तृतीयश्च सनातनः वोढश्च कपिलस्तथासु
सुरिश्च महायशाः मुनिः पंचशिखश्चैव येचान्ये पूर्वमादयः ततः कालव्यतिक्रांते कल्पाना
पर्ययेगते महाभूतविनाशांते प्रलये प्राप्त उपस्थिते अनेकरुद्रकोटिस्तु याप्रसन्ना महेश्वरी
शाश्वतीन्विघयाद्वोगा सत्यसा पृथ्विधत्र्ययात् प्रविष्टं सर्वभूतानां विज्ञानयुक्ते ते तेजसा देहा
यपद्ममध्यगं भूतानामनुकंपया तत्र योनिर्महात्मानः परमाणुर्महेश्वरं तरंतीश्च महाव
तें जन्ममृत्युदकां नदी ततः पश्चात्पर्वाणि परब्रह्मणमेवच देव्यावैसहदिनासमुद्देश्यः प
रिकीर्तिताः यत्र त्र्यस्त्रंसहस्राणि सिद्धानामादित्यानां तथैवच वैश्वानरभूत -- आद्याश्चैवानुगा
मिनः आविश्य तान्निलान्सर्वान्संख्यायोद्भवालया लोकान्स तु समान -- महाभूतानियं
चैव विस्तृता सह संयुतः करोति विकरोतिच सरुद्रोयः साममयः तथैवच यजुर्मयः स
पश्चात्ते तपोरतश्चैव हिरण्यश्च निश्चयात् पंचोद्विभागावात्मापश्यन्ना विज्ञात केहिजाः तत

तेजस्विनः सर्वेदिवाकरसमप्रभः ॥ सस्यात्रमसंवासमारोप्याग्रीतप्यात्मनि कर्मणा मनसा
वाचा विश्वेडेहेनातयात्मना अनन्यमनसो भूत्वा प्रपद्यते महेश्वरं व्रतोपवासनिरताः सर्व।
भूतदयापराः योगमव्ययमदिव्यं प्राप्नुवन्ति ते किन्नसंशयः प्रपयपरयाभक्त्याज्ञानयुक्तेनचेत
सा तेलं तु रुद्रसालोक्यं प्राप्नुवन्ति पदमव्ययं यः पठेत्तपसा युक्तो वायुप्रोक्तमिमां स्तुतिं ब्र
ह्मणक्षत्रियो वापि वैश्यो वा स्त्रीक्रियापरः लभते रुद्रसालोक्यं भक्तिमान्विगतज्वरः अम।
मपश्चयुः शूद्रो भव भक्तो जितेन्द्रियः आभूतसंप्लवस्थायी अप्रतीघातलक्षणः गाणप।
त्यं स लभते स्थानं वा सर्वकामिकं महायोगमयेपुमाइंभूतसंयेषु मोदते सोच्यमानो महीपृष्ठे
मर्त्यानां वरदो भवेत् इति सेवाचभगवान्वायुर्वाक्यमिदं वचः ॥ इति श्रीमत्स्कन्दपुराणे वायुप्रो
क्ते शिवपुराणसंते ॥ सूत उवाच ॥ प्रत्याहारं प्रवक्ष्यामि परस्यान्ते स्वयंभुवः ब्रह्मणस्थिति
कालेतु क्षीणे तस्मिन्सदा प्रभो यथेदं कुरुते ध्यात्मसृष्टं स्मविश्वमीश्वरं अव्यक्तोनुसतेव्य
ग्रप्रत्याहारेच कृत्स्नशः परेमवानुकल्पानां मन्वन्तरकल्पसंहरये उपस्थितेमहाघोरे हुप्रत्य

कालस्य कस्यचित् अन्ते द्रुमस्य संक्षोभे पश्चिमस्य मनोः सदा अन्ते कलियुगे तस्मिन् क्षीणे संहार उ
च्यते संप्रकाले तदावृत्ते प्रत्याहारे ह्युपस्थिते प्रत्याहारे तदा तस्मिन् भूततन्मात्रसंक्षये महदा
दे विकारस्य विशेषान्तस्य संक्षये स्वभावकारिते तस्मिन् प्रवृत्ते प्रतिसंचरे आपो ग्रसन्ति वै पूर्वं भू
मेर्गंधात्मकं गुणं आत्तगंधा ततो भूमिः प्रलयत्वाय कल्पते प्रविष्टे गंधतन्मात्रे तोयावस्था ध
राभवेत् आपस्तदा प्रनष्टास्तु याति वेगो लीयते तिमः नश्यन्त्यापस्तदा तत्र रसतन्मात्रसंक्षया
त् जायते ताश्च तद्रसा ज्योतिष्टु प्राप्नुवन्त्यतः ग्रस्तेषु सलिले तेजः सर्वतो मुखमीक्ष्यते अ
थाग्निः सर्वतो व्याप्त्यादत्ते तज्जलं तदा सर्वमापूर्यते द्युर्चिभिः तदा जगदिदं शनैः अर्चिर्भिः सं
तते तस्मिं तिर्यगूर्ध्वमधस्तलतः ज्योतिषोपि गुणं रूपं वायुरत्ति प्रकाशकं प्रलीयते तदा तस्मिं
न् दीप्यार्चिर्विवमारुते: प्रनष्टे रूपतन्मात्रे कृतरूपो विभावसुः उपशाम्यति तेजो हि वायुना
धूयते महान् निरालोके तदा लोके वायुभूते च तेजसि ततस्तु मूलमासाद्य वायुः संभवमात्म
नः ऊर्ध्वं चाधश्च तिर्यक्च दोधवीति दिशो दश वायुरपि गुणं स्पर्शमाकाशं ग्रसते च तत

ब्रं·
४०८

प्रशाम्यति तदा वायुः खं तु तिष्ठत्यनावृतं अरूपमरसस्पर्शमगंधं न च मूर्तिमत् सर्वमा
पूरयच्चादेस्तु महान्तः प्रकाशते परिमंडलं च तत्कोषि माकाशं शब्दलक्षणं शब्दमात्रं तदा
काशं सर्वमावृत्य तिष्ठति तत्र शब्दं गुणं तस्य भूतादिर्ग्रसते पुनः भूतेंद्रियेषु युगपद्भू
तादौ संस्थितेषु वै अभिमानात्मको ह्येष भूतादिस्तामसः स्मृतः भूतादिं ग्रसते चापि म
हान्वै बुद्धिलक्षणः महानात्मा तु विज्ञेयः संकल्पो व्यवसायकः बुद्धिर्मनश्च लिंगश्च
महान्नक्षर एव च पर्यायवाचकैः शब्दैस्तमाहुस्तत्वचिंतकाः संप्रलीनेषु भूतेषु गुण
साम्ये तमोमये स्वात्मन्येवस्थिते चैव कारणे लोककारणे विनिवृत्ते तदा सर्गे प्रकृत्याव
स्थिते न वै तदा संतपरो ह्यत्वादहस्तस्य कस्यचित् अगम्यस्यानादबोध्यत्वादज्ञानात्
ज्ञानिनामपि आगतागतिकत्वाच्च ग्रहणं न च विद्यते भावग्राह्यानुमानाच्च चिंतयन्वि
दस्तु च यन्न स्थिते तत्कारणे तस्मिन्नित्ये सदसदात्मके अनिर्देश्ये प्रवर्त्तिवै स्वामिकाका
रणे न तु एवं समादिरप्यस्य लोकमात्रकृतप्लवे प्रत्याहारे तदा सर्वं प्रविशन्ति पर

राम·
४०८

सारं येनेदमावृतं सर्वं सेंडमप्सु प्रलीयते सप्तद्वीपसमुद्रांतं सर्वं लोकं सपर्वतं उदकाव
रणं यच्च ज्योतिषा लीयते तु तत् तत्तेजसे वायवरणामाकाशे ग्रसते तु यत् यद्वायव्यं चाव
रणं त्वाकाशं ग्रसते तु तत् आकाशावरणं यच्च भूतादि ग्रसते तु तत् भूतादिं ग्रसते चा
पि महान्वै बुद्धिलक्षणः महान्तं ग्रसते व्यक्तं गुणसाम्यं ततः परं एतौ संहारविस्तारौ
अव्यक्तं ततः पुनः सृजते ग्रसते चैव विकाराः संग्रसं यमे संसिद्धकार्यकरणाः संसिद्धा
नानि न स्त्रये गत्वा जवं जवीभावेष्वानेषु प्रसंयमः प्रत्याहारे वियुज्यंते क्षेत्रज्ञाः करणैः
पुनः अव्यक्तं क्षेत्रमित्याहुर्ब्रह्म क्षेत्रज्ञ उच्यते साधर्म्यवैधर्मकृतः संयोगो नादिदं त्सयोः
एवं सर्वेषु विज्ञेयं क्षेत्रज्ञेष्विह ब्राह्मणः ब्रह्मविच्चैव विज्ञेयः क्षेत्रज्ञानात्पृथक् पृथक् २
विषयाविषयत्वं च क्षेत्रे क्षेत्रज्ञयोः स्मृतं ब्रह्मा तु विषयो ज्ञेयो विषयः क्षेत्र उच्यते क्षेत्र
ज्ञाधिष्ठितं तत्त्वं क्षेत्रज्ञः पर्यप्रचक्षते वक्तृत्वाच्च शरीराणां शरीरी वरुणात्मनः अव्यक्ताप
कराच्चैव ज्योतिर्भेदे च व्यवस्थिता यस्मात्प्रतिशरीरे हि सुखदुःखोपलंभिता तस्मात्क्षेत्रप

ब्र॰
४०९

नानात्वं विज्ञेयं तु विज्ञानतः यदा प्रवर्त्तते वैषां भेदानां चैव संयमाः स्वभावकारिता सर्वे काले
न महता तदा विवर्त्तते तदा तस्य स्थितिरागः स्वयंभुवः स तु स्यायोऽन्यके सर्वत्र सलोक
निवासिभिः विनिवृत्ते महदाने षां स्थितिरात्मनिवासिनां तत्कालवासिनां तेषां तदा तद्द्वि
पदर्शिनां उत्पद्यते ष्वे राग्यमात्मवादश्चणा शान्तं भोज्यभोक्तृत्वनानात्वसेषां लङ्घाव
दर्शिनां पृथक्कृतानेन त्वेतज्ज्ञानं तत्सेव्रत्सलोकिकाः प्रकृतो करणानीनां सर्वे नानाप्र
दर्शिनः स्वात्मन्येवावतिष्ठते प्रज्ञानादर्शिनात्मिकाः प्रकृतौ करणानीनां सर्वे नानाप्रद
र्शिनः स्वात्मन्येवावतिष्ठते प्रशान्तादर्शिनात्मिकाः प्रकृतौ करणानीनां सर्वे नानाप्रदर्शि
नः तत्रैवापरिनिर्वाणस्य तानानागामिनस्तु ते निर्गुणत्वात्त्रियात्मानः प्रकृतिं तेऽप्यतिक्रमात्
इत्येवं प्राकृतः प्रोक्तः प्रतिसर्गः स्वयंभुवा भिद्यन्ते सर्वभूतानां कारणानि प्रसंयमे इत्येष सं
यमश्चैव तत्त्वानां कारणैः सह तत्र संयमो दृश्यते साक्षात् सावर्त्तको द्विजः स तु धर्माधर्मौ
तपो ज्ञानं शुभे सत्यानृते तथा ऊर्ध्वभावो ह्यधोभावो सुखदुःखे प्रियाप्रिये सर्वमेतत् प्रधान

राम॰
४०९

स्वगुणमात्रात्मिकं हस्यते निंद्रियाणां च नष्टाज्ञानिनां पकुभाशुभे प्रकृत्या चैव तत्संवेगुणप्रा
पंप्रतिष्ठति योन्यवस्थाभूता स्वहृदे हिनां तु निषिच्यते जंतूनां पापपुण्यं तु प्रकृतौ यत्प्रति
ष्ठितं अव्यक्तस्यानितान्येव पुण्यपापानि जंतवः योजयंति पुनर्देहे देहान्यत्वे तथैव च
धर्माधर्मौ तु जंतूनां गुणमात्रात्मकावुभौ कारणे स्वप्रलीयेते कार्यत्वेन ह्यनंतुभिः हेत्वंत
ताः प्रलीयंते क्षेत्रज्ञाधिष्ठिता गुणाः सर्गे च प्रतिसर्गे च संसारे चैव जंतवः संयुज्यंते वि
युज्यंते कारणैः संचरंति च राजसी तामसी चैव सात्विकी चैव वृत्तयः गुणमात्रा वर्तते पु
रुषाधिष्ठिता त्रिधा ऊर्द्ध्वं देवात्मकं सत्वमधोभागात्मकं तमः तयोः प्रवर्तकं मध्ये हृदेवाव
र्तकं रजः इत्येवं परिवर्तंते त्रयः स्रोता गुणात्मका लोकेषु सर्वभूतानां तत्त्वकार्यं विजा
नत अविद्याप्रत्ययारंभाद्यारभ्यते हि मानवैः पतास्तु गतयस्त्रिसः शुभाः पापात्मिकाः
स्मृताः तमसाभिभवाज्जंतुर्योग्यांतं न विंदति अतत्त्वदर्शिनात्मा च त्रिविधे विधातन
नः प्राकृतेन च बंधेन तथा वैकारिकेण च दक्षिणाभिस्त्रिभी येन बद्धोत्यंतं विवर्तते २

ॐ
ब्रं०
४१०

येनैवैत्रयः श्रोतव्यं धारा ज्ञानहेतुकाः अनित्येनित्यसंज्ञा च दुःखे च सुखदर्शनं अशुचे शुचि
त्ति च ज्ञानमशुचौ शुचिनिश्चयः येषामेते मनोदोषा ज्ञानदोषविपर्ययात् रागद्वेषनिवृत्ति।
अतज्ज्ञानसंभवाकृते अज्ञानं तमसो मूलं कर्मद्वयफलं रजा कर्मजन्मतु नर्दहेमस्तां दुःखेप्र
वर्त्तते श्रोत्रज्ञाने त्वगक्षि वल्कजिह्वा घ्राणं जन्मलक्षणा पुनर्भवकरी दुःखा कर्मणा जायते तु
सा सततं सा भिहितो कालः स्वकृतैः कर्मणः फलैः तैलपीलकवज्जीवस्तत्रैव परिवर्त्तते त
स्मात्सत्यमनर्थानामज्ञानमुपदिश्यते तंशास्त्रमवधार्यैकं ज्ञाने यत्नं समाचरेत् ज्ञाना
द्धि सज्जते सर्वं तस्माद्बुद्धिर्विरज्यते वैराग्याद्बुद्ध्या वापि शुद्धसत्वेन मुच्यते अत ऊर्ध्वं भवस्था
भिरागं भूतापहारिणं अभिद्रुतापयोरागः संभूत्या कारणं स्मृतं ब्रह्माद्यैदोषावरानवे संसा
रे ह्याधिभौतिके अज्ञानं सर्वकं तस्माद्ज्ञानं तु विवर्जयेत् यस्य चार्थेन प्रमाणकारणैः
निरूप्यते विविधा यातना स्थाने तिर्यग्योनौ च पाहि वै कारणे विषये चैव प्रतिघातस्तु सर्व
शः अनैश्वर्यं तत्र नस्सर्वं प्रतिघातात्मकं स्मृतं उपघातात्मसौ वृत्तिर्भूतादीनां चतुर्विधा स

राम०
४१०

त्वस्य मात्रकं चित्तं यथा सत्त्वं प्रदर्शनात् तत्त्वानां च यथा तत्त्वं दृष्ट्वैव तत्त्वदर्शनात् सत्त्वक्षेत्र
ज्ञ नानात्वमेतज्ज्ञानार्थं दर्शनं नानात्वदर्शनं ज्ञानं ज्ञानाद्धि योग मुच्यते तेन वद्धस्य वै वंधो मो
क्षो मुक्तस्य तेन च संसारे विनिवृत्ते तु मुक्तो लिंगेन मुच्यते निःसंबद्धो ह्यचेतन्यः स्वात्मन्येवा
वतिष्ठते स्वा गौणप्रवीयते कार्यत्वे न हि जंतुभिः सचेतनाः प्रलीयंते क्षेत्रज्ञाधिष्ठिता गुणाः
सर्गे च प्रतिसर्गे च संसारे चैव जंतवः संयुज्यंते वियुज्यंते कारणैः संचरंति च राजसी तामसी
चैव सात्त्विकी चैव वृत्तयः गुणमात्राः प्र न व्यवस्थितस्थापि विज्ञयाख्येणालिख्यते इत्ये
तल्लक्षणं प्रोक्तं समासाज्ज्ञानमोक्षयोः सचापि त्रिविधः प्रोक्तो मोक्षो वै तत्त्वदर्शिभिः पूर्वं वि
योगो ज्ञानतद्धि तीयो रागसंक्षयात् तस्मात्तृतीयास्थितीयो लुभ्याख्यातं मोक्षकारणं लिंगा
भावात्तु कैवल्यं कैवल्यात्तु निरंजनं निरंजनत्वाच्छुद्धत्वेनात्मनो नानुविद्यते नैमित्तमप्रती
घाते हृष्टशाह्लादि लक्षणं सुखावनानि रूपाणि प्रावनानि यथाक्रमं क्षेत्रज्ञेषु वसंजनेषु
णामात्मिकानि तु अतऊर्द्ध्वं प्रवक्ष्यामि वैराग्यदोषदर्शनात् दिव्ये च मानुषे चैव विषये

पंचलक्षणे अप्रहृष्टोनभिष्वंगः कर्त्तव्योदोषदर्शनात् नापप्रीतिविषादानां कार्यंतु परिवर्ज
ने एवं वैराग्यमास्थाय शरीरीनिर्ममोभवेत् अनित्यमशिवंदुःखमितिबुध्यानुचिंत्यच वि
शुद्धं कार्यकरणं सत्वान्यवव्यसितया परिपक्वकषायोहिकृत्स्नान्दोषानपश्यति ततःअ
याणकालेहि वैषेनैमित्तिके स्वप्या उष्माप्रकुपितः कायेतीव्रवायुसमीरितः सशरीरमु
पाश्रित्य कृत्स्नान्दोषान्वृणाद्धिवै प्राणस्थानानि भिंदन्हि छिंदन्मर्माणि नीत्यच शैत्या
न्प्रकुपितो वायुरूर्द्ध्वस्त्रक्रमते ततः सचाये सर्वभूतानां प्राणस्थानेष्ववस्थितः समासात्त
वृतेज्ञाने संवृत्ते ष्वचकर्मसु संजीवोनाभ्यविष्टमः कर्मभिर्लैपुराकृतैः अष्टांगप्राणवृ
त्तिवैकल्पविच्यवत्यपतेपुनः शरीरंप्रजहंसौवैविरुद्धासस्लताभवेत् एवंप्राणैःपरित्यक्तो
मृतइत्यभिधीयते यथाहि लोकेवैघ्रातेनीयमानमितस्ततः रंजनेनद्वयेयस्तु नेनानेन
नविद्यते कृत्स्नत्ययस्तु नीयस्तु व्याख्यानं मोहलक्षणं चान्ये विषयेदोषविषयेपंचल
क्षणे अप्रहृष्टोनभिष्वंगः प्रीतितापविसर्जनं वैराग्यकारणेस्तेनत्वकृतीनांलयस्यच

अष्टौ प्रकृतयो ज्ञेयाः पूर्वोक्ता वै यथाक्रमं अव्यक्ताद्यास्तु विज्ञेया भूतानां प्रकृतेर्लया वर्णाश्र
माचारयुक्ताविप्राः स्वधर्माविरोधिनः वर्णाश्रमाणां धर्मेयं देवस्थानेषु कारणं ब्रह्मादीनि पि
शाचानां नान्यष्टौ स्थानानि दैवतानि ऐश्वर्यमणिमाद्यष्टकारणं महत्तत्त्वलक्षणं निमित्तमष्टमीया
नेऽहं प्राप्याहङ्कारलक्षणं अष्टावेतानि रूपाणि प्राकृतानि यथाक्रमे षोडशेष्वनुसर्जते गुणा।
मात्रात्मिकानि षट् प्राहुरहङ्कारलक्षणेन पञ्चधा तीर्ण च लक्षणा पञ्चपर्वविधाः सिद्धा जीवेन्द्रिये
नैव लक्षणा स्थावित्वं स्थानमयानस्यातिशयविशालया तिर्यग्गृहे मध्यस्थानं सुधावतो पि यथाक्र
मे जीवप्राणलक्षणात्लिङ्गकारणं च वर्णसूत्रं पर्यायवाचके प्राहुरेकार्थे सोऽभिलक्ष्यते व्यक्ता।
व्यक्तोऽप्रमाणेष्वेव -- प्रमाणसम्भूतेः सावेद्यमन्तकृल्लक्षणः अव्यक्तानुग्रहान्तेन वै देहत्वाधि
ष्ठितं च यत् एवं ज्ञात्वा शुचिर्भूत्वा ज्ञानाद्वै विप्रमुच्यते नष्टे चैव यथा तत्त्वेन स्थानोतत्वद
र्शने यथो पूर्वपरिनिर्याति भिन्ने देहे स्थिते यथो प्रवेपरि निर्याति भिन्ने देहे स्थिते तेभ्यो ने कारणं
चापि अव्यक्तात्मानि नः मतः पुरुषो गुणशरीरेण प्राणायन नानर्थधाः नान्यशरीरमादन्नेद

वृ॰
४१२

क्षेत्रजीवेषयांकुरः जातीकसर्वं संसाराद्धिक्षेत्रशरीरमानसः ज्ञात्वाच्चतुर्दशाबुद्धः प्रकृतिसोनि
वर्त्तते प्रकृतिंसत्यमित्याहुर्विकारोनतुउच्यते तत्स्वभावेनतत्त्वेयसद्भावसत्यमुच्यते अना
मरूपंक्षेत्रज्ञंनामरूपंप्रवर्त्तते यस्मात्क्षेत्रंविजानातितस्मात्क्षेत्रज्ञउच्यते क्षेत्रश्चात्मयतोय
स्मात्क्षेत्रज्ञस्तुभउच्यते क्षेत्रज्ञस्मर्यतेतस्मात्क्षेत्रंतत्त्वैर्विभाष्यते क्षेत्रंतस्मात्त्रयंहृक्षेत्रज्ञः
प्रत्ययीसदा त्रपुराणान्करणाच्चैवक्षेत्रंतत्त्वालाजनयैवच भोजनत्वाच्चविषत्वाच्चक्षेत्रंक्षेत्रविदो
विदुः महदाद्यंविशेषांतंसर्वेद्रव्यंविलक्षणं विहारलक्षणंतेहसोक्षरमक्षरमेवच तमेव
चविकारंतुयस्माद्धेरक्षतेपुनः तस्माच्चकारणाच्चैवक्षरमित्यभिधीयते संसारनरकेभ्य
स्त्रायतेपुरुषंचयत् दुःखत्राणंपुनस्त्वापिक्षेत्रमित्यभिधीयते सुखदुःखमोहभावा
द्योऽक्षमित्यभिधीयते अचेतनत्वाद्धिघयतविधमेविभुस्मृतं नक्षीयतेनक्षरतिविकारस्यप्रस
नेतत्तम् अक्षरंतेनचाप्यक्तः मक्षीणत्वात्तथैवच यस्मात्पर्थनश्यतेचतस्मात्पुरुषउ
च्यते पुरप्रत्ययिकोयस्मात्पुरुषइत्यभिधीयते पुरुषंकपयस्त्वापकपंतत्त्वैर्विभाष्य

राम॰
४१२

ते शुद्धो विरंजनो भा मोज्ञानाज्ञानविवर्जितः अस्तिनास्तिमेनास्यावाबद्धो मुक्तोगतस्थि
तः नैर्हेतुकात्रनिर्द्दिश्यस्तन्नस्तस्मिन्नवियते शुद्धत्वान्ननुदेशोबंधमुक्तात्समदर्शनः
आत्मप्रत्ययकारीचरत्नंनंवापिहेतुकं द्वयपाहृत्यैपभुनिर्द्दश्यतदानर्इद्हरंवरं एवंज्ञात्वा
सविज्ञानाननतः शांतिंनियछति कार्यंचकारणंचैवबुद्धादौभौतिकेनदा संप्रयुक्तोविमु।
क्तोयाजीविनोवामनस्या विज्ञाननाचद्वयंपतप्रयात्वेनेह सर्वगः स्वेनात्मानेनमात्मा
नंकारणात्मानियछति अक्रतोकारणेनत्वात्मन्यवोपतिष्ठति अस्तिनास्तीतितोन्यो
वारहात्मुत्रेतिवापुनः एकत्वंवापृथक्त्वंवाचैत्रन्नपुरुषेतिवा नात्मवान्सनिरात्मावा
चेतनाचेतनापिवा कर्त्तावासोयकर्त्तावाभोक्तावाभोग्यमेववा यत्रैतानननिवर्त्ततेहेत्र
हेतुनिरंजने अवाच्येनदनात्म्यानादय्रसात्वादहेतुकी अतर्क्यमचिंत्यत्वादवाप्यात्वा
चसर्वगः नाभिलिप्यतिननत्नंहंशाप्यमनसासह हेतुहेतुनिर्गुणेशुद्धेशांतेहीले
निरंजने व्यपेतसर्वडैवेचनिरुद्धेशांतिमागते निरात्मकेपुनस्तस्मिन्वाच्यावाच्यो

वा॰
४१३

नविद्यते पतौ संहारविस्तारौ व्यक्ताव्यक्तौ ततः पुनः सृजते ग्रसते चैव ग्रस्तो पर्यवतिष्ठते
दैवब्रह्माधिष्ठितो सर्वं पुन सर्वं प्रवर्त्तते अधिष्ठानप्रवृत्तेन ततस्तस्य तु बुद्धिपूर्वकं साधर्म्यवैधर्म
कृतः संयोगो विधितस्तयोः अनादिमंत्त्वात्तयोर्यो महापुरुषजः स्मृतः यावच्च सर्गप्र
तिसर्गकालस्तावत्तिष्ठति स संनिरुद्धा पूर्वैस्तितत्त्वेनतदबुद्धिपूर्वं प्रवर्त्तते ततस्तु रूपा
र्थमेव पद्मानि सर्गः प्रतिसर्गे पूर्वं प्राधानिकौ चेश्वरकारितौ च अनाद्यनंतावभिमान
पूर्वकं विशामयंतीजगदभ्युपेत इत्येष प्राकृतसर्गोत्र तावाद्धेतु लक्षणः उक्तो समासि
सदात्यंतेकरत्नं लत्त्रमुच्यते इत्येष प्रतिसर्गो वि त्रिविधः कीर्त्तितो मया विस्तरेणानु
पूर्व्या च भूयः किं वर्त्तयाम्यहं ॥ इत्येष वायुप्रोक्ते उपसंहारपादे प्रतिसर्गो नाम ॥ ऋ
षय ऊचुः सूत सूत महाख्यानं भवता परिकीर्त्तितं प्रजानामुनिभिः सार्द्धं देवानाम्
ऋषिभिः सह पितृगंधर्वभूतानां पिशाचोरगरक्षसां दैत्यानां दानवानां च यक्षाणां
मेव पक्षिणां अत्यद्भुतानि कर्माणि विविधिद्धर्मनिनिश्चयः विचित्राश्च कथायोगा जन्म

राम॰
४१३

चाग्म्यमनुत्तमे तत्कथ्यमानानामस्माकं भवता श्रुत्वाण्यागिरां मनः कर्मस्वेवं सौतेशीलत्वा
मतसंभवं एवमाराध्यते सूतं सत्कृत्य च महर्षयः यत्नक सत्रिणस्सर्वे पुनः सर्गप्रवर्त्तनं कथं
सूत महाप्राज्ञ पुनः सर्गप्रवर्त्तते वंशेषु संप्रलीनेषु गेण साम्येन मोमये विकारेष्वविमते
षु अव्यक्ते चात्मनि स्थिते अप्रवृत्ते त्वा लक्षणा मसा साध्यो व्योग लदा कथं प्रपत्स्यते सर्गः
तेन प्रवृत्तिः प्रकृतां एवमुक्तस्ततः सूतः तदासौ लोमहर्षणः व्याख्यातमुपचक्राम सः पुनः
सर्गप्रवर्त्तनं अत्रवो वर्त्तयिष्यामि यथा सर्गः प्रपत्स्यते पूर्ववन्मस्तु विस्तरः समासात्तन्नि
वोधत दृष्टे चैवानुमेयं च तर्के वक्ष्यामि युक्तितः तस्माद्वाचो निवर्त्तते अप्राप्य मनसा सह
अव्यक्तः व्यवस्येत्तत्वाज्ञहं तदुदाहृतं विकारे प्रतिसंहते गुणसाम्ये निवर्त्तते प्रधानं पुरुषाणं
च साधर्म्येणावतिष्ठति अविभागवतावेतौ गुणसाम्य स्थितावुभौ सर्वकार्येषु बुद्धिर्ध्वंप्र
धानस्य प्रपत्स्यते यद्बुद्धिपूर्वं हेतुत्वं अधिष्ठास्यति तान् गुणान् एवं तान् अभिमानेन श्रुपा
श्रयेन पुरस्सरः यदा प्रवर्त्तितं तत्त्वं हेतुहेतुत्वयोर्हयोः भोज्यभोक्तृत्व संवेधात् प्रपत्स्यतो।

प्रं
४१७

कृतान्तुभौ तस्माद्वरणमव्यक्तं यामेस्थितागुणात्मकान् क्षेत्रज्ञाधिष्ठितं तच्चैव वषम्यं भज
ते तु तत् ततः प्रपद्यते व्यक्तं क्षेत्रक्षेत्रज्ञयोर्द्वयोः क्षेत्रज्ञाधिष्ठिते सत्वविकारं जनयिष्य
ति महदादिविशेषान्तं चतुर्विंशं गुणात्मकं क्षेत्रज्ञप्रधानस्य पुरुषस्य प्रवर्त्स्यते ब्रह्माण्डे
प्रथमः सोथ भविता चेश्वरः पुनः ततोऽन्येयस्य कृत्स्नस्य सर्वभूतपतिः शिवः ईश्वरः सर्वा
मुक्तानां ब्रह्मा ब्रह्ममयो महान् आदिदेव प्रधानस्य अनुग्रहाय प्रवर्त्स्यते अनाद्यो वरमुत्पा
दौ उभौ सूक्ष्मौ तु तौ स्मृतौ अनादिसंयोगायुतौ सर्वक्षेत्रज्ञमेव च अबुद्धिपूर्वकावुक्ता
मथाकौतुकौ रौतदा अप्रमयम नो यं च स्थितावुदकमत्स्यगाः प्रवृत्तपर्वतौ सर्वयुन
सर्गे प्रपत्स्यते अव्यक्तात् गणात् प्रवर्त्तते रजः सत्वतमात्मकः प्रकृतिकालेर जन्माभिपन्नामह
त्वभूतादिविशिष्टान्तां ताच विशेषतां चेन्द्रियतां च यान्ति गुणाभिधानाय तिभिर्मनुष्याः
सत्याभिध्यायिनस्तस्य ध्यायिनः सन्निमित्तकं रजः सत्वं तमाव्यक्ता विषमीणः परस्परं आ
यान्ते वै प्रपत्स्यन्ते क्षेत्रज्ञाः सर्वशः संसिद्धकार्यकरणा उत्पद्यन्ते अभिमानिनः सर्वसा

राम
४१७

त्वात्प्रपद्यंतेव्यक्तात्सर्वमेवच प्रत्याहारे यांति सर्वं सहासाधकाश्चाप्यसाधिकाः संसारंतस्तेनम
र्वे स्थानमकरणैः सह कार्याणि प्रतिपद्यंते उत्पद्यंते पुनः पुनः गुणमात्रात्मिकाश्चैवधा
र्माधर्मौ परस्परं न्यारभंते इह चान्योन्यवरेणानुगृह्णते एवा सर्वेतुल्यप्रमहत्वार्थे सर्गादौ या
ति विक्रियां गुणास्तु प्रतिधीयंते तस्मात्तत्त्वस्य रोचते गुणस्य यानि सर्वाणि प्राकृतस्यांश
नि पेदिरे तान्येव प्रतिपद्यंते सृज्यमाना पुनः पुनः हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मे ऋतानृते
तद्भाविताः प्रपद्यंते तस्मात्तत्त्वस्य रोचते महाभूतेषु नानात्वमिंद्रियार्थेषु मूर्तिषु विप्रयोगा
श्च भूतानां गणेभ्यः संप्रवर्तते इत्येष वो मयाख्यातः पूर्वसर्गः समासतः समासादेव वक्ष्या
मि ब्रह्मणोऽव्यक्तसमुद्भवे अव्यक्तात्कारणात्तस्मान्नित्यात्सदसदात्मके प्रधानपुरुषाभ्यां
तु जायते च महेश्वरः स पुनः संभावयिता जायते ब्रह्म सोऽचितः सृजते स पुनर्लोकानभि
मानानुगतस्त्रिकालं अहंकारस्तु महतः तस्माद्भूतानि चात्मनः युगपत्संप्रवर्तंते भूतात्ते।
वेंद्रियाणि च भूतभेदाश्च तेभ्यः इति सर्गः प्रवर्तते विस्तरावयवस्तेषां यथाप्रज्ञं यथाश्रुतं।

बृं
४११

कीर्त्तिनिर्वीयर्यार्स्वर्वत्तथैवाभ्युपद्यार्थना एनकृत्वा नैमिषेयास्तदानीं कालोत्पत्तिं स्थितिं चाक्षयं च
तस्मिन्स्तत्रैवमभ्यर्थ्य प्राप्यमनुज्ञाप्य एवं लोकमनुष्यः प्राप्नुवंति यथायुर्यं विधिवद्देवतादीनि हुत्वैवं
वुत्वा भूयस्त्वाप्य मुह्राः स्वत्वादेहानायुष्यो नेकनाप्नी नु एषा न लोकान्स्नाप्य यथेप्सु चरितप्ययः
एते नैमिषेयावेदमुक्त्वा स्मृत्वा च वेत्तदा जग्मुश्चावभृथस्नाना स्वमेसर्वे यमं त्रिलः विप्राल पा
यमपि दृष्ट्वा बहुविधैर्मखैः प्राप्नुवन्ति ततः स्वर्गगतारस्तद्विजोत्तमाः अत्रि या प्रथमः पादः
कथावन्तपरिग्रहः अनुष्ठानं यो ह्यानन्तयसंहारनेकचः एवमेवचतुष्पादं पुराणं लोकसंमतं
उवाच भगवान्साक्षाद्ब्रह्मा लोकहितेरतः नैमिषेसत्रमासाद्य मुनिभ्यो मुनिसत्तमाः तत्प्रसादा
दसंदिग्धं भूतोत्पत्तिलयानि च प्राधानिकी मिमां संहितं तथैवेश्वरकारिणो सम्यग्विदित्वा मे
धावीन्न मोहमधिगच्छति इदं यो ब्राह्मणो विद्वानितिहासपुरातनं शृणुयाद्वा पठेद्वापि तथा
ध्यापयतेति च स्यानेष्ठ समहेस्य मोदते प्राप्य ते सत्राः ब्रह्मसायोज्यको भूत्वा ब्रह्मणैव सह मो
दते तेषां कीर्त्तिमतां कीर्तिः प्रजेशानां महात्मनां प्रथयन्पृथिवीशानां ब्रह्मभूयाय गच्छे

रामः
४११

ति इदं यो ब्राह्मणो विद्वानितिहासं पुराणकं शृणुयाच्छ्रावयेद्वापि तथाध्यापयतेति च स्या
न्नेष्टुस्स महेंद्रस्य मोदते यावतीस्समाः ब्रह्मसायुज्यको भूत्वा ब्रह्मणैव सह मोदते नेष्टा की
र्त्तिमतां कीर्त्तिः प्रजेशानां महात्मनां प्रथयन्पृथिवीपालो ब्रह्मभूयाय कल्पते एवं व
यस्समायुष्यं पुण्यं वेदैस्संमितं कृष्णद्वैपायनेनोक्तं पुराणं ब्रह्मवादिना मन्वंतरे
श्वराणां च यः कीर्त्तिं प्रथयेदिमां देवतानां महर्षीणां च भूरिद्रविणतेजसां सर्वैर्विमु
च्यते पापैः पुण्यं च महदवाप्नुयात् यश्चेदं श्रावयेद्विद्वान्सदा पर्वणि पर्वणि धूतपा
प्मा जितस्वर्गो ब्रह्मभूयाय कल्पते यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमंततः अ
क्षय्यं सार्वकामीयं पितॄंस्तच्चोपतिष्ठति यस्मात्पुराह्यनतीदं पुराणं तेन चोच्यते निरु
क्तमस्य यो वेद सर्वपापैः प्रमुच्यते तथैव त्रिषु वर्णेषु ये मनुष्याः प्रधानतः इतिहासमि
मं श्रुत्वा धर्माय विदधे मतिं यावंत्यस्य शरीरेषु रोमकूपाणि सर्वशः तावत्कोटिसहस्रा
णि वर्षाणां दिवि मोदते ब्रह्मसायुज्यगो भूत्वा देवतैस्सह मोदते सर्वपापहरं पुण्य

ब्रं
७१६

पवित्रं च यशस्विनं ब्रह्माददौ शास्त्रमिदं पुरालं मातरिश्वने तस्माच्चोशनसं प्राप्तं तस्मा
च्चापि बृहस्पतिं बृहस्पतिस्तु प्रोवाच सवित्रे तदनंतरं सविता मृत्यवे प्राह मृत्युश्चेंद्राय वै
पुनः इंद्रश्चापि वसिष्ठाय सोपि सारस्वताय च सारस्वतस्त्रिधामाय त्रिधामा च शरद्वते
शरद्वतस्त्रिविष्टाय सोंतरिक्षाय दत्तवान् वर्षिणे चांतरिक्षो वै सोपि त्रय्यारुणाय च त्र
य्यारुणाद्धनंजये स च प्रादात्कृतंजये कृतंजयात्तृणंजयो भरद्वाजाय सोप्यप गोत
माय भरद्वाजः सोपि निर्यंतरे पुनः निर्यंतरस्तु प्रोवाच तथा वाजश्रवाय वै स ददौ सो
मशुष्माय स ददौ तृणविंदवे तृणविंदस्तु दक्षाय दक्षः प्रोवाच शक्तये शक्तेः पराश
रश्चापि गर्भस्थः श्रुतवानिदं पराशराज्जातुकर्ण्यः तस्माद्द्वैपायनः प्रभुः द्वैपायना
त्पुनश्चापि मया प्रोक्तो द्विजोत्तमाः प्रांशशायायनउ मया वैतत्पुनः प्रोक्तं पुत्राया
मितबुद्धये इत्येवं वाचं ब्रह्मादि गुरूणां समुदाहृतं नमस्कार्यास्तु गुरव प्रयत्नतम
नीविभिः धन्यं यशस्यमायुष्यं पुण्यं सर्वार्थसाधकं पापघ्नं नियमेनेदं श्रोतव्यं नियता

राम
७१६

त्मभिः सर्वकामप्रदं नित्यं सर्वसिद्धिप्रदायकं वायुनाप्रोक्तमिदं सर्वपौराणिकं सदा सू
तउ ब्रह्मांडीयं पुरागीतं आदिजेन स्वयंभुवे ब्रह्मणोक्तमिदं पुण्यं वायवे विस्तरान्वितं
वायुनाऋषिसंघानामग्रतः प्रकटीकृतं ऋषिभिर्भरते खंडे वकुलीकृतमद्भुतं यच्चयेवा
च्यते पुण्यं तत्र नारायणः सदा ब्रह्मेशौ तत्र निष्ठिते देवेंद्रप्रमुखाः सुराः पुराणमेतत्परं पवि
त्रं पापनाशनं लिखित्वैतत्तु योदद्यात्पुराणं वेदसंमितं पुराणमेतदखिलं ब्रह्मांडदान
मिष्यते भूमिदो रत्नदो हैमदो नुवेह नाकाशाउच्यते तं ब्रह्मशेषसारः तद्दानमिह भूत
ले ब्रह्मांडदानेन यत्पुण्यं भवतीश्वराः तत्पुण्यमिह माहात्म्यादिकं वायुप्रदानतः ए
तत्कृत्वा च विधिनाविधिनाविधिनादापितं द्विजे कल्पकोटिं समभ्यस्य वैकुंठे वसते चिरं
पुराणमेतदखिलं सद्विजे प्रतिपादयेत् पुण्येन समामुक्तो हेमवायु सदक्षिणं वस्त्रभू
षिसमायुक्तायपेडपेतं प्रकल्पयेत् तथा मेधविधिना कृत्वा च समर्पयेत् [illegible] विप्रायस्मै
वल्मिकाकार्यः मानवैः सालंकृतः [illegible] प्रधाने [illegible] व सुराभरणैः सदा सुपर्वाणि

ब्रं॰
५१२

शुभे काले संपूज्य विधिवज्जनः ॥ देयं दानं विपुलेन नराणां ब्रह्मांडसंज्ञितं ॥ येन दत्ता च तद्वे
दाद्दत्ता नयशादशैववत् ॥ ब्रह्मांडमखिलं दत्तं यथा ब्रह्मा कृतं यदि ॥ दानेन कृते पुराणस्या
हरः संतोषमाप्नुयात् ॥ स स्वस्वरूपं परमं यं वै वैकुंठं वा समये च्चिरं ॥ स्वस्ति वाचनं मंत्रैवेनया
मंगलवाचने ॥ नाशुचौ नापि पापाय नाप्यसेयस्मै तोषिते ॥ नाश्रद्दधाने नाविद्वेषे नापु
त्रायकथंचन ॥ नास्तिकाय प्रदातव्यं पवित्रमिदमुत्तमं ॥ स्वव्यक्तो वैयस्य योनिं वदंति व्य
क्तो देहं कालमंतं गतानि च ॥ वह्निं वक्त्रं च चंद्रसूर्यौ च नेत्रे दिशः श्रोत्रे घ्राणवायुश्च वायुः ॥ वाचो वे
दाश्चांतरिक्षं शरीरं क्षितिं पादौ तारकारोमकूपान् ॥ सर्वाणि चांगानि तथैव तानि विद्याश्चांगानि यस्य कुक्षे
तदेव ॥ देवं यज्ञात्मकं सत्यलोकप्रतिष्ठितं ॥ वरं वरेण्यं वरदं स्मरेश्वरं ब्रह्माणमिदं प्रयतो नमस्ये ॥ ॥ ॥
इति श्री महापुराणे वायुप्रोक्ते द्वादशसाहस्र्यां संहितायां ब्रह्मांडपुराणे समाप्तमिति ॥ ॥ ॥
प्रक्रियापाद ग्रंथ ॥ ४८०० ॥ अनुषंगपाद ॥ ३६०० ॥ उपोद्घातपाद ॥ २४०० ॥ उपसंहारपाद ॥ १२०० ॥ एवं
ग्रंथसंख्या ॥ १२००० ॥ मध्याधिकत्रीणि शतानि ग्रंथकोषगणनीयः ॥ उपसंहारपादे कलियुगप्रमाणं

राम॰
५१९०

ब्र॰
पु॰
५११८

॥४३२००० ॥ उपोद्घातपादद्वापरयुगप्रमाणं ॥८६४००० ॥ अनुषंगपादेत्रेतायुगप्रमाणं ॥१२९६००० प्रक्रियापादेकृतयुगप्रमाणं ॥१७२८००० ॥ इदं ब्रह्माण्डं चतुर्युगसंख्याप्रमाणं ॥ ॥ समाप्तं ब्रह्माण्डपुराणं ॥ संवत् ॥१८ ॥२४ ॥ वर्षे पोषमासे त्रयोदश्यां तिथौ सोमवासरायां लिषितं ॥ ॥ श्रीरस्तु ॥ कल्याणं भवतु ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

1490

रामजी
५११८